CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

11·3

॥ श्रीः ॥

हरिदास-संस्कृत-ग्रन्थमाला
२३०

॥ श्रीः ॥

साहित्यदर्पणादर्शः

(साहित्यदर्पण-प्रश्नोत्तरी)

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE
ru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Ja

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

॥ श्रीः ॥

हरिदास संस्कृत ग्रन्थमाला
२३०

॥ श्रीः ॥

साहित्यदर्पणादर्शः

(परिवर्धितं संस्करणम्)

सम्पादकः—
पण्डितश्रीरामगोविन्दशुक्लः
न्याय-व्याकरण-साहित्याचार्यः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी १

ajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgao

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इधर विषय का कण्ठस्थ पूछना, लिखित परीक्षा लेना, लिखने की परम्परा को प्रोत्साहित न करना आदि अनेक दोषों के कारण छात्रों में स्वयं किसी कला का विकास नहीं हो रहा है। उन्होंने केवल समझने का प्रयत्न भी बन्द कर कापियों का रटना प्रारम्भ कर दिया। इन कारणों को देखकर मेरा ध्यान इधर गया। जिसमें एक सामान्य मोड़ लाने के लिए मैंने सरल और विस्तृत प्रश्नोत्तरी के रूप में 'साहित्यदर्पणादर्श' की रचना की जो थोड़े ही दिनों में लोगों के आदर का पात्र हुआ।

मुझे अपने प्रयत्न की सफलता पर उत्साह हुआ तथा मेरे मित्रों ने कुछ और सुझाव दिए जिनको ध्यान में रखकर मैंने इस दूसरे संस्करण में कुछ अधिक विषयों का समावेश किया और छात्रों की सुविधा को ध्यान में रखकर अन्त में वाराणसेय संस्कृत विश्वविद्यालय तथा अन्य परीक्षाओं में पूछे गए प्रश्न-पत्रों का संग्रह भी जोड़ दिया है। यद्यपि ये प्रश्न प्रकरणानुसार रक्खे गये हैं तथापि प्रश्न की भाषा में हेर-फेर न करने के उद्देश्य की पूर्णता के लिए ही कहीं कहीं एक ही प्रश्न में दो परिच्छेदों के प्रश्नों को भी एक साथ किसी एक परिच्छेद में रख दिया है अतः छात्रों को सावधानी से प्रश्न पढ़ना चाहिए। अब मुझे पूर्ण विश्वास हो रहा है कि इस ग्रन्थ से लोगों को विषय तैयार करने में सहायता मिलेगी तथा केवल कण्ठस्थ करने की प्रवृत्ति का बढ़ना भी बन्द होगा।

इस प्रकार 'प्रश्नोत्तरी' लिखना अनुचित मानते हुए भी मैंने यह कार्य प्रश्नोत्तरी रटने की परम्परा बन्द करने की दृष्टि से किया है। यदि मैं अपने उद्देश्य में सफल हुआ और विद्वानों ने मेरे उद्देश्य की सफलता प्रमाणित की तो मुझे बड़ी प्रसन्नता होगी।

अमेठीराज्यमन्दिर
गंगादशहरा, २०१९ वि०

रामगोविन्द शुक्ल

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ श्रीगणेशाय नमः ॥

साहित्यदर्पणादर्शः

(साहित्यदर्पण-प्रश्नोत्तरी)

वन्दामहे महेशानचण्डकोदण्डखण्डनम् ।
जानकीहृदयानन्दचन्दनं रघुनन्दनम् ॥

(१) प्रश्नः—साहित्यदर्पणस्य कर्तुः नाम समयश्च निर्दिश्येताम् ॥

उत्तरम्—साहित्यदर्पणस्य कर्तारः कविराज–श्रीविश्वनाथमहापात्रा आसन् इति साहित्यदर्पणग्रन्थस्य समाप्तिसूचकान्तिमश्लोकेन[१] ज्ञायते । एतेनैव चास्य पितुश्चन्द्रशेखरकविराजेति नाम च ज्ञायते । श्रीचन्द्रशेखरकविराजोपि साहित्य-शास्त्रस्य ज्ञाता आसीत्, साहित्यदर्पण एव इत्यस्मत्तातपादानामित्यादिना बहूनां श्लोकानां उद्धरणदानात् ज्ञायते ।

साहित्यदर्पणग्रन्थनिर्माणे केवलं मम्मटस्य खण्डनमेव नासीत् प्रयोजनं किन्तु एकस्मिन्नेव ग्रन्थे दशरूपकस्य रसमञ्जर्याश्च संग्रहः येन स्यात् इत्यपि । एवं च काव्यशास्त्रे अयमेक एव ग्रन्थः, यथा सर्वामावश्यकतां पूरयेदिति विषयं मनसि निधाय एव अयमासीत् प्रयत्न इति मन्ये ।

श्रीविश्वनाथकविराजस्य समयविषये तु प्रायः विवादो नास्त्येव । यतः दर्पणस्य चतुर्थे परिच्छेदे अस्फुटव्यङ्ग्यस्योदाहरणे "सन्धौ सर्वस्वहरणं विग्रहे प्राण-निग्रहः । अलावद्दीननृपतौ न सन्धिर्न च विग्रहः ।" इति श्लोके 'अलावद्दीन

---

१ श्रीचन्द्रशेखरमहाकविचन्द्रसूनुः श्रीविश्वनाथकविराज इति प्रसिद्धः ।
साहित्यदर्पणममुं सुधियो विलोक्य साहित्यतत्त्वमखिलं सुखमेव वित्त ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

खिलजी इति नाम्ना प्रसिद्धो यवनराजः १३१६ खीस्ताब्दे दिल्लीश्वर एव आसीत्। यश्च विषप्रयोगेण मारितोऽभवत्। एतेन विश्वनाथस्य समयस्त्रयोदशशतकस्यान्तिमः कालः निर्णीयते। १३८४ खीस्ताब्दे लिखितस्य साहित्यदर्पणस्योपलब्ध्या च त्रयोदशशतकस्योत्तरार्धं एव निश्चीयते च।

'आल्वेट वेवर' महाशयास्तु खिस्ताब्दीये पञ्चदशशतके पूर्वङ्गे ब्रह्मपुत्रतटे साहित्यदर्पणो व्यरचीति जगन्मोहनशर्मकृतचण्डकौशिकनाटकभूमिकातोऽवसेयमिति लिखन्ति। तच्च १३८४ खीस्ताब्दीयहस्तलिखितग्रंथावगमेनैव खण्डितं भवति। अतः साहित्यदर्पणस्य कर्ता श्रीविश्वनाथः त्रयोदशशतकस्योत्तरार्द्धे उत्कलदेशे आसीदिति सिद्ध्यति। श्रीविश्वनाथकविराजानां नाम सान्धिविग्रहिक–महापात्रेति पदघटितमेव दृश्यते। तेनानुमीयते यत् कस्यापि राज्ये अयममात्य आसीत्। श्रीविश्वनाथकविराजस्य पूर्वपुरुषाणामुत्कलप्रान्तीयकलिंगराज्यसम्बन्धस्य सत्त्वात् तत्रैवायं सम्बद्ध आसीदिति च मन्यते।

(२) प्रश्नः—काव्यस्य प्रयोजनं प्रतिपाद्य प्रमाणानि दर्शनीयानि॥

उत्तरम्—दुःखजिहासैव प्रवृत्तिं प्रति हेतुः। दुःखनाशश्च मोक्षसम्भवः। मोक्षश्च मोक्षोपयोगिवाक्यजन्यज्ञानेनेति परम्परया काव्यं मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकमिति काव्यस्याध्ययनमावश्यकम्। अत एवोक्तं ग्रन्थकृता—

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्॥' इति।

एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवतीति च श्रुतिः। सम्यग् ज्ञातस्य शब्दस्य श्रीनारायणचरणारविन्दस्तवादिना सुप्रयोगात् धर्मप्राप्तिः सिद्धैव। यथा सूर्यशतकेन आदित्यं प्रसाद्य मयूरस्य कुष्ठनिवृत्तिः।

अर्थप्राप्तिस्तु—श्रीहर्षादिभ्यः धावकादिकवीनां प्रसिद्धैव। कामप्राप्तिस्तु—अर्थद्वारैवेति विदितमेतत्। मोक्षप्राप्तिस्तु—मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकत्वात् सुप्रतीतैव।

उपादेयतायां प्रमाणं च—

'काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः॥' इति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥'

इत्यादिवचनमेव ।

(३) प्रश्नः—वेदादिषु सत्सु चतुर्वर्गफलप्राप्तये काव्यस्य क्रियानुपयोग इति लिखत ।

उत्तरम्—चतुर्वर्गफलप्राप्तये द्वौ पन्थानौ । एकः सरलः अपरश्च कठिनः । तत्र ये परिपक्वबुद्धयः सन्ति तेभ्यो नीरसेभ्यो वेदादिभ्यः शास्त्रेभ्यश्च दुःखादेव चतुर्वर्गफलप्राप्तिर्भवति । किन्तु ये सुकुमारमतयः नीरसानां शास्त्राणां अध्ययने असमर्थाः सन्ति तेभ्यश्चतुर्वर्गफलप्राप्तिर्येन स्यादिति काव्यशास्त्रस्यावतारः । अनेन च काव्यशास्त्रेण कान्तासम्मिततयोपदेशेन परमानन्दसन्दोहजनकतया सुखादेव चतुर्वर्गफलप्राप्तिः ।

न च परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु काव्ये यत्नो न करणीय इति वाच्यम् ? कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्करा-प्रवृत्तिः साधीयसी न स्यात् । अतः परिणतबुद्धिभिरपि 'अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्' इति सूक्तिं 'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्' इति सूक्तिं चानुरुद्ध्य चतुर्वर्गफलप्राप्तये काव्यशास्त्रस्य परिशीलनं कर्तव्यमेवेति दिक् ।

(४) प्रश्नः—श्रीमम्मटभट्टोक्तं काव्यलक्षणं विश्वनाथोक्तदिशा सन्दूष्य तत्र युक्तायुक्तत्वे विचार्येताम् ?

उत्तरम्—'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति काव्यप्रकाशकर्तुराचार्यमम्मटभट्टस्य काव्यलक्षणम् ।

नन्वस्य कोऽर्थः ? यदि दोषरहितो गुणसहितोऽलङ्कारविभूषितः शब्दोऽर्थश्च काव्यम्, क्वचिद् अस्फुटालङ्कारेऽपि न काव्यत्वहानिरित्यर्थः स्वीक्रियते तदा—

'न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः,
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा ।
स्वर्गग्रामटिका-विलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यस्मिन् पद्ये 'उद्देश्यमनुक्त्वैव न विधेयमुदीरयेत्' इति नियमविरुद्धो न्यक्कारपदस्य पूर्वप्रयोगः विधेयाविमर्शदोषं प्रकटयति। येन चास्य काव्यत्वं व्याहतं भवति।

न चेष्टापत्तिरिति वाच्यम्? ध्वनित्वेनोत्तमकाव्यताऽस्य स्वयं स्वीकृतत्वात्। उत्तमकाव्येऽत्र लक्षणस्यासत्वेन अव्याप्तिदोषसत्त्वात्। न च 'न्यक्कारः,' 'वृथोच्छूनैः' इत्यादयः केचनांशा एव दूषिताः न सर्वोऽपीति वाच्यम्? यत्रांशे दोषः स अकाव्यत्वप्रयोजकः यत्र ध्वनिः स उत्तमकाव्यत्वप्रयोजक इत्युभाभ्यामंशाभ्यां आकृष्यमाणमिदं काव्यमकाव्यं वा किमपि न स्यात्। अन्यच्च दोषाः काव्यस्य कंचिदेवांशं न दूषयन्ति अपि तु सर्वमेव काव्यम्। यतो हि दोषा—रसापकर्षकाः। ये न रसापकर्षकास्ते न दोषाः। अत एव दोषाणां नित्यानित्यव्यवस्थापि सिद्ध्यति। एवञ्चादोषशब्दार्थयोरेव काव्यत्वस्वीकारे काव्यं प्रविरलविषयं निर्विषयं वा स्यात्। सर्वथा निर्दोषस्यैकान्तमसम्भवात्। ननु 'अदोषौ' इत्यत्र नञ ईषदर्थे प्रयोग इति चेत्तर्हि निर्दोषयोः काव्यत्वं न स्यात्। सति सम्भवे ईषद्दोषाविति चेत् तदपि न युक्तम्। यतो हि—

'कीटानुविद्धरत्नादिसाधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥'

इत्युक्तदिशा यथा कीटानुविद्धस्य रत्नस्य रत्नत्वं न व्याहन्यते तथैव यत्र रसप्रतीतिरस्ति तत्र दुष्टेष्वपि काव्येषु काव्यत्वं न व्याहन्यत एव।

नन्वत्र दोषपदेन तेषामेव ग्रहणं येषां सद्भावे रसाद्यनुगमो नास्ति। अतः न 'न्यक्कारो ह्ययमेवे'त्यत्र कापि हानिरिति वाच्यम्? अस्तु तर्हि 'शब्दार्थौ सगुणौ' इति कथनस्य तु अयुक्तत्वं सिद्ध्यत्येव। अत्र शब्दार्थयोः सगुणौ इति विशेषणं तच्च न युक्तम्। यतः माधुर्यादिगुणानां रसैकधर्मत्वस्य—'ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः' इत्यादिना काव्यप्रकाशे स्वयं प्रकाशितत्वात्। यदि स्वाश्रयाभिव्यञ्जकत्वरूपपरम्परासम्बन्धेन (स्वं गुणस्तदाश्रयो रसस्तदभिव्यञ्जकः शब्दोऽर्थश्च) शब्दार्थौ सगुणौ तेन शब्दार्थयोरपि सगुणत्वविशेषणमुपपद्यते इति तदपि न सम्यक्। यतो हि काव्यस्वरूपेणाभिमतयोः शब्दार्थयोः रसोस्ति न वा? नास्ति चेत् गुणवत्त्वमपि नास्ति गुणानां रसेन सह अन्वयव्यतिरेकनियतत्वात्। अस्ति चेत् तर्हि कथं नोक्तं रसवन्तौ इति विशेषणम्। न च गुणवत्त्वान्यथानु-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

पपत्त्या एतल्लभ्यते इति वाच्यम्, सरसौ इत्येव वक्तव्ये सगुणौ इति कथनस्य युक्तिविरुद्धत्वात्। नहि प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इति केनापि उच्यते।

ननु शब्दार्थौ सगुणावित्यनेन गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्यावित्यभिप्राय इति चेन्न ? गुणाभिव्यञ्जकशब्दार्थवत्त्वस्य काव्ये उत्कर्षमात्राधायकत्वात् न स्वरूपाधायकत्वम्। उक्तं च—

'काव्यस्य शब्दार्थौ शरीरं, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत् अलङ्काराश्च कटककुण्डलादिवत्।' इति।

उक्तकाव्यलक्षणे 'अनलंकृती पुनः क्वापि' इति यदुक्तं तस्यायमर्थः—सर्वत्र सालंकारौ क्वचित्तु स्फुटालंकारविरहेऽपि न काव्यत्वहानिरिति। यच्चोदाहृतम् 'यः कौमारहरः स एव हि वरः' इत्यादि तत्र विभावनाविशेषोक्तिमूलकस्य सन्देहसंस्कारालङ्कारस्य स्फुटतया प्रतीयमानत्वेन तस्याकिञ्चित्करत्वात्। अन्यच्च सालंकारशब्दार्थयोरपि काव्ये उत्कर्षाधायकत्वमेव न तु स्वरूपाधायकत्वम्।

वस्तुतस्तु 'यः कौमारहरः' इत्यत्र न कश्चन स्फुटोऽलङ्कारः। कारणाभावे कार्योत्पादरूपस्य विभावनालङ्कारस्य न स्फुटता। यतः उत्कण्ठाभावकारणानां भावमुखेनैव वर्णनं नत्वभावमुखेन। एवं कारणसत्त्वे कार्यानुत्पादरूपायाः विशेषोक्तेश्च न स्फुटता। यतः कारणस्य कथनेऽपि कार्यस्य उत्कण्ठारूपस्य न भावमुखेन कथनम्। अत उभयोरस्फुटत्वमेवेति विचारकाः।

(५) प्रश्नः—वक्रोक्तिजीवितकार–भोजदेव–ध्वनिकारोक्तानां काव्यलक्षणानां विश्वनाथोक्तदिशा निराकरणं कृत्वा स्वमतं प्रदर्श्यताम्।

उत्तरम्—काव्यलक्षणविचारप्रस्तावे श्रीवक्रोक्तिजीवितकारैरभिहितं यत् 'वक्रोक्तिः काव्यजीवितमिति' तदपि न विचारसहम्। यतः वक्रोक्तेरलंकाररूपत्वात्। अलंकाराणां चोत्कर्षमात्राधायकत्वात्।

वस्तुतस्तु—वक्रोक्तिजीवितकारस्वीकृता वक्रोक्तिः नालङ्काररूपा। किन्तु काव्यस्य प्राणस्थानीया। प्राणस्य चात्मनः भिन्नत्वात् वक्रोक्तिजीवितकारोक्तमपि सम्यगेव।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

भोजदेवोक्तं काव्यलक्षणन्तु—

अदोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति॥

अयमर्थः—दोषरहितं गुणसहितम् अलंकारयुक्तं रसान्वितं काव्यं कुर्वन् कविः कीर्तिं प्रीतिं च विन्दति।

अत्र विश्वनाथः—दोषरहितस्यैव काव्यत्वे काव्यं प्रविरलविषयं निर्विषयं वा स्यात् सर्वथा निर्दोषस्यैकान्तमसम्भवात्। ईषद्दोषौ इत्यपि न वाच्यम् निर्दोषस्य काव्यत्वं न स्यात्। अतः काव्यलक्षणे अदोषपदं न देयम्। एवं गुणानां रसधर्मत्वात् गुणवत् काव्यस्यासत्त्वात् काव्यलक्षणे गुणवत्त्वविशेषणमपि न देयम्। अलङ्काराणां उत्कर्षाधायकत्वं न तु स्वरूपाधायकत्वं तेन सालङ्कारत्व-विशेषणमपि न देयम्। केवलं रसान्वितं काव्यम् इत्येव काव्यलक्षणं वाच्य-मिति मन्यते।

परे तु उपहसनीयत्वस्यैवात्र दोषपदेन ग्रहणात् अदोषपदमुचितमेव, गुणवत्त्वमपि स्वाश्रयाभिव्यञ्जकत्वसम्बन्धेन शब्दार्थयोरुपचर्यत इति दर्पणकारेणापि स्वीकाराद-दोष एव। कीर्तिप्रीतिवर्धके काव्ये अलङ्कारस्य सत्त्वमपेक्षितमेव यत्र न रसस्य हानिः इति भोजदेवकृतकाव्यलक्षणमपि अनुपहसनीयकाव्यस्यैवेति न कुत्रापि दोष इति वदन्ति।

ध्वनिकारोक्तं काव्यलक्षणन्तु—'काव्यस्यात्मा ध्वनिरिति' अस्यायमर्थः—काव्यस्य ध्वनिः आत्मा इति। अत्र पृच्छ्यते—किं वस्त्वलंकाररसादिलक्षणस्त्रि-रूपो ध्वनिः काव्यस्यात्मा, उत रसादिरूपमात्रो वा। तत्र न प्रथमः—प्रहेलिकादौ (तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः। गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः) इत्यत्र किञ्चिदपूर्णजलकुम्भरूपस्य वस्तुनो ध्वन्यमानत्वेऽपि रसविकल-तया अकाव्येऽपि काव्यत्वप्रसक्त्यातिव्याप्तिः स्यात्। द्वितीयश्चेदोमिति ब्रूमः। रसवत एव काव्यत्वाङ्गीकारात्।

ननु यदि रसादिरूपमात्रो ध्वनिः काव्यस्यात्मा तदा—

'अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि।
मा पहिअ! रत्तिअन्धअ! सज्जाए मह णिमज्जहिसि॥'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यादौ वस्तुमात्रस्य व्यङ्ग्यत्वे कथं काव्यव्यवहार इति चेन्न? आगन्तुके परपुरुषे शृङ्गाराभास एवेति न काव्यत्वहानिः। अन्यथा 'देवदत्तो ग्रामं याति' इति तद्भृत्यस्य तदनुसरणरूपव्यङ्ग्यावगतेरपि काव्यत्वं स्यात्। रसवत एव काव्यत्वाङ्गीकारात्, न केवलव्यङ्ग्यावगतिः काव्यत्वप्रयोजिका इति।

रस एव काव्यस्यात्मा इत्यत्र अग्निपुराणमपि प्रमाणं 'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' इति॥ व्यक्तिविवेककारेणाप्युक्तं यत् 'काव्यस्यात्मनि संगिनि रसादिरूपे न कस्यचिद् विमतिः।' इति।

ननु रसवत एव काव्यत्वस्वीकारे प्रबन्धान्तर्वर्तिनां केषांचन नीरसानां पद्यानां काव्यत्वं न स्यादिति चेन्न। रसवत्पद्यान्तर्गतनीरसपद्यानामपि प्रबन्धरसेन रसवत्ताङ्गीकाराद् इति।

यत्तु नीरसेष्वपि काव्येषु दोषरहितालंकारसहित—गुणाभिव्यञ्जकवर्णसद्भावदशायां काव्यव्यवहारः स तु गौण एव।

यच्च वामनेन 'रीतिरात्मा काव्यस्येत्युक्तं' तन्न, रीतेर्वर्णरचनारूपत्वात्। यच्च ध्वनिकारेणोक्तं 'अर्थः सहृदयश्लाघ्य काव्यात्मा यो व्यवस्थितः। वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ' इति तच्च काव्यस्यात्मा ध्वनिरिति स्ववचनविरोधादेवापास्तम्।

वस्तुतस्तु नानेन काव्यस्य वाच्यात्मत्वं व्यवस्थाप्यते किन्तु काव्यस्य भेदमेवाभिधत्ते। तेन यः प्रतीयमानोंऽशः स काव्यात्मत्वेन प्रसिद्धः ध्वनिरूपः इति न स्ववचनविरोध इति बोध्यम्।

(६) प्रश्न :—विश्वनाथोक्तं काव्यलक्षणं साटोपं व्याख्याय तस्य युक्तायुक्तत्वे विवेचनीये?

उत्तरम्—ननु सर्वेषां काव्यलक्षणानामव्याप्त्यादिदोषग्रस्तानां न काव्यलक्षणत्वं सम्भवति। अतः काव्यलक्षणं किमिति चेत् श्रूयताम्—'वाक्यं रसात्मकं काव्यमिति' रस एव आत्मा साररूपतया जीवनाधायको यस्य तद् वाक्यं काव्यमित्यर्थः। रसेन विना वाक्यस्य काव्यत्वमेव न स्वीक्रियते, अन्यथा—'देवदत्तो ग्रामं याति' इत्यत्र तद्भृत्यानुसरणरूपव्यंग्यस्यापि काव्यत्वं स्यात्। रस पदस्य च रस्यते इति रस इति व्युत्पत्तिः। तेन य आस्वाद्यते स रस इति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

सिद्धम्। ततश्च रस–रसाभास–भाव–भावाभासादीनामपि ग्रहणम्। यत्र वाक्ये न रसः न तत् काव्यमिति विश्वनाथः।

वस्तुतस्तु वाक्यं रसात्मकं काव्यमिति लक्षणे रसात्मकमित्यत्र रस एव आत्मा यस्येति बहुव्रीहिः। बहुव्रीहिश्चान्यपदार्थप्रधानः। अत्रान्यपदार्थश्च वाक्यमेव। वाक्यं च शब्दविशेष एव। अतः शब्दविशेषः काव्यमिति यातम्। शब्दश्च आकाशगुणः। तत्र रसोऽस्ति न वा। अस्ति चेत् 'सत्त्वोद्रेकादखण्डस्व-प्रकाशानन्दचिन्मयः' इत्युक्तदिशा ज्ञानस्वरूपस्य आत्मस्वरूपस्य वा रसस्य आकाशगुणे शब्दे लेशोऽपि नास्ति।

नास्ति चेत्—कथमुक्तं रसात्मकमिति। यदि रसप्रकाशकतावच्छेदकार्थप्रति-पादकतावच्छेदकतासम्बन्धेन उपचर्यते तदिति उच्यते तर्हि प्रकाशलक्षणे सगुणा-विति विशेषणेन किमपराद्धम्।

एवं च रसात्मकमिति कथनमप्यसंगतम्, नीरसेऽपि चमत्कारिणि वस्त्वलं-कारव्यंजके शब्दार्थयुगले काव्यंत्वस्याभियुक्तैः स्वीकारात्। यदुक्तं ध्वनिकृता—

व्यज्यन्ते वस्तुमात्रेण यदालंकृतयस्तदा।
ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयात्। इति।

अतः काव्यप्रकाशकृतोक्तं काव्यलक्षणमेव युक्तमिति गुरवः॥

(७) प्रश्नः—गुणानां रसधर्मत्वात् रसात्मकस्य वाक्यस्य काव्य-त्वात् कथं गुणाः काव्यस्योत्कर्षहेतव इति प्रतिपाद्यताम्?

उत्तरम्—ननु यथा निरलंकारकाव्यापेक्षया सालंकारकाव्यस्योत्कृष्टता न तथा निर्गुणकाव्यापेक्षया सगुणकाव्यस्योत्कृष्टता वक्तुं शक्यते। यतः गुणानां रसैक-धर्मत्वात् निर्गुणानां च नीरसत्वात् नीरसानां चाकाव्यत्वमेवेति गुणाः काव्यस्यो-त्कर्षका इति कथनमसंगतमिति चेन्न? यद्यपि गुणाः रसस्य धर्माः, रसेन विना न तेषां स्थितिस्तथापि अत्र गुणपदं लक्षणया गुणाभिव्यञ्जकशब्दार्थपरम्। अतोऽत्र 'गुणाभिव्यञ्जकाः शब्दाः रसस्योत्कर्षकाः' इत्युक्तं भवतीति दिक्।

(८) प्रश्नः—वाक्यं स्याद्योग्यतेत्यादिकारिका साधु व्याख्येया?

उत्तरम्—वाक्यं काव्यमित्युक्तं तत्र किं नाम वाक्यमिति जिज्ञासायामुच्यते—

वाक्यं स्याद् योग्यताकांक्षासत्तियुक्तः पदोच्चय इति। तत्र—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

योग्यता—'पदार्थानां परस्परसम्बन्धे बाधाभावः' एकपदार्थस्यापरपदार्थ-सम्बन्धे बाधाभाव एव योग्यता। यथा 'गामानय' इत्यत्र गोपदार्थस्य आनय-पदार्थेन सह यः सम्बन्धः स बाधितो न वर्तते इति योग्यतायाः सत्त्वाद्वाक्यत्वं भवति। न च बाधसत्त्वेऽपि यत्र पदार्थानां परस्परं सम्बन्धो वर्तते तत्रापि वाक्यत्वं स्यादिति वाच्यम्, तथा सति 'वह्निना सिञ्चति' इत्यस्यापि वाक्यत्वं स्यात्। नहि अग्निः सेचनक्रियायां समर्थोऽपि तु दहनक्रियायां समर्थः। अतः नेदं वाक्यम्।

आकांक्षा—एकपदार्थस्यापरपदार्थेन सहान्वयापेक्षा आकांक्षा। सा च श्रोतुः जिज्ञासारूपा यथा 'देवदत्तो ग्राममित्यत्र गच्छतीतिपदस्य। निराकांक्षस्य वाक्यत्वे 'गौः, अश्वः, पुरुषो, हस्ती' इति परस्परं निरपेक्षस्य पदसमूहस्यापि वाक्यत्वं स्यात् अत्राभेदातिरिक्तसम्बन्धे बाधसत्त्वेऽपि सत्त्वादिसम्बन्धेन बाधविरहरूपयोग्यता अस्ति।

आसत्तिः—यत्पदार्थस्य यत्पदार्थेन सह सम्बन्धापेक्षा तेन सह तस्य अव्य-वधानेन स्थितिः आसत्तिः। व्यवहितेऽपि वाक्यत्वे इदानीमुच्चरितस्य देवदत्त इतिशब्दस्य दिनान्तरोच्चारितेन 'गच्छतीति' पदेन संगतिः स्यात्। किन्तु ईदृशेन पदसमूहेन न भवति बोध इति नात्रासत्तिः, न च वाक्यत्वम्।

व्यवधानं च द्विविधम्। एकं कालव्यवधानमपरं अनुपयुक्तपदार्थानां सत्त्वम्। तत्र कालव्यवधानस्योदाहरणम्—पूर्वमुक्तम्। द्वितीयस्य तु 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इति, अत्र 'गिरिरग्निमान्, देवदत्तेन भुक्तमिति' सम्बन्धः।

(९) प्रश्न :—आकांक्षायोग्यतयोरात्मधर्मत्वेऽपि पदोच्चयधर्मत्वमुप-चाराद् इयं पंक्तिः व्याख्येया।

उत्तरम्—ननु आकांक्षायाः जिज्ञासारूपत्वात्। जिज्ञासा च श्रोतुरिच्छा इच्छायाश्चात्मधर्मत्वात् कथं पदोच्चयधर्मत्वम्। एवं योग्यता यदि विपरीतबुद्ध्य-भावरूपा तदा आत्मनिष्ठतया अन्वयबोधहेतुत्वात् तस्या आत्मवृत्तित्वमेव, यदा एकपदार्थीयापरपदार्थसद्भावरूपता तदा पदार्थधर्मत्वम् इति कथं पदोच्चयधर्मत्व-मनयोरिति चेन्न ? आत्मधर्मयोः आकांक्षायोग्यतयोः स्वजन्यजनकत्वरूपपरम्परा-सम्बन्धेन पदोच्चयधर्मत्वम्। समन्वयश्च—स्वमाकाङ्क्षा योग्यता च तज्जन्यः वाक्यार्थस्तज्जनकश्च पदसमूह इति रीत्या। यदि योग्यतायाः पदार्थधर्मत्वं तदा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

तस्याः स्वाश्रयोपस्थापकत्वसम्बन्धेन पदोच्चयधर्मत्वं स्वीक्रियते। समन्वयश्च स्वं योग्यता तदाश्रयः पदार्थस्तदुपस्थापकः पदसमूह इति रीत्येति न दोषः॥

(१०) प्रश्नः—साहित्यिकाः कुत्र शक्तिग्रहं मन्यन्ते कुत्र नेति यथाशास्त्रं वर्णयत ?

उत्तरम्—ननु शब्दाः चतुर्विधाः, जातिशब्दाः, गुणशब्दाः क्रियाशब्दाः, द्रव्य (यदृच्छा) शब्दाश्च। 'चतुष्टयी शब्दानां प्रवृत्तिरिति च भाष्यम्' तत्र गोपिण्डादिषु गोत्वादिका जातिः। वस्तुधर्मः द्विविधः-एकः सिद्धः, अपरः साध्यः। तत्र विशेषाधानहेतुः सिद्धो वस्तुधर्मः गुणशब्दः, यथा शुक्लः। साध्यो वस्तुधर्मः पाकादिक्रियारूपः, चुल्युपरिधारणात् अधःश्रयणपर्यन्तपूर्वापरीभावरूपः। द्रव्यशब्दस्तु यदृच्छाशब्दः, यथा हरि-हर-डित्थ-डवित्थादयः। एतेषु शब्देषु मध्ये बालः उत्तमवृद्धवाक्यस्मरणपूर्वकमध्यमवृद्धप्रवृत्तिमुपलभ्य कुत्र संकेतग्रहं करोति इति चेत् श्रूयताम्?—

एषु चतुर्षु उपाधिषु संकेतो गृह्यते। न व्यक्तौ, व्यक्तौ संकेतग्रहस्वीकारे आनन्त्यं व्यभिचारश्च स्यात्।

अयमर्थः—उपाधिषु शक्तिग्रहस्वीकारे एकस्मिन् गवि शक्तौ गृहीतायां सर्वत्र कार्यं चलति। सामान्यलक्षणासन्निकर्षेण सर्वेषां बोधश्च भवति। यदि व्यक्तौ शक्तिग्रहः स्वीक्रियते तदा अयं प्रश्नः जागर्ति यत् एकस्यां व्यक्तौ शक्तिग्रहो भवति, उत सर्वस्याम्। तत्र न प्रथमः पक्षः अनन्तशक्तिकल्पनागौरवात्, एकत्र शक्तिग्रहे अपरत्र उपस्थित्यभावात् शाब्दबोध एव न स्यात्, पदार्थोपस्थितौ च शक्तिग्रहस्य कारणत्वात्। न च एकस्यां व्यक्तौ शक्तिग्रहे अन्यासां शक्तिग्रहं विनैवोपस्थितिरिति वाच्यम्। शक्तिग्रहं विना पदार्थोपस्थितौ स्वीकृतायां कारणाभावे कार्योत्पादरूपव्यभिचारदोषापातात्। एवं च गोशब्देन अश्वादीनामुपस्थितिरपि स्यात्। अतो न प्रथमः। नापि द्वितीयः—भूत-भविष्यद्-वर्तमानानां समस्तव्यक्तीनामेकस्मिन् कालेऽनुपस्थानात् शक्तिग्रहासम्भवदिति दिक्।

(११) प्रश्नः—रूढिं प्रयोजनं विनापि लक्षणालक्षणे दोषोऽस्ति न वेति युक्त्या विविच्यात्र दण्डचक्रन्यायेन कारणता उत तृणारणिमणिन्यायेन कारणतेति प्रतिपाद्यताम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उत्तरम्—ननु 'मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते । रूढेः प्रयोजनाद्वासौ लक्षणाशक्तिरर्पिता' इति लक्षणाप्रतिपादकं सूत्रम् । अत्र 'यया अन्योऽर्थः प्रतीयते सा लक्षणा इति लक्षणम् । मुख्यार्थबाधः, मुख्यार्थयोगः, रूढिप्रयोजनान्यतरच्चेति त्रयं हेतुः । अत्र लक्षणे अन्यपदस्य न मुख्यार्थभिन्नोऽर्थः किन्तु शक्यतावच्छेदकातिरिक्तधर्मावच्छिन्नः । तेन मुख्यार्थान्वयबोधबाधनिबन्धनत्वे सति रूढिप्रयोजनान्यतरप्रयोज्यशक्यार्थसम्बन्धवत् तदतिरिक्तार्थप्रतिपादकशक्तित्वं लक्षणात्वम्, अत्र रूढिप्रयोजनान्यतरत्वानिवेशेपि 'कलिंगः साहसिकः' इत्यादौ कार्यनिर्वाहः स्यादेवेति चेन्न ? कमलेचरणाघातं मुखं सुमुखि ! तेऽकरोदित्यत्र रूढिप्रयोजनयोरभावेऽपि चरणाघातपदेन निर्जितत्वलक्षणाद् अतिव्याप्तिः स्यादिति तन्निवेशः । इदं नेयार्थतादोषस्योदाहरणम् ।

नचात्र मुख्यार्थबाधःमुख्यार्थयोगः रूढिप्रयोजनयोरन्यतरच्चेत्ति हेतुत्रयं वर्तते । तत्र तृतीयहेतोः कारणता दण्डचक्रन्यायेन तृणारणिमणिन्यायेन वेति वाच्यम् ? अत्र तृणारणिमणिन्यायेन कारणता । यथा अग्निं प्रति तृणम् अरणिः मणिश्च पृथक् पृथक् कारणं तथैव रूढिः पूर्वहेतुद्वयसंयुक्तः पृथक् हेतुः प्रयोजनं च तद्युक्तम् पृथग् हेतुः । किन्तु मुख्यार्थबाधादित्रयाणां हेतुत्वं तु दण्डचक्रन्यायेनैव । अत एव काव्यप्रकाशे मुख्यार्थबाधादित्रयं हेतुरित्येकवचनेन त्रयाणां समुदितानामेव हेतुत्वं प्रतिपादितम् ।

(१२) प्रश्नः—उपादानलक्षणाया लक्षणलक्षणातो वैलक्षण्यमुदाहरणद्वारास्फोरणीयम् ।

उत्तरम्—न च लक्षणा द्विविधा-एका लक्षणलक्षणा अपरा उपादानलक्षणेति, तत्र को भेद इति वाच्यम् । यत्र मुख्यार्थविशिष्टतदितरार्थप्रतिपादकशब्दत्वम्, तत्र उपादानलक्षणा अत एव अजहत्स्वार्था इति चोच्यते । एवं स्वार्थपरित्यागपूर्वकांऽन्यार्थप्रतिपादकशक्तित्वं लक्षणलक्षणात्वम् । उपादानलक्षणाया उदाहरणम्—कुन्ताः प्रविशन्ति । अत्र अचेतनस्य कुन्तस्य प्रवेशनक्रियासामर्थ्यं नास्ति इति कुन्तरूपमुख्यार्थविशिष्टकुन्तधारिपुरुषस्य मुख्यार्थेतरार्थस्य प्रतिपादकत्वात् 'कुन्तधारिपुरुषाः प्रविशन्ति' इति लक्षणया अर्थो बोध्यते ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

लक्षणलक्षणाया उदाहरणम्—गङ्गायां घोषः, विपरीतलक्षणाया उदाहरणम्। उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।

विदधदीदृशमेव सदा सखे! सुखितमास्व ततः शरदां शतम्॥

इत्यत्र उपकृतादयः शब्दा अपकारिणं प्रति अन्वयमलभमानाः अपकारादिरूपेऽर्थे परिणताः। अयमेव उपादानलक्षणालक्षणलक्षणयोर्भेदः। यद् उपादानलक्षणायां मुख्यार्थस्यात्मनोप्युपादानम्। लक्षणलक्षणायां तु परस्यैवोपलक्षणं, मुख्यार्थस्य त्यागश्चेति।

(१३) प्रश्नः—काव्यप्रकाशोक्तं "कर्मणिकुशलः" इति लक्षणोदाहरणं दर्पणोक्तदिशा खण्डनीयम्?

उत्तरम्—ननु काव्यप्रकाशप्रकरणे रूढौ लक्षणायामुदाहृतम्। यत्—कर्मणि कुशल इत्यत्र कुशलशब्दः कुशान् दर्भान् लाति आदत्ते इति व्युत्पत्त्या कुशग्राहिरूपार्थे शक्तः। दक्षरूपेऽर्थे तु लाक्षणिकः। यतः यः मुख्योऽर्थः स प्रकृतेऽसम्भवन् विवेचकत्वादिसाधर्म्यसम्बन्धसम्बन्धिनं दक्षरूपमर्थं बोधयति इति चेन्न! कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात्। शब्दानामन्यत् प्रवृत्तिनिमित्तम्, अन्यद्धि व्युत्पत्तिनिमित्तम्। यदि व्युत्पत्तिलभ्य एव मुख्योऽर्थस्तदा गौः शेते इत्यत्रापि लक्षणा स्यात्। यतो हि गमेर्डोः (उणादिसूत्र २।६७) इति सूत्रेण गम्धातोर्डोप्रत्यये कृते निष्पन्नस्य गोशब्दस्य शयनकालेऽप्रयोगात्। यदि व्युत्पत्तिरेव प्रवृत्तिनिमित्तमिति मन्यते तदापि 'कुशल' इत्यत्र न निर्वाहः। कौ भुवि लशति चालयति कार्याणि इति कुशलशब्दस्य व्युत्पत्त्या दक्षरूपोऽर्थः गम्यत एवेति न लक्षणावसर इति दिक्।

(१४) प्रश्नः—लक्षणायाः प्रयोजनं सोदाहरणमभिधाय कतिप्रकारा च सेति लिख्यताम्?

उत्तरम्—अभिधाख्यया शक्त्या यद् बोध्यते स मुख्योऽर्थः। तस्य बाधे जाते अन्वयस्यानुपपत्तौ रूढिवशात् कस्यापि प्रयोजनस्य सिद्धयै वा मुख्यार्थसम्बद्धस्यैव अन्यार्थस्य ज्ञानं यया शक्त्या भवति सा लक्षणा नाम। अत्र अन्यपदस्य न मुख्यार्थभिन्नोऽर्थः। किन्तु मुख्यार्थतावच्छेदकातिरिक्तधर्मावच्छिन्नः। तेन 'काकेभ्यो दधिरक्ष्यतामित्यत्रोपादानलक्षणोदाहरणे मुख्यार्थतावच्छेदकं काकत्वं,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदन्यो धर्मः दध्युपघातकत्वं तदवच्छिन्ने काकशब्दस्य लक्षणा। एवं रामोऽस्मि सर्वं सहे इत्यत्रापि मुख्यार्थतावच्छेदकं रामत्वं तदन्यो धर्मः दुःखसहिष्णुत्वं तदवच्छिन्ने रामशब्दस्य लक्षणा सिद्ध्यति।

यदि मुख्यार्थभिन्नोऽर्थः अन्यशब्दार्थः स्यात्तदा उपादानलक्षणायां लक्षणायाः सामान्यलक्षणस्य प्रवेश एव न स्यात्। अत्र स्वार्थस्यापि प्रवेशात्। सा च लक्षणाख्या शक्तिः कल्पिता, न तु ईश्वरोद्भाविता। तस्याञ्च लक्षणायां मुख्यार्थबाधः, मुख्यार्थयोगः, रूढिप्रयोजनयोरन्यतरच्च हेतुः। यथा 'कलिंगः साहसिकः इत्यत्र कलिंगशब्दः देशविशेषरूपे स्वार्थेऽसम्भवन् यया शब्दशक्त्या स्वसंयुक्तान् पुरुषान् प्रत्याययति यया च 'गङ्गायां घोषः' इत्यादौ गङ्गादिशब्दो जलवदादिरूपार्थवाचकत्वात् प्रकृतेऽसम्भवन् स्वस्य सामीप्यादिसम्बन्धसम्बन्धिनं तटादि बोधयति सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता शक्तिः लक्षणा नाम। सा च उपादानलक्षणा लक्षणलक्षणाचेति भेदेन द्विविधा। एता अपि सारोपसाध्यवसानभेदेन द्विधा एवं च शुद्धागौणीभेदेन ता अपि द्विविधा, एवं संकलनया षोडशभेदा लक्षणा यथा—

१	सारोपा उपादान लक्षणा रूढिः	अश्वः श्वेतो धावति
२	,, ,, प्रयोजनवती	एते कुन्ताः प्रविशन्ति
३	,, लक्षणलक्षणा रूढिः	कलिंगः पुरुषो युध्यते
४	,, प्रयोजनवती	आयुर्घृतम्
५	साध्यवसाना उपादानलक्षणा रूढिः	श्वेतो धावति
६	,, ,, प्रयोजनवती	कुन्ताः प्रविशन्ति
७	,, लक्षणलक्षणा रूढिः	कलिंगः साहसिकः
८	,, ,, प्रयोजनवती	गङ्गायां घोषः
९	गौणी सारोपा उ० ल० रूढिः	एतानि तैलानि हेमन्ते सुखानि
१०	,, ,, ,, प्रयोजनवती	एते राजकुमाराः गच्छन्ति
११	,, ,, लक्षणलक्षणा रूढिः	राजा गोडेन्द्रं कण्टकं शोधयति
१२	,, ,, ,, प्रयोजनवती	गौर्वाहीकः
१३	गौणी साध्यवसाना उ० ल० रूढिः	तैलानि हेमन्ते सुखानि
१४	,, ,, ,, प्रयोजनवती	राजकुमाराः गच्छन्ति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

१५	गौणी साध्यवसाना लक्षणलक्षणा रूढिः			राजा कण्टकं शोधयति
१६	,,	,,	,, प्रयोजनवती	गौर्जल्पति

एवं प्रयोजनवती अष्टप्रकारा लक्षणा—गूढव्यङ्ग्याऽगूढव्यङ्ग्यभेदेन द्विविधा एवम् एषैव धर्मिगता धर्मगता चेति पुनः द्विविधा इति संकलनया द्वात्रिंशद्भेदा प्रयोजनवती। रूढिस्तु अष्टप्रकारा इति प्रयोजनवत्या सह चत्वारिंशत्प्रकारा। एताः पदगतत्वेन वाक्यगतत्वेन च द्विविधा इति अशीतिप्रकारा लक्षणा।

(१५) प्रश्नः—'गौर्वाहीकः' इत्यत्र का नाम लक्षणा कुत्र च सा इति विशदं विविच्यताम्।

उत्तरम्—ननु 'गौर्वाहीकः' इत्यत्र गोवर्तिनो ये जाड्यमान्द्यादयो गुणास्ते लक्षणया बोध्यन्ते। ते च गुणाः गोशब्दद्वारा अभिधया वाहीकार्थाभिधाने निमित्ती भवन्ति इति चेन्न ? गोशब्दस्यागृहीतसंकेतस्य वाहीकार्थाभिधानेऽसामर्थ्यात्। अभिधायाः गोशब्दमात्रबोधनविरतायाः पुनः उत्थानासम्भवाद्, शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति नियमात्।

अन्ये तु—गोशब्देन न वाहीकार्थोभिधीयते किन्तु स्वार्थवृत्तिगुणसाजात्येन वाहीकार्थगुणा एव लक्ष्यन्ते इति वदन्ति। तदपि अन्ये न सहन्ते। तथाहि 'गौर्वाहीकः' इत्यत्र गोशब्दात् वाहीकार्थः प्रतीयते न वा। प्रतीयते इति चेत्, गोशब्दादेव, लक्षिताद्वा गुणात् अविनाभावद्वारा। तत्र न प्रथमः। यतः वाहीकार्थस्यासंकेतितत्वात्। न द्वितीयः। अविनाभावलभ्यस्यार्थस्य शाब्देऽन्वये प्रवेशासम्भवात्। 'शाब्दीभावना (आकाङ्क्षा) शब्देनैव प्रपूर्यते' इति नियमात्। न द्वितीयः यदि हि गोशब्दात् वाहीकार्थो न प्रतीयते। तदा वाहीकशब्दस्य तेन सामानाधिकरण्यमसंगतं स्यात्। तस्मात् गोशब्दो मुख्यया वृत्त्या वाहीकार्थं लक्षयति। वाहीकस्याज्ञत्वाद्यतिशयबोधनं प्रयोजनम्। इयं च गुणयोगाद् गौणी इत्युच्यते। पूर्वा तु अश्वः श्वेतो धावति इत्युदाहृता उपचारमिश्रणात् शुद्धैव। 'अग्निमाणवकयोरिति' शुक्लपटयोस्तु नात्यन्तभेदप्रतीतिरिति शुद्धैव लक्षणेति दिक्॥

(१६) प्रश्नः—व्यञ्जनायाः क उपयोगः कतिविधा चेति सेति विविच्यताम्?

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उत्तरम्—स्वमर्थं बोधयित्वा विरतासु अभिधा-लक्षणा-तात्पर्याख्यासु वृत्तिषु यया अन्योऽर्थः बोध्यते सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च शक्तिः व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम ।

न च अभिधया, लक्षणया, तात्पर्याख्यया वा वृत्त्या अन्यार्थस्य (व्यङ्ग्यार्थस्य) प्रतीतिः कथं न स्वीक्रियत इति वाच्यम् । 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति नयेन स्वमर्थं बोधयित्वा क्षीणानां तासाम् अन्यार्थबोधने असामर्थ्यात् ।

सा च व्यञ्जना शाब्दी–आर्थी–भेदेन द्विविधा । तत्र शाब्दी व्यञ्जना (१) अभिधामूला–(२) लक्षणामूला–भेदेन द्विविधा ।

अभिधामूला व्यञ्जना तु यत्र संयोगो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः । सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ।। इत्यादिना अनेकार्थानां शब्दानां एकस्मिन्नर्थे उपयुक्तत्वात् निर्णयः जातस्तत्रापि यया अन्यार्थस्य प्रतीतिस्सा इति ।

यत् प्रयोजनमुद्दिश्य लक्षणायाः स्वीकारस्तस्य प्रयोजनस्य प्रत्यायिका या व्यञ्जना सा लक्षणामूला ।

आर्थी व्यञ्जना च—वक्तृबोद्धव्ययोः वाक्य–वाच्या–न्यसन्निधीनां तथा–प्रस्ताव–देश–कालादीनां वैलक्षण्येन ज्ञायमानस्यार्थान्तरस्य बोधिका भवति ।

इयमपि वाच्य–लक्ष्य–व्यङ्ग्यानां त्रैविध्यात् त्रिविधा भवति । तथा च वाच्यार्थव्यञ्जना, लक्ष्यार्थव्यञ्जना, व्यङ्ग्यार्थव्यञ्जना च इति त्रिविधा आर्थीव्यञ्जना इति बोध्यम् ।।

(१७) प्रश्नः—'स्वरः काव्यमार्गे न गण्यते' इत्यत्र कः पक्षः भवद्भ्यो रोचते ? कथं चेति लिख्यताम् ?

उत्तरम्—ननु काव्यमार्गे काक्वादिरूपः स्वरोपि विशेषप्रतीतिकृदेव । 'उदात्तादयः स्वराः भरताचार्यमतेन शृंगारादिरसस्य प्रत्यायकाः' इति नाट्यशास्त्रे लिखितमप्यस्ति । अतः स्वरस्यापि उदाहरणमावश्यकमेवेति चेन्न ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

स्वराः काक्वादय उदात्तादयो वा व्यङ्ग्यार्थप्रत्यायने एव निमित्तीभवन्ति। न खलु प्रकृतोक्तमनेकार्थस्यैकार्थनियन्त्रणरूपं विशेषणम्।

न च यत्र क्वचिदनेकार्थशब्दानां प्रकरणादिनियमाभावादनियन्त्रितयोरप्यर्थयोरनुरूपस्वरवशेनैकत्र नियमनं वाच्यम्, अन्यथा तथाविधस्थले श्लेषालंकारविलयप्रसंगः स्यात्। तत्र श्लेषस्तु स्वीक्रियत एव।

अतएव श्लेषप्रस्तावनायामुक्तं यत्—'काव्यमार्गे स्वरो न गण्यते इति यतः स्वरभेदे अर्थभेदः, अर्थभेदे च शब्दभेदः। अतः काव्ये स्वराणां न गणनेति सिद्धम्।

(१८) प्रश्नः—तात्पर्याख्यवृत्तिस्वीकारे का वाचोयुक्तिः? साहित्यिकास्तां स्वीकुर्वन्ति न वा?

उत्तरम्—ननु अभिधायां लक्षणायां च स्वं स्वमर्थं बोधयित्वा विरतायां पदार्थानाम् अन्वयबोधिका वृत्तिः का इति चेत् अत्र ये अभिहितान्वयवादिनो नैयायिकाः भाट्टमीमांसकाश्च, तेषामयमभिप्रायः—लाघवात् पदानां पदार्थमात्रे शक्तिः, नत्वन्वयांशेऽपि गौरवादन्यलभ्यत्वाच्च। तदंशो हि तात्पर्यार्थो वाच्याद्यर्थविलक्षण-शरीर आकाङ्क्षायोग्यतासन्निधिवशात् अपदार्थोऽपि प्रतीयते। न चापदार्थविषयस्यापि शाब्दबोधविषयत्वे कथंचिदुपस्थितस्य गगनादेरपि तद्विषयत्वापत्तिरिति वाच्यम्। अपदार्थविषयत्वस्य शाब्दबोधविषयतायामप्रयोजकत्वात्।

अयं भावः—घटं करोति इत्यादौ घटवृत्तिकर्मत्वानुकूला कृतिरित्यर्थो बोध्यते। तत्र घटपदस्य घटोऽर्थः, अम्प्रत्ययस्य च कर्मता, वृत्तिता तु न कस्यापि इति अपदार्थोऽपि वृत्तिता तात्पर्यवशादनयोः संसर्गविधया भासते इति। अत्र अन्विताभिधानवादिनः प्राभाकराः—अन्वयरूपे वाक्यार्थे पदानां शक्तिः व्यवहारेणान्वितस्यैवोपस्थापनात् तत्रैव शक्तिग्रहात्। तथाहि—'देवदत्त, गामानय' इत्युत्तमवृद्धवाक्यश्रवणानन्तरं मध्यमवृद्धे सास्नादिमतीं व्यक्तिं संचारयति सति मध्यमवृद्धचेष्टया उत्तमवृद्धोच्चरितस्य वाक्यस्य तदर्थबोधकतामनुमाय पश्चात् गां नय, अश्वमानय, इति प्रयोगे गवापसरणमश्वाहरणं च दृष्ट्वा अन्वयव्यतिरेकाभ्यां क्रियापदार्थान्विते कारके कारकपदस्य, कारकपदार्थान्वितायां क्रियायां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च क्रियापदस्य शक्तिं बालोऽवधारयति । ततः प्रयोगकाले तस्य प्रथमत एवान्विते बुद्धिर्जायते ।

न च गौरवेणान्वयांशपरिहारः । प्रथमगृहीतान्वयशक्तेरुपजीव्यत्वेन तदपरित्यागात् । शाब्दबोधे तु आकांक्षादिवशात् वृत्तितादिविशेषरूपमेव भासते इति नापदार्थो वाक्यार्थ इति वदन्ति ।

वस्तुतस्तु अत्र मते अन्वितत्वेन शक्तावपि अन्वयविशेषावगमाय आकांक्षादिकं कारणमवश्यमंगीकर्तव्यम् । एवं च विशेषाकारेण अशक्यस्यैव भानमिति तैरप्यवश्यमभ्युपेयम् ।

साहित्यिकाः भाट्टमतमेव स्वीकुर्वन्ति । यद्यपि कुत्रापि विशिष्योल्लेखस्तु नास्ति तथापि काव्यप्रकाशे रसप्रस्तावे शङ्कुकादीनाम् एकवचनेन, अभिनवगुप्तपादाचार्याणां च बहुवचने निर्देशाद् इयं रीतिः प्रकटिता यत् "यस्य मतस्य स्वीकृतिस्तस्य बहुवचनेन नामग्रहणम् ।" एवमेवात्र इत्यभिहितान्वयवादिनां मतम् इति, इत्यन्विताभिधान वादिनो मतमिति च एकवचनेन कथनात् ज्ञायते यत् काव्यप्रकाशकाराणां भाट्टमतमेवाभिमतमिति ।

एतेनेदं सिद्धम् यत् साहित्यिकानां मते तात्पर्याख्यवृत्तिप्रतिपाद्यः तात्पर्यार्थोऽपि अस्ति ।

अत एव साहित्यदर्पणे केवलं तात्पर्याख्यायाः वृत्तेः स्वरूपं प्रदर्श्य तत्र किमपि नोक्तं ग्रन्थकृता । इति शम् ।

(१६) प्रश्नः—रसस्य स्वप्रकाशत्वमखण्डत्वं च यथा सिद्ध्यति तथोपपाद्य रसानुभूतिः क्वेति प्रतिपाद्य–च 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति भरतमहर्षिप्रोक्तं लक्षणं व्याख्याय साधु संगमनीयम् ?

उत्तरम्—ननु रसात्मकवाक्यस्य काव्यत्वमुक्तम् । तत्र को रस इति जिज्ञासायामाह—'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति । अस्यायमर्थः—स्थायिनां विभावादिभिः समं व्यङ्ग्यव्यञ्जकभावरूपात् सम्बन्धात् विभावादीनां परस्परं संयोगात् मिलनात् रसस्य निष्पत्तिरभिव्यक्तिः । तथाहि लोके प्रमदादिभिरालम्बनकारणैश्चन्द्रिकादिभिरुद्दीपनकारणैरश्रुपातादिभिः कार्यैश्चिन्ता-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

दिभिः सहकारिभिः उत्कण्ठादिभिश्च स्थायिनो रत्यादेरनुमितिविषये परिशीलन-बलेन झटिति प्रवृत्तिमतां सामाजिकानां वासनारूपतयान्तः स्थितः, काव्ये नाट्ये च गुणालंकारयोगेन कायिकवाचिकसात्त्विकाहार्यरूपेणाभिनयेन च तैरेव कारण-त्वादिव्यपदेशपरित्यागेन विभावनानुभावनसंचारणरूपव्यापारवत्तया अलौकिक-विभावानुभावसंचारिपदव्यवहार्यैः-ममैवैते, शत्रोरेवैते, इत्यादि-सम्बन्धविशेष-स्वीकारनियमस्य, न ममैवैते न शत्रोरेवैते इत्यादि-सम्बन्धविशेषपरिहारनियमस्य चाज्ञानात्सीतात्वादिविशेषणमपहाय कामिनीत्वेन प्रतीतैः अभिव्यक्तो रत्यादि स्थायी तत्तदात्मनिष्ठोऽपि साधारणीकरणात् रसानुभवकाले विगलितनिजधर्मतया प्रादुर्भूतेतरज्ञानशून्यापरिमितभावेन सहृदयेन साधारण्येन स्वाकार इवाभिन्नोऽपि प्रत्यक्षीकृतः चर्व्यमाणतैकप्राणः विभावादिप्रतीतिकालमात्रस्थायिकः पानकर-सन्यायेन चर्व्यमाणः ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारा-दिको रसः। तत्रास्ति क्रमः किन्तु आशुतरत्वात् न लक्ष्यते।

न च यदि मिलिता रत्यादयो रसास्तर्हि रसस्य स्वप्रकाशत्वम् अखण्डत्वं च केन सिद्ध्यतीति। यतो हि स्वप्रकाशता च ज्ञाने भवति, न रत्यादिषु, रत्या-दीनां संमिश्रितत्वाच्च रसस्य सखण्डता सिद्ध्यति इति वाच्यम्? रसस्योत्पत्ति रत्यादिज्ञानरूपादेव भवति। अर्थात् रत्यादिज्ञानस्वरूपं रसः। ज्ञानस्य स्वप्रका-शता अखण्डता च सिद्धैव। अतः रसोऽपि स्वप्रकाशः, अखण्डश्च सिद्ध्यति रसस्य स्वप्रकाशता अखण्डता च तदा असिद्धा भवेत् यदा रत्यादेः प्रकाश-शरीरता अर्थात् ज्ञानरूपता न स्वीक्रियेत। अत्र तु ज्ञानेन सह रत्यादेः तादा-त्म्यं (अभेदः) सम्बन्धः।

न चानयोस्तादात्म्यसम्बन्धे किं मानमिति वाच्यम्। यद्यपि रसानन्यतया चर्वणापि न कार्या तथापि कादाचित्कतया कार्यत्वमुपकल्प्य तदेकात्मन्यनादि-वासनापरिणतिरूपे रत्यादिभावेऽपि व्यवहार इति भावः। 'सुखादितादात्म्याङ्-गीकारे चास्माकं सिद्धान्तशय्यामधिशय्य दिव्यं वर्षसहस्रं प्रमोदनिद्रामुपेहि' इति। अभिन्नोपि स प्रमातृवासनोपनीतरत्यादितादात्म्येन गोचरीकृतः इति अनेन प्रकारेण रसस्य ज्ञानस्वरूपता तथा तेन सह रत्यादेः अभेदश्च गृहीतो भवति यदा ज्ञानं स्वप्रकाशं तदा रसस्य स्वप्रकाशता स्वयं सिद्धा। नैयायिकाः ज्ञान-लाभमनुव्यवसायेन स्वीकुर्वन्ति तन्न युक्तम्। यतो हि—ज्ञानस्य ज्ञानमनुव्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सायेन अनुव्यवसायस्य च ज्ञानं केनापि अन्येनेति अनवस्था स्यात् । ज्ञानेन सह तादात्म्यादेव रसस्याखण्डता सिद्धा भवति । अत एवोक्तम्—

विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः ।
प्रतीयमानाः प्रथमं खण्डशो यान्त्यखण्डताम् ॥

रसानुभवश्च प्रमातरि इति उक्तप्रायमेव ॥

(२०) प्रश्नः—रसस्य सुपरिष्कृतं सामान्यलक्षणमभिधाय क्वचिल्लक्ष्ये समन्वयः क्रियताम् ।

उत्तरम्—'सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः । वेद्यान्तरस्पर्शशून्यः ब्रह्मास्वादसहोदरः लोकोत्तरचमत्कारप्राणः ।' इति रसस्य लक्षणम् । सत्त्वाख्यस्य गुणस्य उद्रेकात् आविर्भावात् अखण्डः विभावादिसमूहालम्बनात्मकत्वादेक एव स्वप्रकाश आत्मनैव प्रकाशितः आनन्दचिन्मयः—आमोदमिश्रितज्ञानरूपः, वेद्यान्तरस्य अन्यज्ञेयस्य स्पर्शशून्यस्तत्काले सम्पर्करहितः ब्रह्मास्वादसहोदरः ब्रह्मज्ञान समानः, लोकोत्तरचमत्कारप्राणः रस इत्यर्थः ।

एतेन सत्त्वोद्रेकजन्यस्वप्रकाशानन्दमयत्वे सति लोकोत्तरचमत्कारमयत्वे सति वेद्यान्तरस्पर्शशून्यत्वे सति ब्रह्मज्ञानसदृशत्वे सति विभावादिसमूहालम्बनज्ञानत्वं रसत्वम् इति रससामान्यलक्षणम् । यथा—

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीम् ।
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥

इत्यत्र उक्तरूपः पतिः, उक्तरूपा च पत्नी आलम्बनविभावौ शून्यं वासगृहम् इति उद्दीपनविभावः, चुम्बनम् अनुभावः, लज्जाहासौ व्यभिचारिणौ एतैरभिव्यक्तः सहृदयरतिभावः शृङ्गारो रसः ।

(२१) प्रश्नः विभावानुभावव्यभिचारिणां लक्षणमभिधीयताम् ?

उत्तरम्—विभावस्य लक्षणम्–रत्युद्बोधका लोके विभावाः काव्यनाट्ययोः । अत्र काव्यपदेनैव नाट्यलाभे पुनः नाट्यपदोपादानं काव्येषु नाट्यस्य प्राधान्यं सूचयति । स च द्विविधः—आलम्बनविभावः, उद्दीपनविभावश्च । तत्र—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

आलम्बनविभावस्य लक्षणम्—आलम्बनं नायकादिः यमालम्ब्य रसोद्गमात्

उद्दीपनविभावः—उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये।

अनुभावस्य लक्षणं—स्वैः स्वैर्वृत्तिविवृतैः कारणैः, उद्बुद्धम् उत्पादितं भा रत्यादिस्थायिभावं बहिः प्रकाशयन् जनान्तरेष्वनुमापयन् लोके लौकिकदशायां कार्यरूपः स्थायिभावजन्यस्वरूपः, स पुनः काव्यनाट्ययोर्निवेशितः सन् अनुभा उच्यते। एतेन जन्यतया स्थायिभावानुमापकत्वम् अनुभावत्वमिति फलितम्।

व्यभिचारिभावस्य लक्षणं—विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः स्थायिन्युन्मग्ननिर्मग्नाः। अयमेव संचारीभावोऽप्युच्यते।

(२२) प्रश्नः—वत्सलरसः कस्य मते? तत्र—'शृंगारहास्यकरु रौद्रवीरभयानकाः। बीभत्साद्भुत इत्यष्टौ शान्तोऽपि नवमो रसः' इ विरोधपरिहारः कथमिति साधु विवेचनीयम्।

उत्तरम्—ननु 'शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्साद्भुत इत्य रसाः, शान्तस्तथा मतः॥' इति कारिकायां नव रसानामेव गणना दृश्य एभ्योऽधिका अपि रसाः सन्ति न वेति चेत्? श्रूयताम्—भरतमुनीन्द्रसम्मतः वत्सल दशमो रसः अस्ति। तत्र चमत्कारस्य स्फुटतया रसत्वमस्त्येव। अत्र स्थायिभाव वत्सलतास्नेहः पुत्रादिकमालम्बनं, पुत्रादीनां चेष्टा उद्दीपनानि, शिरश्चुम्बनादी अनुभावाः, अनिष्टशंकाहर्षगर्वादयो व्यभिचारिणः सन्ति।

न च पूर्वरसभेदप्रतिपादकश्लोके नवरसानामेव गणना, अनेन तु तत्र न्यूनत इति वाच्यम्। तथा 'शान्तस्तथा मतः' इत्यत्र तथाशब्देन भरतमुनिसम्मतस्यास्य संग्रहात्। न च जीवगोस्वामिस्वीकृतानां प्रेमादीनामपि रसत्वं स्यादिति वाच्यम् आदिमुनिभरतवचनस्य प्रामाणिकत्वेन वत्सलस्यैव ग्रहणं न तु प्रेमरसस्ये दिक्।

(२३) प्रश्नः—करुणादीनां रसानां दुःखमयत्वात् कथं रसत्वम् कथं वा दुःखकारणेभ्यः सुखोत्पत्तिरिति लिख्यताम्?

उत्तरम्—ननु करुणरसादिषु शोकादेः स्थायिनः दुःखहेतुतया प्रसिद्ध नायक इव सहृदयानां हृदयेऽपि दुःखजनकताया एव औचित्यात् कथं सचेतनै त्रानन्दानुभवः क्रियते इति चेत् श्रूयताम्—कोऽपि सचेतनः दुःखाय न प्रवर्तस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

करुणरसप्रधानेष्वपि काव्येषु सर्वेषां साभिनिवेशप्रवृत्तिदर्शनात्। शृङ्गारादिभ्य इव करुणरसप्रधानेभ्यः काव्येभ्योपि आनन्दरसधारायाः प्रत्यक्षसिद्धत्वात् यदि करुणरसप्रधानकाव्यानां दुःखहेतुता स्यात् तदा रामायणादौ दुःखकारणत्वात् लोकस्य प्रवृत्तिरेव न स्यात्, भवति च प्रवृत्तिः। अतो न दुःखहेतुना। न च लौकिकशोकहर्षादिकारणेभ्य एव लोके शोकहर्षादयो जायन्ते काव्ये पुनः कथं शोककारणेभ्योऽपि सुखमेव जन्यते इति वाच्यम्? यथा लोके सुरते नखक्षतादिना सुखमेव जायते न दुःखं तथैव काव्यनाटकश्रवणकाले सुखस्यैव जननात्।

न च दुःखे अश्रुपातादयो भवन्ति न सुखे, करुणरसप्रधाननाटकादिदर्शनेन तु अश्रुपातादयो जायन्ते, अतः कथं तत्र सुखानुभव इति वाच्यम्? प्रवृत्तिदर्शनात् सुखं कल्प्यते, अश्रुपातादयस्तु चेतसः द्रुतत्वादिति बोध्यम्।

न च कथं न नैयायिकमीमांसकानीं तादृशसुखाप्तिरिति वाच्यम्? रत्यादिवासनां विना आस्वादानुत्पादात्। अत एव उक्तम्—

सवासनानां सभ्यानां रसस्यास्वादनं भवेत्।
निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः॥ इति॥

(२४) प्रश्नः—ननु एतावता रसस्याज्ञेयत्वमुक्तं भवति व्यञ्जनायाश्च ज्ञानविषयत्वात् द्वयोरैक्यमापतितम्, अस्याः पंक्तेराशयः विशदीक्रियताम्।

उत्तरम्—ननु विभावादिमेलकाज्जायमानानन्दसंवलितमिलितविभावादिसंवित् रसः इति स्वीकारे विभावादीनां मेलकश्च विभावादिविशिष्टवैशिष्ट्यावगाहि एकज्ञानविषयत्वमवश्यं वक्तव्यम् प्रकारान्तरेण तन्निरूपणस्याशक्यत्वात्, तादृशज्ञानं च विभावादीनां प्रत्येकज्ञानादेव भवति एवं च तादृशज्ञानानन्तरं रसास्वादः कथं जायतामुपायाभावात् यतः स्वप्रकाशस्य स्वानुत्पत्त्यैवाज्ञेयत्वमिति चेन्न व्यञ्जनयैव रसास्वादस्य जायमानत्वात्।

न च व्यञ्जनायाः विशिष्टवैशिष्ट्यज्ञानरूपत्वात् रसस्य च ज्ञानरूपत्वात् द्वयोरैक्यमापतितम्। ततः द्वयोरैक्यापातात्।

स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः।
यथा दीपोन्यथाभावे को विशेषोस्य कारकात्॥

इत्युक्तदिशा घटप्रदीपयोरिव व्यङ्ग्यव्यञ्जकयोः पार्थक्यमेवोचितमिति कथं रसस्य व्यङ्ग्यता इति वाच्यम् विलक्षणेन स्वादनाख्यव्यापारेण रसव्यङ्ग्यतोपपत्तेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अत एवोक्तम्–विलक्षण एवायं कृतिज्ञप्तिभेदेभ्यः स्वादनाख्यः कश्चिद् व्यापार इति। विलक्षणत्वादेव रसनास्वादनचमत्करणादयो व्यपदेशाः भवन्ति अस्माभिरपि रसादीनां व्यञ्जनाजन्यबोधविषयत्वमुच्यत एवेति दिक्।

(२५) प्रश्नः—साधारणीकरणव्यापारस्वीकारे वाचोयुक्तीः प्रद शंयत ?

उत्तरम्—ननु रामादिरत्युद्बोधकारणैः कथं सामाजिकरत्युद्बोध इति चेदु च्यते। एकः साधारणीकारणाख्यः। व्यापारः स्वीक्रियते येन–परस्य, न परस्य मम, न मम इत्यादिरूपेण विभावादेः आस्वादे परिच्छेदो न भवति तत्प्रभावेन च रामस्य समुद्रनिग्रहादयः रावणनिग्रहादयश्च धर्माः सामाजिकः रामाभेदे स्वं 'रामोऽहं क्रुद्धः स्वरूपानवलोकनोद्दीपितसमुद्रनिग्रहविषयकोत्साहवान्' इ प्रतिपत्तिरुत्पद्यते। एवमेव रत्यादयोऽपि साधारण्येनैव प्रतीयन्ते अन्यथा रत्यादी स्वात्मगतत्वेन प्रतीतौ व्रीडातङ्कादिर्भवेत् परगतत्वेन प्रतीतौ अरस्यतापा स्याद्। अतः साधारणीकरणाख्येन अलौकिकेन व्यापारेण विभावादीनां प्रती न कुत्रापि दोष इति दिक्।

(२६) प्रश्नः—रसास्वादे विभावादीनामेकः प्रतिभासः कथमु पद्यते ?

उत्तरम्—ननु विभावनानुभावनसंचारणेनालौकिकव्यापारेण रसस्य का णत्वे तेषामेकरसरूपतया कथं परिणाम इति चेत् श्रूयताम्? प्रथमं प्रत्ये प्रतीयमानः विभावादिः हेतुः ततः सर्वः सम्मिलितः विभावादिः सहृदयानां प्र णकरसन्यायाच्चर्व्यमाणः रसरूपतां भजते। यथा-प्रपाणकरसे खण्डमरिचादी संमेलनादपूर्व इव कश्चिदास्वादो जायते तथैव विभावादिसम्मेलनादिहापि।

ननु यदि विभावानुभावव्यभिचारिभिर्मिलितैरेव रसस्तत्कथं तेषामेकस्य द्वयं सद्भावेऽपि रसप्रतीतिःस्यादिति चेन्न? यत्र काव्ये विभावादिषु मध्ये एक द्वयोर्वा सद्भावः भवति, तत्र अन्येषां प्रकरणादिवशात् झटिति समाक्षेपेण द्वाधे बाधकाभावात्। यथा—

दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः।
संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मध्यः पाणिमितः नितम्बि जघनं पादावुदग्राङ्गुली
छन्दो नर्तयितुर्यथैव मनसः सृष्टं तथास्या वपुः।

अत्र मालविकाभिलाषिणः अग्निमित्रस्य मालविकारूपस्य विभावमात्रस्य वर्णनेऽपि संचारिणामौत्सुक्यादीनाम्, अनुभावानां नयनविस्फारादीनामौचित्यादेवाक्षेपः। एवमन्येषामपि आक्षेपो बोध्य इति दिक्।

(२७) प्रश्नः—अनुकार्यगतो रसः इति कस्य मतं किञ्च तत् कथनं भवते रोचते इति प्रतिपादयत ?

उत्तरम्—ननु ललनादिभिरालम्बनविभावैः स्थायी रत्यादिको भावो जनितः, उद्यानादिभिरुद्दीपनविभावैरुद्दीपितः, अनुभावैः कटाक्षभुजक्षेपादिभिः प्रतीतियोग्यः कृतः व्यभिचारिभिरुत्कण्ठादिभिः परिपोषितो रामादावनुकार्ये नाट्येनाभिनेये रसः। नटे तु तुल्यरूपतानुसंधानवशादारोप्यमाणः सामाजिकानां चमत्कारहेतुः। इति भट्टलोल्लटप्रभृतीनां सिद्धान्तात् अनुकार्यगत एव रस इति चेन्न।

पारिमित्याल्लौकिकत्वात् सान्तरायतया तथा।
अनुकार्यस्य रत्यादेस्तद्बोधो न रसो भवेत्।

अयम्भावः —सीतादिदर्शनजन्यः रामादिरत्युद्बोधः परिमितः नायकमात्रगतत्वेनाल्पः। लौकिकः—लोकसिद्धः रसस्तु अलौकिकः अलौकिकव्यापारजन्यश्च। सान्तरायश्च—नाट्यकाव्यदर्शनश्रवणप्रतिकूलतया च वर्तते अतः रसस्य अपरिमितत्वात् अलौकिकत्वात् निरन्तरायत्वाच्च कथमनुकार्यगतत्वं सम्भवति इति भट्टलोल्लटाद्युक्तमसमञ्जसमेव।

(२८) प्रश्नः—रसस्य अनुकर्तृगतत्वं कस्य मते, किञ्च तेषां मतं कथं न भवते रोचते ?

उत्तरम्—ननु यथा कुज्झटिकापातसंकुले देशेऽविद्यमानस्यापि धूमस्य अभिमानात् धूमनियतस्य वह्नेरनुमानम्। तथा नटेनैव ममैवैते विभावाद्याः इति निपुणं प्रकटीकृतैस्तत्राविद्यमानैरपि विभावादिभिः तन्नियता रतिरनुमीयमानापि निजसौन्दर्यबलात् सामाजिकानामास्वाद्यमानतया चमत्कृतिमावहन्ती रसतामेति इति रतेरनुमितिरेव रसनिष्पत्तिः इति शङ्कुकस्य प्रसिद्धतार्किकस्य मतमेव सम्यगिति चेन्न—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

शिक्षाभ्यासादिमात्रेण राघवादेः सरूपताम् ।
दर्शयन् नर्तको नैव रसस्यास्वादको भवेत् ॥

अयमर्थः—नटः केवलं शिक्षाभ्यासमात्रेण राघवादेः स्वरूपं प्रकाशयन् रसास्वादकः भवितुं नार्हति । रसस्य काव्यार्थभावनया प्रतीतेः ।

न च नटोऽपि काव्यार्थभावनया रामादिस्वरूपतामात्मनो दर्शयेत् तदा रसास्वादकत्वे को विरोध इति वाच्यम् न किमपि किन्तु एतादृशः नटः नटत्वेन न रसास्वादकः किन्तु सहृदयत्वेनेति विवेकः ।

(२६) प्रश्नः—रसस्य अलौकिकत्वं सत्यत्वं स्वप्रकाशत्वं च व्यवस्थाप्यताम् ?

उत्तरम् :—ननु यथा घटः दीपादिना ज्ञाप्यो भवति तथैव पूर्वसिद्धो रसोऽपि ज्ञाप्यः कुतो नेति चेन्न, यो हि ज्ञाप्यः घटादिः स कदाचित् विद्यमानोऽपि ज्ञानसामाग्र्यभावदशायामज्ञातो भवति किन्तु रसस्तु सन्नपि कदाचिद् ज्ञातो न भवति । तथा च यो यो ज्ञाप्यः स स प्रतीतिं विना कदाचिदवतिष्ठते यथा घटादिः । नायं तथा ।

न चायं रसः विभावादिज्ञानकारणकः अतः कार्यः कुतो नेति वाच्यम् यदि रसः कार्यः स्यात्तदा विभावादिकारणकः स्यात् ततश्च घटप्रतीतिकाले दण्डादीनामिव रसप्रतीतिकाले विभावादीनां प्रतीतिः न स्यात्, यतः कारणज्ञानतत्कार्यज्ञानादीनां युगपददर्शनात् । नहि चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानं चैकदा सम्भवति । रसस्य च विभावादिसमूहालम्बनात्मकतयैव प्रतीतेर्न विभावादिज्ञानकारणकत्वम् । अतो न कार्यत्वमिति । न च यदि रसः न कार्यः तर्हि 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिरिति भरतसूत्रविरोध इति वाच्यम्, चर्वणस्य निष्पत्त्या रसस्य निष्पत्तेरौपचारिकत्वात् (लाक्षणिकत्वात्)' न च रसाभिन्नतया चर्वणस्यापि कार्यत्वं कुत इति वाच्यम्, कादाचित्कतया उपचरितेन कार्यत्वेन कार्यत्वस्योपचारात् ।

न च यदि रसः न कार्यः तर्हि नित्यः भवितुमर्हति इति वाच्यम्, विभावादिज्ञानात् प्रागपि संवेदनाभावात् । रसो न नित्यः । यतः यद्धि नित्यः स्यात् तदा विभावादिज्ञानात् प्रागपि ज्ञायेत् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न च विभावादिज्ञानमेव रसग्राहकमिति ग्राहकाभावात् कथं रसप्रतीतिरिति वाच्यम । संवेदनरूपत्वादस्य असंवेदनकाले असत्त्वात् । अतः न नित्य इति दिक् ।

न च रसः भविष्यत् स्यादिति वाच्यम् ? लौकिकप्रत्यक्षे विषयस्य कारणत्वेन साक्षादानन्दमयप्रकाशरूपस्य रसस्य भविष्यत्त्वासम्भवात् ।

न च रसः वर्तमान एव मन्तव्यमिति वाच्यम् । वर्तमानस्य वस्तुतः कार्यत्वं ज्ञाप्यत्वं वा भवति रसस्य कार्यज्ञाप्यविलक्षणत्वात् वर्तमानत्वानुपपत्तेः ।

न च रसग्रहे निर्विकल्पकज्ञानवेद्यत्वं कुतो नेति वाच्यम् । सहृदयाणां विभावादिपरामर्शविषयत्वात् परमानन्दत्वप्रकारकसंवेदनविषयत्वाच्च न निर्विकल्पकज्ञानं तस्य ग्राहकमिष्यते । निर्विकल्पकं हि ज्ञानं निष्प्रकारकं भवति । अस्य तु सप्रकारकत्वात् न निर्विकल्पकत्वम् ।

न च रसस्य सविकल्पकज्ञानसंवेद्यत्वं कुतो नेति वाच्यम्, वचनप्रयोगयोग्यत्वाभावात् । सविकल्पकज्ञानसंवेद्यानां हि वचनप्रयोगयोग्यता भवति । रसस्य तु वचनप्रयोगयोग्यता नास्ति । अतः न सविकल्पकज्ञानसंवेद्यत्वमिति भावः ।

न च एवं परोक्षत्वं रसस्य स्यादिति वाच्यम्—स्वादनाख्यव्यापारस्य मनःसन्निकर्षजन्यत्वेन साक्षात्कारतया परोक्षत्वासम्भवात् ।

न च रसस्य अपरोक्षत्वमिति वाच्यम् काव्यजन्यविभावादिज्ञानजन्यत्वनियमात् न रसप्रकाशस्य प्रत्यक्षत्वम् ।

अतः ज्ञाप्यत्व-कार्यत्व-नित्यत्व-भविष्यत्व-वर्तमानत्व-निर्विकल्पकज्ञानवेद्यत्व-सविकल्पकज्ञानवेद्यत्व-परोक्षत्वापरोक्षत्वविलक्षणत्वादलौकिकत्वम्, सहृदयैः वेद्यत्वाच्च सत्यर्थं रत्यादिज्ञानरूपत्वाच्च स्वप्रकाशत्वमखण्डत्वं च सिद्ध्यति ।

(३०) प्रश्नः—नायकः कतिविधः कानि च लक्षणानि सोदाहरणं लिखत ?

उत्तरम्—ननु नायकः कतिविधः इति चेदुच्यते ? धीरोदात्त,-धीरोद्धत-धीरललित-धीरप्रशान्त भेदेन चतुर्विधः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

तत्र धीरोदात्तः—अनात्मश्लाघाकरः, क्षमाशीलः, अतिगम्भीरः, महासत्त्वः, स्थिरः, निगूढमानः, दृढव्रतः कथितः । यथा रामयुधिष्ठिरादिः ।

धीरोद्धतः—मायापरः, प्रचण्डः, चपलः, अहंकारदर्पभूयिष्ठः, आत्मश्लाघानिरतः धीरोद्धतः । यथा भीमसेनः ।

धीरललितः—निश्चिन्तः, मृदुः नृत्यादिकलापरः । यथा—उदयनः, रत्नावल्याम् ।

धीरप्रशान्तः—सामान्यगुणैरधिकः द्विजः । यथा—मालतीमाधवे माधवः । एते च पुनः—दक्षिण-धृष्टा-नुकूल-शठभेदेन चतुर्विधाः ।

तत्र दक्षिणः—अनेकमहिलासमरागः ।

धृष्टः—अपराधेऽपि निःशङ्कः तर्जितोऽपिनिर्लज्जः, दृष्टदोषोऽपि मिथ्यावचनः।

अनुकूलः—एकस्यां निरतः ।

शठः—एकत्र बद्धभावः अन्यत्र दर्शितवहिरनुरागः ।

पुनः—उत्तममध्यमाधमभेदेन त्रिविध इति सङ्कलनया अष्टचत्वारिंशद् नायकभेदाः ।

(३१) प्रश्नः—नायकस्य कस्मिन् विषये के सहायाः इति लिखत ?

उत्तरम्—नायकस्य बहुव्यापिनि प्रसङ्गसंगते इतिवृत्ते पीटमर्दाख्यः सहायकः यः नायकसामान्यगुणैः किंचिदूनः भवति । यथा—रामायणे रामस्य सुग्रीवः ।

शृङ्गारे सहायाः —विट-चेट-विदूषकाः मालाकार-रजक-ताम्बूलिक-गान्धिकादयः । ये अनुरक्ताः नर्मकथानिपुणाः कुपितवधूमानभञ्जनाः शुद्धाः ।

अर्थचिन्तने सहायः—मन्त्री । अत्र दशरूपके धनञ्जयेन सहायकथन-'प्रस्तावे मंत्री स्वं चोभयं वापि सखा तस्यार्थचिन्तने ।' इति लक्षणं कृतम् तदपि राज्ञः अर्थचिन्तनोपायप्रकरणे वक्तव्यम् , नतु सहायकथनप्रकरणे । 'नायकस्यार्थचिन्तने मन्त्री सहायः ।' इत्युक्ते नायकस्यार्थत एव सिद्धत्वात् ।

तत्र विभागमाह—मन्त्रिणा ललितः शेषा मन्त्रिष्वायत्तसिद्धयः। अयमर्थः—धीरललितस्य मन्त्री एव अर्थचिन्तकः तस्यार्थचिन्तनाद्यभावात् । शेषाः धीरोदात्तादयः मन्त्रिणा स्वेन उभयेन वा अंगीकृतसिद्धयः भवन्ति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अन्तःपुरसहायाः। वामन—षण्ढ—किरात—म्लेच्छा—भीर—शकार कुब्जाद्याः।

दण्डसहायाः—सुहृत्–कुमारः–आटविकः–सामन्तः–सैनिकश्च।

धर्मसहायाः—ऋत्विक्–पुरोहितः, ब्रह्मविदः, तापसाः।

(३२) प्रश्नः—सामान्यतः नायिकाभेदान्‌पवर्णयत।

उत्तरम्—नायिका प्रथमं त्रिभेदा। यथा—

स्वस्त्री— (विनयवती पतिव्रता) | अन्यस्त्री— | साधारणस्त्री (वेश्या)

मुग्धा-मध्या-प्रगल्भा, (एकविधैव) | कन्यका-परोढा (द्विविधा)

धीरा-अधीरा-धीराधीरा (त्रिभेदा) | धीरा-अधीरा-धीराधीरा (त्रिभेदा)

कनिष्ठा-ज्येष्ठा (प्रत्येकं द्विभेदेति ६ भेदाः) | कनिष्ठा-ज्येष्ठा (प्रत्येक द्विभेदेति ६ भेदाः)

इति संकलनया स्वस्त्री १३ विधाः।

इति संकलनया १६ विधा नायिकाः। अवस्थाभेदेन च एताः अनन्तविधाः भवन्ति।

(३३) प्रश्नः—नार्या भावाभिव्यक्तेः साधनानि प्रदर्शयत।

उत्तरम्—नार्यः लेखप्रस्थापनेन, सस्नेहविलोकनेन, मृदुवीक्षणेन, दूती प्रेषणेन च भावाभिव्यक्तिं कुर्वन्ति। तत्र दूत्यः–सखी, नटी, दासी, धात्रेयी, प्रतिवेशिनी, बाला, प्रव्रजिता, रजकी, शिल्पिनी (चित्रकारस्त्री,) ताम्बूलिकस्त्री, गान्धिकस्त्री प्रभृतयः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

(३४) प्रश्नः—उद्दीपनविभावस्य परिचयो देयः ?

उत्तरम्—ये भावाः रसमुद्दीपयन्ति ते उद्दीपनविभावा उच्यन्ते ।

यथा-आलम्बनविभावस्य चेष्टा, रूपं, भाषणम् । देशः—विजनम्, कालः—चन्द्रचन्दनकोकिलालापभ्रमरझंकारादिः ।

(३५) प्रश्नः—अनुभावानां परिचयो देयः ।

उत्तरम्—यः खलु लोके सीतादिचन्द्रादिभिः स्वैः स्वैः आलम्बनोद्दीपन-कारणैः रामादेरन्तरुद्बुद्धं रत्यादिकं बहिः प्रकाशयन् कार्यमित्युच्यते स काव्यनाट्ययोः पुनः अनुभावशब्देन व्यपदिश्यते । ते च स्त्रीणाम् त्रयः अङ्गजाः भावादयः । स्वभावजाः लीलादयः अष्टादश अलङ्काराः । तद्रूपाः सात्विकभावाः तथा नेत्रविक्षेपादयः चेष्टाः अनुभावाः ।

(३६) प्रश्नः—व्यभिचारिणः किं स्वरूपम् कतिविधास्ते इति निरूपयत ।

उत्तरम्—विशेषात् (विभावाद्यपेक्षया आधिक्येन) स्थायिन्युन्मग्ननि-मग्नाः आभिमुख्येन (रसानुकूलतया) चारणात् (संचारणात्) व्यभिचारिणः (कथ्यन्ते) (स्थिरतया वर्तमाने रत्यादौ प्रादुर्भाव-तिरोभा-वाभ्याम्) ते च त्रयस्त्रिंशत् भेदाः । आकरेषु लिखिताः । तत एव द्रष्टव्याः ।

एवं रत्यादयोऽपि स्थायिभावत्वेन ये उक्ताः तेऽपि अनियते रसे व्यभिचा-रित्वं गच्छन्ति । यतः–'रसावस्थः परं भावः स्थायितां प्रतिपद्यते' यश्च रत्यादिको भावः प्रतिकूले रसे विद्यमानः स न स्थायी भावः किन्तु व्यभिचारितयैव निर्णीतो वेदितव्यः । यथा–शृङ्गारवीरयोः वीरे क्रोधे च हासः, शान्ते जुगुप्सा व्यभिचारित्वेन स्थिता । अन्येषामपि व्यभिचारित्वं बुद्ध्या बोध्यम् ।

(३७) प्रश्नः—स्थायिभावाः के किंच तेषां स्वरूपम् ।

उत्तरम्—यः भावः विरुद्धैः अविरुद्धैश्च भावैः न विच्छिद्यते, एवंभूतः आस्वादाङ्कुरकन्दः स्थायिभावशब्देनोच्यते । न च अन्तःकरणवृत्तिरूपस्य रत्यादेः आशुविनाशितया कथं स्थायित्वमिति वाच्यम् संस्कारात्मना चिरकाल-मवस्थायित्वात् रसप्रतीतिकालमनुसन्धानाच्च तस्य स्थायित्वात् ।

अयं च स्थायी भावः सर्वभावेषु प्रधानम् । यथाः–नराणां नृपतिः, शिष्याणां गुरुः । अयम्भावः—यथा समानलक्षणाः समानाङ्गप्रत्यङ्गाः कुलविद्या-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विलक्षणाः राजत्वमाप्नुवन्ति। अन्ये च अल्पबुद्धयः अनुचराः भवन्ति, तथैव भावेषु ये प्राधान्यं भजन्ते ते स्थायिभावा उच्यन्ते अपरे परिजनभूताः व्यभिचारिभावाः उच्यन्ते।

ते च—रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च॥

इत्युक्तदिशा नव स्थायिभावाः दर्पणकारसम्मता मन्तव्याः।

तत्र मनोनुकूलेर्थे मनसः प्रेमार्द्रत्वम् रतिः। वागादिविकारैः चेतोविकासः हासः। इष्टनाशजन्मा चेतोविकारः शोकः। प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोधः। कार्यारम्भेषु स्थिरः आवेशः उत्साहः। रौद्रशक्तिदर्शनजन्यं चेतोवैक्लव्यं भयम्। दोषदर्शनेन विस्मयोद्भवगर्हा जुगुप्सा। लोकसीमातिवर्तिषु विभिन्नेषु वस्तुषु चेतसः विस्फारः विस्मयः। निस्पृहदशायां स्वात्मविश्रामजन्यं सुखम् शमः।

(३८) प्रश्नः—शृङ्गारस्य भेदौ उक्त्वा करुणविप्रलम्भस्वरूपमुपपाद्यताम्।

उत्तरम्—शृङ्गारस्य द्वौ भेदौ सम्भोगः विप्रलम्भश्च।

तत्र विप्रलम्भो द्विविधः शुद्धविप्रलम्भः करुणविप्रलम्भश्चेति।।
तत्र—यूनोरेकतरस्मिन् गतवति लोकान्तरे पुनरलभ्ये।
विमनायते यदेकः तदा भवेत् करुणविप्रलम्भाख्यः।

इत्युक्तदिशा कादम्बर्यां पुण्डरीकमहाश्वेतावृत्तान्ते करुणविप्रलम्भ एव रसः। पुनरलभ्ये शरीरान्तरेण लभ्ये तु करुणाख्य एव रसः। कादम्बर्यां आकाशसरस्वतीभाषातः पूर्वं तु करुण एव इति अभियुक्ताः मन्यन्ते।

अत्र केचित् (आचार्यधनिकः) कादम्बर्यां आकाशभाषानन्तरमपि न करुणविप्रलम्भाख्यः शृङ्गारभेदः किन्तु विप्रलम्भशृङ्गारस्य प्रवासाख्योभेद एवेति वदन्ति, किन्तु तदन्ये न मन्यन्ते मरणरूपविशेषसम्भवात् प्रवासाद्भिन्नमेवेति।

न चैवं करुणे करुणविप्रलम्भे च को भेद इति वाच्यम् करुणे शोकः स्थायिभावः विप्रलम्भे रतिः स्थायिभावः पुनः संभोगहेतुकत्वात् इति करुणविप्रलम्भात् करुणस्य भेदात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

न चैवं 'उत्तररामचरिते' कः रस इति वाच्यम्। करुणरसस्यैव तत्र भवभूतिनास्वीकृतत्वात्। न च रामसीतयोः अन्ते समागमेन करुणविप्रलम्भत्वमेवेति वाच्यम् तत्र सङ्गमप्रत्याशाभावेन रतेरनुत्पादात्।

(३६) प्रश्नः—ध्वनेः सामान्यलक्षणमभिधाय क्वचित् समन्वयं प्रदर्श्य ध्वनिगुणीभूतव्यङ्ग्ययोर्भेदं युक्त्या संस्थाप्य च तद्भेदानतिसंक्षेपेण प्रदर्शयत ?

उत्तरम्—काव्यं द्विविधम्, ध्वनिर्गुणीभूतव्यङ्ग्यं च। तत्र ध्वन्यतेऽस्मिन्निति ध्वनिरिति अधिकरणव्युत्पत्त्या उत्तमकाव्यमर्थः। ध्वन्यतेऽनयेति ध्वनिरिति करणव्युत्पत्त्या व्यञ्जनाऽपि ध्वनिः। ध्वननं ध्वनिरिति भावव्युत्पत्तिस्वीकारे व्यञ्जनाजन्यबोधोऽपि ध्वनिः। ध्वन्यते इति ध्वनिरिति कर्मव्युत्पत्तिस्वीकारे रसादिव्यङ्ग्यस्य बोधको ध्वनिशब्दो भवति। तस्य च 'वाच्यातिशायिनि व्यङ्ग्ये ध्वनिः' इति लक्षणम्। यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थस्याधिकचमत्कारिता ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या तत् काव्यं ध्वनिर्नाम। तच्च उत्तमं काव्यम्, यथा—

कदली कदली करभः करभः करिराजकरः करिराजकरः।
भुवनत्रितयेऽपि बिभर्ति तुलामिदमूरुयुगं न चमूरुदृशः॥

इत्यत्र द्वितीयकदल्यादिशब्दाः पौनरुक्त्यभिया सामान्यकदल्यादिरूपे मुख्यार्थे बाधिता जाड्यादिगुणविशिष्टकदल्यादिरूपमर्थं बोधयन्ति जाड्यातिशयश्च व्यङ्ग्यः। अत्र वाच्याद् कदल्याद्यर्थविशेषात् अधिकचमत्कारकारी जाड्यातिशयरूपोऽर्थो ध्वनिः।

ननु ध्वनिगुणीभूतव्यङ्ग्ययोः को भेद इति वाच्यम्। यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थोऽधिकचमत्कारकारी स ध्वनिः, यत्र तु व्यङ्ग्यार्थापेक्षया वाच्यार्थ एवाधिकचमत्कारकारी स गुणीभूतव्यङ्ग्यः। यथा—

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥

अत्र वञ्जुललतागृहे दत्तसंकेता नागता इत्यपेक्षया वाच्यार्थस्यैवाधिकचमत्कारित्वम् इति गुणीभूतव्यङ्ग्यत्वमस्य। तत्र ध्वनिः द्विविधः, एको लक्षणामूलकः, अपरः अभिधामूलकश्च, तत्र लक्षणामूलस्य ध्वनेः 'अविवक्षितमनुपयुक्तमन्वयायोग्यं वा वाच्यं वाच्यार्थो यस्मिन् स अविवक्षितवाच्य इति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नामान्तरम्। विवक्षितं वाच्यतावच्छेदकरूपेणान्वयबोधविषयः, अन्यपरं व्यङ्ग्योपसर्जनीभूतं च वाच्यं वाच्यार्थो यत्र तादृशः विवक्षितान्यपरवाच्य इति अभिधामूलस्य ध्वनेः नामान्तरम्। तत्र अविवक्षितवाच्यो ध्वनिः, अर्थान्तरसंक्रमितात्यन्ततिरस्कृतभेदेन द्विविधः।

ध्वनिः द्विविधः

१— अविवक्षितवाच्यः। २ —विवक्षितान्यपरवाच्यः।

अविवक्षितवाच्योऽपि द्विविधः

१—अर्थान्तरसंक्रमितवाच्यः। २—अत्यन्ततिरस्कृतवाच्यश्च।

विवक्षितान्यपरवाच्यो द्विविधः

१—असंलक्ष्यक्रमव्यङ्ग्यः। २—संलक्ष्यक्रमव्यङ्ग्यश्च।

तत्र असंलक्ष्यक्रमव्यङ्ग्य एक एव तस्यानन्तत्वात् न गण्यते भेदः।

संलक्ष्यक्रमव्यङ्ग्यस्तु त्रिविधः

१—शब्दशक्त्युत्थः, २—अर्थशक्त्युत्थः, २—उभयशक्त्युत्थश्च

शब्दशक्त्युद्भवो द्विविधः

१—वस्तुरूपः। २—अलङ्काररूपश्च।

अर्थशक्त्युत्थः द्वादशविधः

१—स्वतःसम्भविना वस्तुना वस्तुध्वनिः। २—स्वतः सम्भविना वस्तुना अलंकारध्वनिः। ३—स्वतः सम्भविना अलंकारेण वस्तुध्वनिः। ४—स्वतः सम्भविनालंकारेणालंकारध्वनिः। ५—कविप्रौढोक्तिसिद्धेन वस्तुना वस्तुध्वनिः। ६—कविप्रौढोक्तिसिद्धेन वस्तुना अलंकारध्वनिः। ७—कविप्रौढोक्तिसिद्धेनालंकारेण वस्तुध्वनिः। ८—कविप्रौढोक्तिसिद्धेनालंकारेणालंकारध्वनिः। ९—कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन वस्तुना वस्तुध्वनिः। १०—कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन वस्तुना अलंकारध्वनिः। ११—कविनिबद्धवक्तृप्रौढोक्तिसिद्धेनालंकारेण वस्तुध्वनिः। कविनिबद्धवक्तृप्रौढोक्तिसिद्धेनालंकारेणालंकारध्वनिः।

उभयशक्त्युत्थः १. एकः

एवं च अविवक्षितवाच्यस्य द्वौ २ भेदौ, विवक्षितान्यपरवाच्यस्य १६ षोडश भेदा इत्येवं रीत्या १८ अष्टादश भेदाः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

एते पदगतत्वेन वाक्यगतत्वेन च द्विविधाः, इति संकलनया--उभयश-
क्त्युत्थस्तु केवलं वाक्यगतः — १ विधः।
अविवक्षितवाच्यो यः द्विभेदः सः— ४ चतुर्धा।
विवक्षितान्यपरवाच्यमध्ये यः पञ्चदश भेदः सः— ३० विधः।
एवं संकलनया— ३५ विधः।
ततः अर्थशक्त्युद्भवस्य प्रवन्धगतत्वेन अधिकाः— १२ भेदाः।
असंलक्ष्यक्रमस्य पद—पदांशवर्णरचनाभेदेन ४ ,,
एवं ध्वनेः ५१ ,,
एवं संकरेण त्रिरूपेणैकरूपया संसृष्ट्या च ५३०४ ,,
शुद्धैः— ५१ सह ५३५५ ,,

संकलनप्रकारः—

लक्षणामूलः (अविवक्षितवाच्यः) चतुर्विधः
- अर्थान्तरसंक्रमितवाच्यः २
  - पदगतः १
  - वाक्यगतः १
- अत्यन्ततिरस्कृतवाच्यः २
  - पदगतः १
  - वाक्यगतः १

अभिधामूलः (विवक्षितान्यपरवाच्यः) प्रधानतो द्विविधः
- असंलक्ष्यक्रमव्यङ्ग्यः
- संलक्ष्यक्रमव्यङ्ग्यश्च

तत्र रसादिरूपे एकविधोऽपि 'असंलक्ष्यक्रमव्यङ्ग्यः' अवान्तरभेदात् षड्विधः
- पदगतः १
- पदांशगतः १
- वाक्यगतः १
- महावाक्यगतः १
- वर्णगतः १
- रचनागतः १

संलक्ष्यक्रमव्यङ्ग्यः एकचत्वारिंशद्विधः
- शब्दशक्त्युत्थे
  - वस्तुरूपयोः
    - पदगतः १
    - वाक्यगतः १
  - अलंकाररूपयोः
    - पदगतः १
    - वाक्यगतः १
- अर्थशक्त्युत्थे
  - पदगताः १२
  - वाक्यगताः १२
  - महावाक्यगताः १२
- उभयशक्त्युत्थे
  - वाक्यगतः १

इत्थं शुद्धाः ५१

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

- सङ्कराः
  - अङ्गाङ्गिभावसंकरः
    - साजात्ये — शुद्धानां ध्वनीनां मध्ये एकैकस्य सजातीयेनापरेणैकेन सह ५१
    - वैजात्ये
      - द्वितीयस्य प्रथमेन सह १
      - तृतीयस्य प्रथमेन द्वितीयेन वा २
      - चतुर्थस्य प्रथमेन द्वितीयेन तृतीयेन वा ३
      - एवं—१२७५
  - एकाश्रयस्थितसंकराः
    - साजात्ये उक्तक्रमेण—५१
    - वैजात्ये उक्तक्रमेण १२७५
  - संदिग्धसंकराः
    - साजात्ये उक्तक्रमेण ५१
    - वैजात्ये उक्तक्रमेण १२७५
- संसृष्टिः
  - साजात्ये उक्तक्रमेण ५१
  - वैजात्ये उक्तक्रमेण १२७५

योगः ५३०४

शुद्धाः ५१

समुदाययोगः ५३५५

(४०) प्रश्नः—गुणीभूत-व्यङ्ग्यभेदाः प्रदर्शनीयाः ।

१ इतराङ्गम्
२ काक्वाक्षिप्तम्
३ वाच्यसिद्ध्यङ्गम्
४ सन्दिग्धप्राधान्यम्
५ तुल्यप्राधान्यम्
६ अस्फुटम्
७ अगूढम्
८ असुन्दरव्यङ्ग्यम् । इति ।

(४१) प्रश्नः—अभिधाया व्यङ्ग्यार्थबोधनाक्षमत्वं विविच्यताम् ।

उत्तरम्—ननु अभिधाव्यापारेणैव अभिधामूलव्यङ्ग्यार्थस्यापि बोधने सम्भवति व्यञ्जनावृत्तिः न स्वीकार्येति चेन्न ? सङ्केतितार्थमात्रबोधनसमर्थायाः अभिधायाः व्यङ्ग्यार्थबोधनासामर्थ्यात् । न च रसादिरपि सङ्केतित एवेति वाच्यम् रसादीनां द्विविधः सङ्केतः भवितुमर्हति विभावादीना रसशब्देन च । तत्र न प्रथमः विभावादीनामभिधानं न रसाभिधानं विभावादीनां रसरूपत्वानङ्गीकारात् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

न द्वितीयः रसशब्देन रसाभिधानासामर्थ्यात् प्रत्युत सप्तमपरिच्छेदे वक्ष्यमाण-प्रकारेण दोषत्वाङ्गीकारात् । स्वप्रकाशानन्दरूपस्य रसस्य रसशब्देन शृङ्गार-शब्देनाभिधानेऽपि रसाप्रतीतेः ।

न च केचित् (भट्टलोल्लटप्रभृतयः) 'सोयमिषोरिवदीर्घदीर्घतरोभिधाव्यापारः इत्याहुः' तन्मतेन व्यङ्ग्यार्थस्य दीर्घदीर्घतराभिधाव्यापारेण लाभसिद्धेः इति वाच्यम् 'शब्दबुद्धिकर्मणां विरम्यव्यापाराभावः' इति सिद्धान्तविरोधात् ।

न च अन्य सिद्धान्तविरोधे मम का हानिरिति वाच्यम् व्यङ्ग्यार्थस्याभिधया-बोधकत्वे लक्ष्यार्थस्यापि दीर्घदीर्घतराभिधाव्यापारेणापि बोधसिद्धेः लक्षणावृत्ति-स्वीकारस्यानावश्यकत्वात् ।

किंच यदि शब्दश्रवणानन्तरं प्रतीतस्यार्थस्य अभिधैव व्यापार इति मीमांसक-मतस्वीकारः तदा ब्राह्मण पुत्रस्ते जातः, 'कन्या ते गर्भिणी' इति वाक्यार्थप्रतीति-द्वारा ये हर्षशोकादयः उत्पद्यन्ते न तु प्रतीयन्ते तेषां मुखप्रसादमालिन्यादिना अनुमानात् तेऽपि अभिधयैव प्रतीताः स्युः तथाच तेषामपि वाच्यत्वं स्यात् ।

किञ्च—बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम् ।
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः ॥

अयमर्थः—बोद्धृ-स्वरूप-संख्या-निमित्त-कार्य-प्रतीति-काल-आश्रय - विषया-दीनां भेदात् व्यङ्ग्यः अभिधेयतो भिन्न इति कारिकार्थः ।

तत्र १ बोद्धृभेदः—वाच्यार्थज्ञाने वैयाकरणा अपि निपुणाः व्यङ्ग्यार्थज्ञाने तु सहृदया एव ।

२—स्वरूपभेदः—भ्रमधार्मिकेति पद्ये 'हे धार्मिक भ्रम' इति विधिरूपे वाच्ये 'मा भ्रमेति' निषेधरूपतया 'निःशेषच्युतेत्यत्र न पुनस्तस्याधमस्यान्तिकम्' इति वाच्ये निषेधरूपे 'तस्यान्तिकमेव रन्तुं गतासीति' विधिरूपतया न स्वरूपभेदः ।

३—संख्याभेदः—'गतोस्तमर्कः' इत्यादौ 'सूर्यः अस्तं गतः' इति वाच्ये 'कान्तमभिसर, नायं कार्यस्य समयः, गावो निरुध्यन्ताम्, इत्यादिरूपेण अनेकार्थो व्यङ्ग्यः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

४—निमित्तभेदः—शब्दोच्चारणमात्रेण वाच्यार्थः बोध्यः। व्यङ्ग्यार्थस्तु भावनाविशेषेणेति भेदः।

५—कार्यभेदः—वाच्यार्थेन केवलं वस्तुमात्रं प्रतीयते। व्यङ्ग्यार्थे तु चमत्कार उत्पद्यते। अतः अनयोः कार्यभेदः।

६—प्रतीतिभेदः—केवलरूपतया चमत्कारितया च प्रतीतिभेदः।

७—कालभेदः—वाच्यस्य पूर्वकालिकत्वं व्यङ्ग्यस्य पश्चाद्भावित्वं चेति कालभेदः।

८—आश्रयभेदः—वाच्यः शब्दाश्रयः। व्यङ्ग्यार्थस्तु शब्दशब्दैकदेश-शब्दार्थवर्णसंघटनाश्रय इति आश्रयभेदः।

९—विषयभेदः—'कस्य भवति न रोषः' इति वाक्ये सखीतत्कान्तविषयत्वेन 'ओष्ठे न पुरुषजन्यो व्रणः किन्तु भ्रमरजन्यः इति व्यङ्ग्यार्थबोधे तत्कान्तः, वाच्यार्थबोधे च सखी उद्देश्या इति विषयभेदः।

एवम् एभिः नव हेतुभिः व्यङ्ग्ये अभिधेयभेदः सिद्धो भवति। तस्मान्नाभिधेयो व्यङ्ग्य इति सिद्धम्।

(४२) प्रश्नः—तात्पर्यवृत्त्या व्यञ्जनायाः गतार्थत्वं निरस्यताम्।

उत्तरम्—ननु अभिहितान्वयवादिभिरङ्गीकृता तात्पर्याख्यावृत्तिरेव कथं न व्यङ्ग्यार्थबोधिनी इति चेन्न अन्वयबोधमात्रे परिक्षीणायास्तस्याः व्यङ्ग्यार्थ-बोधनाक्षमत्वात्। न च यद्धनिकेनोक्तम् 'तात्पर्यव्यतिरेकाच्चव्यञ्जकत्वस्य न ध्वनिः इत्यारम्भ यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम्, इत्यन्तेन ग्रन्थेनेति वाच्यम् तस्योपरि 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति वादिभिरेव दण्डस्य पातनीयत्वात्। न च यत् पुनरुक्तं 'पौरुषेयमपौरुषेयं च वाक्यं सर्वमेव कार्यपरम् अतत्परत्वेऽनुपादेयत्वादुन्मत्तवाक्यवत्। ततश्च काव्यशब्दानां निरतिशयसुखास्वादव्यतिरेकेण प्रतिपाद्य प्रतिपादकयोः (श्रोतुर्वक्तुश्च) प्रवृत्त्यौपयिकप्रयोजनानुपलब्धेर्निरतिशयसुखास्वाद एव कार्यत्वेनावधार्यते। 'यत्परः शब्दः स शब्दार्थः' इति न्यायात् इति। तत्र प्रष्टव्यं किमिदं तत्परत्वं नाम, तदर्थत्वं वा तात्पर्यवृत्त्यातद्बोधकत्वं वा। आद्ये न विवादः व्यङ्ग्यत्वेपि तदर्थत्वानपायात्। द्वितीयेतु केयं तात्पर्यावृत्तिः। अभिहितान्वयवादिभिरंगीकृता,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

तदन्या वा । आद्ये अन्वयबोधमात्रे परिक्षीणायास्तस्याः व्यङ्ग्यबोधनाक्षमत्वम् । द्वितीये तु नाममात्रे विवादः त्वन्मतेऽपि तुरीयवृत्तिसिद्धेः ।

न च तात्पर्यवृत्त्या विभावादिसम्बन्धस्य व्यङ्ग्यस्य रसादेश्च प्रकाशनं युगपदेवास्तु इति वाच्यम् । तयोः संसर्गबोधरसादिबोधयोः कारणकार्यभावस्वीकारात् । अतएव भरतेन 'विभावानुभावव्यभिचरिसंयोगाद्रसनिष्पत्तिरि-त्युक्तम्, सहभावे च सव्येतरविषाणयोरिव कार्यकारणभावो न स्यात् कार्यनियतपूर्ववृत्तेरेव कारणत्वात् पौर्वापर्यविपर्ययात् इति दिक् ।

(४३) प्रश्नः—लक्षणाभिधे रसस्य बोधिके न वेति विचार्यताम् ?

उत्तरम्—ननु लक्षणाया अभिधाया वा रसादेर्बोधः कुतो नेति चेन्न, शब्दव्यापारात् पूर्वं रसस्य सत्तैव न स्वीक्रियते । अतः रसस्य लक्षणाभिधे न बोधिके । अभिधया लक्षणया च विद्यमानवस्तुनः एव बोधनात् । गंगायां घोष इत्यत्र गंगा तटश्च पूर्वसिद्धौ । अतः गंगापदम् अभिधया प्रवाहं लक्षणया च तटं बोधयति । असिद्धे वस्तुनि नैतयोः प्रयोगः । रसनात्मकव्यापाराद्भिन्न रसादिप्रतिपाद्यः न कोपि पदार्थः प्रमाणसिद्धोऽस्ति । यमिमे लक्षणाभिधे बोधयेताम् ।

किं च मुख्यार्थस्य बाधदशायामेव लक्षणाया अवतारः । नात्र तथा इति न तया निर्वाहः । अतएव उदयनाचार्यैरभिहितम्—

श्रुतान्वयादनाकांक्षं न वाक्यं ह्यन्यदिच्छति ।
पदार्थान्वयवैधुर्यात् तदाक्षिप्तेन संगतिः ॥

अयमर्थः—पदानां परस्परम् अन्वयबोधे जाते वाक्यं न किमपि अन्यदिच्छति । किन्तु यदि पदार्थानां परस्परमन्वयस्य वैधुर्यं (अनुपपत्तिः) भवति तदा आक्षिप्तेन (शक्यार्थ सम्बन्धेन) अर्थेन संगतिर्विधीयते । एतेनेदं सिद्धं यत् मुख्यार्थबाधदशायामेव लक्षणाया गतिः ।

शून्यं वासगृहमित्यादौ न मुख्यार्थस्य बाधः । येन तत्र व्यङ्ग्यार्थस्य बोधनाय लक्षणाया आवश्यकता भवेत् ।

न च गंगायां घोष इत्यत्र शीतत्वपावनत्वप्रतीतिरपि लक्ष्य (लक्षणावृत्त्या बोध्य) एवेति वाच्यम् । एवं स्वीकारे गंगापदस्य तटरूपोऽर्थो मुख्यः स्वीकर्तव्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भविष्यति। स च बाधितोऽपि भविष्यति। यदि शीतत्वादिप्रयोजनानां लक्ष्यत्वं तदा तस्यापि प्रयोजनान्तरमिति अनवस्थापातः।

न च प्रयोजनविशिष्टे तीरे लक्षणा इति वाच्यम्। विषयप्रयोजनयोरेककालावच्छेदेन प्रतीत्यनभ्युपगमात्। नीलादिसंवेदनानन्तरमेव ज्ञाततया अनुव्यवसायस्य वा सम्भवः इति न लक्षणाभिधे रसस्य बोधिके इति सिद्धम्।

(४४) प्रश्नः—नीलादिसंवेदनानन्तरमेव ज्ञाततया अनुव्यवसायस्य वा सम्भव इति पंक्तिः सोपष्टम्भं व्याख्येया ?

उत्तरम्—मीमांसकानां–प्रस्थानत्रयं विद्यते, प्रभाकर–कुमारिल–मुरारिमिश्रप्रस्थानमिति। तत्र ज्ञानस्य स्वप्रकाशतया (स्वविषयकतया) व्यवसायेनैव प्रामाण्यं गृह्यते प्रभाकराणां मते। अनुव्यवसायेन प्रामाण्यं गृह्यते मुरारिमिश्राणाम्। ज्ञानस्यातीन्द्रियतया ज्ञातताल्गिकानुमित्या प्रामाण्यं गृह्यते कुमारिलभट्टानां मते।

तत्र गुरुमते—ज्ञानग्राहिका सामग्री व्यवसायात्मिका। यतः तन्मते सर्वस्य ज्ञानस्य "अयं घटः घटविषयकज्ञानवानहमित्येवं रूपेण ग्रहणात्"।

भट्टमते च–ज्ञातता लिंगकानुमितिः। सा च ज्ञानजन्यविषयनिष्ठः प्राकट्यापरपर्यायो धर्मः। यथा—घटादिविषये ज्ञाने जाते "मया ज्ञातोऽयं घटः" इति घटस्य ज्ञातता प्रतिसन्धीयते। तेन ज्ञाने जाते सति ज्ञातता नाम कश्चिद्धर्मो जात इत्यनुमीयते। सा च ज्ञाने जाते जाता। अतः ज्ञानजन्या इत्यप्यनुमीयते। एवं च ज्ञानजन्योऽसौ ज्ञातता नाम धर्मो ज्ञानमन्तरेण नोपपद्यते कारणाभावे कार्यानुत्पादात्।

प्रकृते यथा नीलज्ञानानन्तरमेव भट्टमते ज्ञाततायाः, मिश्रमते अनुव्यवसायस्य सम्भवः न नीलज्ञानसमकालमेव तथैव न प्रयोजनविशिष्टे लक्षणा। विषयप्रयोजनयोः पौर्वापर्यस्य नियतत्वाद् इति दिक्।

(४५) प्रश्नः—महिमभट्टमतेन व्यङ्ग्यस्यानुमानगतार्थतां संसाध्य तत्खण्डनप्रकारः प्रदर्शनीयः ?

उत्तरम्—ननु व्यञ्जनावृत्तेः अनुमान एवान्तर्भावस्तथा च काव्यं रसान्वितं, विभावादिमत्वात् इत्यनुमानेनैव रसादिव्यङ्ग्यज्ञानसम्भवे तदर्थं व्यञ्जनावृत्तेः अङ्गीकरणमनर्थकमेवेति व्यक्तिविवेककाराणां महिमभट्टानां मतम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

तेषामयमभिप्रायः—"विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति भरतसूत्रम् । विभावादीनां प्रतीतिर्हि रसादिप्रतीतेः साधनं (हेतुः)। ते च विभावादयः रत्यादिभावानां कारणकार्यसहचारिणो भवन्ति । यथा विभावः रत्यादेः कारणम्, अनुभावश्च कटाक्षभुजक्षेपादिः कार्यम् । लज्जादयः रतेः सहचारिणः । एते च विभावादयः रत्यादीननुमापयन्त एव रसादीन् निष्पादयन्ति ।

यथा शकुन्तला दुष्यन्तविषयकरतिमती तस्मिन् विलक्षणस्मितकटाक्षवत्वात् या नैत्रं सा नैवं यथा अन्या स्त्री, अनेन प्रकारेण पूर्वं रतिरनुमीयते । सा चास्वादपदवीं गता रससंज्ञां वहति ।

न च विभावादिप्रतीत्युत्तरं रतेरनुमानं स्वीक्रियते कार्यात् कारणस्य पूर्वभावित्वनियमेन कथमनुमानमिति वाच्यम् ? तत्र क्रमस्यावश्यं सत्त्वात्, केवलमाशुभावितया न लक्ष्यते । यथा भवतां मतेऽपि प्रथमं विभावाद्युपस्थितिः, ततो रत्यादिव्यञ्जनम्, ततः साधारण्याभिमानः, ततो रसाद्युत्पत्तिः, इति क्रमसत्त्वेऽपि आशुभावितया असंलक्ष्यक्रमत्वमुपपन्नं भवति तथैवास्माकं मतेऽपि क्रमिकानुमितिर्भविष्यति एवेति चेत् ?

अत्रोच्यते—किं शब्दाभिनयसमर्पितविभावादिप्रत्ययानुमितरामादिगतरागादिज्ञानमेव रसत्वेनाभिमतं भवतः, शब्दाभिनयजनितविभावादीनां भावनाद्वारा भावकैर्भाव्यमानः स्वप्रकाशानन्दो वा । आद्ये न विवादः—किन्तु रामादिगतरागादिज्ञानं रससंज्ञया नोच्यतेऽस्माभिः । अतः ममाभिमतः रसो न अनुमानगम्यः । द्वितीयस्तु व्याप्तिग्रहाभावात् विलक्षणकटाक्षवत्त्वरूपहेतोराभासतया अनुमितिविषय एव न ।

न च पूर्वं 'यत्र यत्र रामादिगतरागज्ञानं तत्र तत्र रसोत्पत्तिरिति' व्याप्त्या "अयं सामाजिकः शृंगारसवान् रामादिगतरागज्ञानवत्वात्, सामाजिकान्तरवत्" इत्यनुमानेन रसानुमानं भवत्येवेति वाच्यम् यथा धूमाग्न्योः व्याप्तिग्रहः अन्वयव्यतिरेकेण क्रियते । न तथा जरन्मीमांसकानां हृदये रागादिज्ञानसत्त्वेऽपि रसस्योदय इति न तादृशः व्याप्तिग्रहः । अतः हेतुर्व्यभिचारी एव । स्वस्यानुभवस्यानुमानेन साधयितुमशक्यत्वाच्च । अतः रसस्य नानुमानम् । न च व्यञ्जनाया अनुमानगतार्थता ।

न च यत्र यत्रैवंविधानां विभावानुभावव्यभिचारिणामभिनयोऽभिधानं वा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र तत्र रसोत्पत्तिः इति प्रकारेण व्याप्तिः पक्षधर्मता च सुगमैवेति । एवं च या सामग्री व्यञ्जनावादिनां मते व्यङ्ग्यार्थाभिव्यक्तेः कारणं सैव मम मते अनुमितेः साधनमिति वाच्यम् । इष्टापत्तेः नहि ईदृशी प्रतीतिरास्वाद्यत्वेनास्माकमभिमता । किन्तु स्वप्रकाशमात्रविश्रान्तः सान्द्रानन्दनिर्भरः । तेनात्र सिषाधयिषितादर्थादर्थान्तरसाधनाद्धेतोराभासता इति दिक् ।

(४६) प्रश्नः—महिमभट्टाभिमतं वस्त्वलंकारयोरनुमानगतार्थत्वं संसाध्य तस्य खण्डन-प्रकारः प्रदर्शनीयः ?

उत्तरम्—ननु भ्रम धार्मिक विस्रब्धमित्यत्र व्यज्यमानं वस्तु अभ्रमणरूपं तदपि अनुमानमेव । यथा गोदावरीतीरं भीरुभ्रमणायोग्यं सिंहवत्त्वात् यन्नैवं तन्नैवं यथागृहम् । "यद् यद् भीरुभ्रमणं तत् तत् भयकारणनिवृत्त्युपलब्धिपूर्वकम्" इति व्याप्तिः । अनेन गोदावरीतीरं भीरुभ्रमणायोग्यमनुमीयते इति चेन्न ? हेतोर्व्यभिचारित्वात् । यद्यत् भीरुभ्रमणं तत् तत् भयकारणनिवृत्त्युपलब्धिपूर्वकमिति व्यतिरेकव्याप्तिरेवासिद्धत्वात् । भीरोरपि कार्यगौरवेण भ्रमणकारित्वस्योपलब्धेः । किं च वक्तुः वचनमात्रेण श्रोतुः भीरुत्वेपि न प्रमाणम् ।

एवमेव "जलकेलितरलेत्यत्र" राधिकावदनं, चन्द्रः, आत्मदर्शनद्वारा चक्रवाकयोः विघटनसंघटनकारित्वात्, यथा चन्द्रः इत्यनुमानेनैव रूपकालंकारोऽनुमेय इत्यपि न सम्यक् ।

यतो हि नहि चन्द्र एव तयोः विघटनसंघटनकारीति नियमः । व्याधदर्शनादपि तत्सम्भवात् । रात्रौ चन्द्रदर्शनाभावेऽपि तयोर्विघटनस्य दृष्टत्वात् हेतुः व्यभिचारी । अतः नालंकारव्यङ्ग्यस्यानुमाने गतार्थता ।

एतेन 'अनुमानं नाम पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तत्वविशिष्टाल्लिङ्गाल्लिंगिनो ज्ञानम् । ततश्च वाच्यादसम्बद्धोऽर्थस्तावन्न प्रतीयते अन्यथा अतिप्रसङ्गः स्यात् इति बोध्यबोधकयोरर्थयोः कश्चित् सम्बन्धोऽस्त्येव । ततश्च बोधकोर्थो लिङ्गम्, बोध्यश्च लिंगी । बोधकस्य चार्थस्य पक्षसत्त्वं निबद्धमेव । सपक्षसत्त्वविपक्षव्यावृत्तत्वे अनिबद्धेऽपि सामर्थ्यादवसेये । तस्मादत्र यो वाच्यार्थाल्लिंगरूपाल्लिंगिनो व्यङ्ग्यार्थस्यावगमस्सोऽनुमान एव पर्यवस्यति' इति परास्तम् ।

एवं "दृष्टिं हे प्रतिवेशिनि" इत्यत्र परकामुकोपभोगस्य लिङ्गिनः तनूल्लिखनादिकम् लिङ्गम् । यथा इयं, परकामुकोपभोगवती एकाकितया स्रोतोगमने सति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

तनूल्लिखनवत्त्वात् कुलटान्तरवत् । अयमपि हेतुः व्यभिचारी । यतो हि यत्र यत्र एकाकितया स्रोतोगमने सति तनूल्लिखनं तत्र तत्र परकामुकोपभोगः इति व्याप्तिर्न सम्भवति स्वकान्तस्नेहेनगमनस्य तनूल्लिखनस्य च सम्भवात् ।

एवं "निःशेषच्युतचन्दनं स्तनतटं" इत्यत्रापि तैस्तैर्लिंगैः दूत्यास्तत्कामुकोपयोगोनुमीयते इत्यपि न सम्यक् । यतः तन्न प्रतिपाद्यया दूत्या, न वा तत्कालसन्निहितैरन्यैः, चन्दनच्यवनादीनां स्नानादिनापि सम्भवात् । न वा काव्यार्थभावनया सहृदयैस्तथाविधाभिप्रायविरहस्थले व्यभिचारः, अतः नानुमाने गतार्थता व्यङ्ग्ययोः वस्त्वलंकारयोरिति दिक् ।

(४७) प्रश्नः—रसस्य अर्थापत्तिवेद्यत्वं निरस्य सूचनबुद्धिवेद्यत्वं स्मृतित्वं च खण्डनीयम् ?

उत्तरम्—ननु रसस्यार्थापत्त्यैव बोधे सिद्धे अलं व्यञ्जनया इति चेन्न ? अर्थापत्तिर्हि व्याप्तिज्ञानमुपजीव्यैव प्रवर्तते । यथा—"यो हि जीवति स कुत्राप्यवतिष्ठते जीवति चात्र गोष्ठ्यामविद्यमानश्चैत्रः" इति । व्याप्तिज्ञानं च व्यभिचारसंदेहे नहि भवत्येव इति नार्थापत्तिप्रमाणवेद्यता रसस्येति ।

न च वस्त्रविक्रयादौ तर्जनीतोलनेन दशसंख्यादिवत् सूचनबुद्धिवेद्योप्ययं रसः स्यादिति वाच्यम् । संकेतादिप्रमाणसापेक्षत्वेन सूचनबुद्धेरपि अनुमानप्रकाराङ्गीकारात् ।

न च संस्कारजन्यं ज्ञानं स्मृतिरिति स्मृतिलक्षणानुरोधेन संस्कारजन्यत्वाद् रसादिबुद्धिः स्मृतिः स्यादिति वाच्यम् । प्रत्यभिज्ञायां व्यभिचरितत्वेन हेत्वाभासतापत्तेः । तथाहि—पूर्वदृष्टस्य देवदत्तस्य पुनर्दर्शने "सोऽयं देवदत्तः" इति ज्ञानं प्रत्यभिज्ञा । अत्र "सः" इत्यंशः स्मृतेः, "अयं" इत्यंशस्तु प्रत्यक्षस्य । प्रत्यभिज्ञाया अपि संस्कारजन्यत्वात् स्मृतिव्यतिरिक्तत्वाच्च नायं हेतुरव्यभिचारी । अनुमानाकारश्च रसज्ञानं स्मृतिः संस्कारजन्यज्ञानत्वात् स्मृत्यन्तरवत् इति—अतः न रसज्ञानं स्मृतिः ।

(४८) प्रश्नः—रसात्मकवाक्यस्य काव्यत्वाङ्गीकारे वाक्यस्य न दर्शनयोग्यता इति कथं काव्यस्य दृश्यत्वसिद्धिरिति विचार्य लिखत ?

उत्तरम्—ननु वाक्यं रसात्मकं काव्यमिति काव्यलक्षणम् । तत्र वाक्यस्य काव्यत्वाङ्गीकारे तस्य च वाक्यस्य दर्शनायोग्यत्वात् कथं काव्यस्य दृश्यभेदसिद्धि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रिति चेन्न ? वाक्यस्य पदसमूहत्वेन पदस्य च विभक्तिविशिष्टशब्दरूपत्वेन शब्दार्थयोश्चाभिन्नतया वाक्यस्यापि शब्दात्मकत्वार्थात्मकत्वस्वीकारेण तत्र शब्दतात्पर्येण श्रव्यभेदस्य अर्थतात्पर्येण च दृश्यभेदस्य सिद्धिरिति दिक् ।

४९ प्रश्नः—काव्यंस्य ध्वनिगुणीभूतव्यङ्ग्यदृश्यश्रव्यभेदैश्च चातुर्विध्यात् काव्यं चतुर्धा इति कुतो नोक्तमिति विचार्यताम् ?

उत्तरम्—ननु काव्यस्यैव चतुर्विधस्य सत्त्वात् कथमेकत्र द्वयोः ध्वनिगुणीभूतव्यङ्ग्ययोः अपरत्र दृश्यश्रव्ययोश्च पृथक् पृथक् निर्देशः इति चेत् श्रूयताम् ? काव्यस्य रसात्मकवाक्यत्वात् रसस्य च चमत्कारसारत्वात् चमत्काराणां च कुत्रचिदुत्तमत्वं कुत्रचिदधमत्वमिति चमत्कारद्वैविध्येन काव्यस्य ध्वनिगुणीभूतव्यङ्ग्यभेदः पृथक्निर्दिष्टः ।

अपरञ्च काव्यं वाक्यम् । वाक्यं च पदसमूहः । पदं च शब्दरूपं 'घट इत्ययं शब्दः, घट इत्ययमर्थः इति शब्दार्थयोरभेदव्यवहारदर्शनेन शब्दस्य श्रव्यत्वं, अर्थस्य दृश्यत्वं सिद्ध्यति । तत्र दृश्यकाव्येन अभिनयादिना काव्यार्थबोधः । श्रव्यकाव्येन उपदेशादित इति उभयोर्भेदः । अतः अयं काव्यशरीरनिर्धारको भेद इति उभयोः पृथक् पृथक् परिगणनमिति दिक् ॥

(५०) प्रश्नः—अभिनयस्य लक्षणमभिधाय तद्भेदांश्च प्रदर्श्य रूपकाणि कति उपरूपकाणि च कति इत्यभिधाय प्रस्तावनाया लक्षणं निरूप्यताम् ?

उत्तरम्—अवस्थानुकारोऽभिनयः । स च चतुर्विध आङ्गिकः, वाचिकः, आहार्यः, सात्त्विक इति भेदात् । अर्थात् अंगेन, वचनेन, वेषरचनया स्तम्भस्वेदादिभिश्च रामयुधिष्ठिरादीनामवस्थानुकरणमभिनयपदव्यवहार्यम् । स एव नटे रामादिरूपारोपात् रूपकमित्युच्यते । रूपकाणि च दश नाटक, प्रकरण, भाण, व्यायोग, समवकार, डिम, ईहामृग, अंक, वीथी, प्रहसन भेदेन । एवमष्टादशोपरूपकाणि भवन्ति । नाटिका, त्रोटक, गोष्ठी, सट्टक, नाट्यरासक, प्रस्थान, उल्लाप्य, काव्य, प्रेंखण, रासक, संलापक श्रीगदित, शिल्पक, विलासिका, प्रकरणी, हल्लीश, भाणिका भेदेन । तत्र—

नटी विदूषको वापि पारिपार्श्वक एव वा,
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

चित्रवाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥ इति ।

प्रधानप्रबन्धसंकल्पकत्वमेव प्रस्तावनायाः लक्षणम् । एवं च उद्घात्यक, कथोद्घात, प्रयोगातिशय, प्रवर्तक अवलगितेषु प्रस्तावनाभेदेषु सर्वत्र प्रधान-नाटकस्य संकल्पकत्वसत्त्वात् प्रस्तावनालक्षणं संगच्छते इति दिक् ।

(५१) प्रश्नः—नान्द्याः लक्षणमुक्त्वा तस्य युक्तायुक्तत्वे विवेचनीये ?

उत्तरम्—ननु रङ्गविघ्नोपशान्तये नान्द्याः कर्तव्यत्वं स्वीकृतम् । तत्र का नाम नान्दी इत्यपेक्षायां श्रूयताम् ।

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥
मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी ।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥

नन्दन्ति काव्यानि, कवीन्द्राः, कुशीलवाः, पारिषद्याश्च यस्यां सा नान्दी । यस्माद् आशीर्वचनसंयुक्ता देवद्विजनृपादीनां स्तुतिः प्रयुज्यते तस्मात् नान्दी इति संज्ञिता जाता । तत्र मङ्गलाशंसीनि शङ्खादिपदानि द्वादशसंख्याकानि अष्टसंख्याकानि वा भवन्ति ।

तत्र अष्टपदा अनर्घराघवे यथा—

निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः ।
कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने ॥
याभ्यामर्धविबोधमुग्धमधुरश्रीरर्धनिद्रायितो ।
नाभीपल्लवपुंडरीकमुकुलः कम्बोः सपत्नीकृतः ॥
विरमति महाकल्पे नाभीपथैकनिकेतन— ।
स्त्रिभुवनपुरः शिल्पी यस्य प्रतिक्षणमात्मभूः ॥
किमधिकरणा कीदृक् कस्य व्यवस्थिति— ।
रित्यसावुदरमविशद्द्रष्टुं तस्मै जगन्निधये नमः ॥

न च अत्र उभाभ्यां श्लोकाभ्यामष्ट पदानान्दी कथं सम्पद्यते । प्रतिपद्यमनेकेषां पदानां सत्त्वादिति वाच्यम् व्याख्याभेदेन पद शब्दस्य पादपरत्वस्वीकारेणादोषात् । अतएव नाट्यसूत्रस्य पञ्चमाध्याये—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूत्रधारो पठेन्नान्दीं मध्यमं स्वरमाश्रितः ।
नान्दीं पदैर्द्वादशभिरष्टाभिर्वाप्यलंकृताम् ॥

अस्यार्थं अभिनवभारव्यामभिनवगुप्तपादाचार्याः इत्थं कुर्वन्ति । अनेन, त्र्यस्रतालानुगता त्रिपदा, षट्पदा, द्वादशपदेति, चतुरस्रतालानुगता चतुष्पदा अष्टपदा षोडशपदेति पृथक् त्रिविधैव, नातः परमपि भूयस्त्वाद्दतेति। पदानि श्लोकावयवभूतानि तिङन्तानि सुबन्तानि वा श्लोकतुरीयांशरूपाणि वा अवान्तररूपाणि इति व्याख्यायोक्तम् आचार्यस्वरसादवान्तरवाक्येष्वेव पदत्वम् । एतदेवाभिप्रेत्य नाट्यप्रदीपे—श्लोकपादः पदं केचित्, सुप्तिङन्तमथापरे । परेऽवान्तरवाक्यैकस्वरूपं पदमूचिरे इति प्रतिपादितम् ।

द्वादशपदा यथा पुष्पमालायाम्

शिरसिधृतसुरापगे स्मरारा
वरुणमुखेन्दुरुचिर्गिरीन्द्रपुत्री
अथ चरणयुगानते स्वकान्ते
स्मितसरसा भवतोऽस्तु भूतिहेतुः ।

अत्र द्वादशपदादि स्पष्टानि । एतन्नान्दीति कस्यचिन्मतानुसारेणोक्तम् । वस्तुतस्तु पूर्वरङ्गस्य रङ्गद्वाराभिधानमङ्गम् इत्यन्ये । यदुक्तम्—

यस्मादभिनयो ह्यत्र प्राथम्यादवतार्यते ।
रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्मकम् ।

उक्तप्रकारायाश्च नान्द्या रङ्गद्वारात्प्रथमं नटैरेव कर्तव्यतया न महर्षिणा निर्देशः कृतः ।

कालिदासादिमहाकविप्रबन्धेषु च—

वेदान्तेषु यमाहुरेकपुरुषं व्याप्यस्थितं रोदसी ।
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दोः यथार्थाक्षरः
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते ॥
स स्थाणुः स्थिरभक्तियोगसुलभो निः श्रेयसायास्तुवः ।

एवमादिषुनान्दीलक्षणायोगात् । काव्येन्दुप्रकाशे तु—नीली शुद्धाभेदेन नान्द्याः द्वैविध्यं स्वीकृत्य 'या स्रष्टुः सृष्टिराद्याइत्यस्य, निष्प्रत्यूहमुपास्महे—इत्यस्य च नीलीत्वम् वेदान्तेषु—इत्यादेः शुद्धात्वं गणितम् । विश्वनाथेन तु

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

कालिदासीयनाटकेषु नान्दीलक्षणायोगात् तेषु नान्दीत्वं स्वीक्रियत एव न। तन्मते तु तेषां रङ्गद्वारत्वमेव सुवचम्। अत्र एव बहुषु पुस्तकेषु नान्द्यन्ते सूत्रधारः इत्यनन्तरमेव वेदान्तेषु–इत्यादीनां श्लोकानां पाठो दृश्यते। इत्थं च नाटकेषु यत्र नान्दी नास्ति तत्र तस्य रङ्गद्वारत्वं कल्पनीयम्। यत्र नान्दी वर्तते तत्र उभयं बोध्यम्। यत्र अनेके श्लोकाः तत्र आद्यानां नान्दीत्वमन्येषां रङ्गद्वारत्वं कल्पनीयमिति दिक्।

(५२) प्रश्नः—संधीनां लक्षणमभिधाय महाकाव्यस्य लक्षणमभिधाय च कथाख्यायिकयोः को भेद इति सुस्पष्टमभिधीयताम्?

उत्तरम्—ननुसन्धीनां किं लक्षणमिति चेत् श्रूयताम्? एकस्य मुख्यप्रयोजनस्यान्वये घटकत्वसम्बन्धे सति अन्तरैकार्थसम्बन्धोऽवान्तरैकप्रयोजनसत्तासम्बन्धः सन्धिः। स च मुख,–प्रतिमुख–गर्भ–विमर्श–उपसंहृति भेदेन पञ्चधा। एतेषां लक्षणानि क्रमशः—अनेकार्थवृत्तान्तरससम्बन्धवत्त्वे सति प्रारम्भावस्थायोगित्वे सति बीजोत्पत्तिमत्त्वं मुखसन्धेः लक्षणम्।

प्रतिमुखसन्धेः—लक्षणं तु—मुखसन्धिनिविष्टफलस्य मुख्यहेतोः ईषत् प्रकाशकत्वम्।

गर्भसंधेः—पूर्वसन्धिद्वये किञ्चिदुद्भिन्नस्य मुख्यप्रयोजनं प्रति प्रधानसाधनस्य मुहुर्मुहुः ह्रासप्रकाशवान् समुद्भेदः गर्भसन्धिः।

विमर्शसन्धिः—गर्भसन्ध्यपेक्षयाधिकं प्रकाशितस्य प्रधानप्रयोजनस्य हेतुः; अथ च शापादिभिः विपक्षकृतबाधादिभिश्च सान्तरायः विमर्शसन्धिः। विमृश्यते पात्रैः कर्त्तव्यमिति विमर्शः इति शब्दार्थः।

उपसंहृतिसन्धिः—नियमतः कविनिबद्धाबीजवन्तः पूर्वोक्तविषयाः केवलमुख्यप्रयोजनसाधनोपकरणभावं कविनैव यत्र प्राप्यन्ते स उपसंहारसन्धिः। अयमेव निर्वहणसन्धिरपि। निर्हवति मुख्यफलं सम्पद्यते अस्मिन्निति निर्वहणमिति व्युत्पत्तिः।

महाकाव्यस्य लक्षणम्—सर्गबन्धवत्वे सति रसवत्पद्यसमूहविन्यासवत्त्वं महाकाव्यस्य लक्षणम्।

तत्र एकः देवप्रकृतिकनायकः सद्वंशोद्भवः, क्षत्रियो वा धीरोदात्तः, बहवः तद्वंशीयाः वा, एकरसप्रधानं, इतिहासप्रसिद्धवृत्तान्तं' चतुर्वर्गवर्णनयुतं तद्भवेत् तत्र नमस्कारः, आशीर्वादो वा, वस्तुनिर्देशो वा, क्वचित् खलनिन्दा, सज्जन-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रशंसा, एकवृत्तमयैः पद्यैः अन्ते च अन्यवृत्तैः मध्यमपरिमाणैः अष्टाधिकैः सर्गैः युक्तम् । सर्गान्ते अग्रिमसर्गकथासूचनम् इत्याद्यनेकगुणयुक्तम् महाकाव्यम् ।

ननु कथाऽऽख्यायिकयोः को भेदः इति श्रूयताम् गद्यनिर्मितस्य सरसस्य वस्तुनः कथा इति संज्ञा । तत्र च मध्ये मध्ये क्वचित् आर्याछन्दः क्वचित् वक्त्रापवक्त्रनामकं छन्दः स्यात् । आदौ च नमस्कारश्लोकाः खलादीनां च कीर्तनं कथायां भवति । यथा कादम्बर्याम् ।

गद्यनिर्मितस्य जातिवंशवर्णनसहितस्य सरसस्य वस्तुनोवर्णनस्य आख्यायिका इति संज्ञा । अस्यां अन्यकविनिबद्धानामपि वृत्तानां क्वचित् क्वचित् निवेशः । कथानां व्यवच्छेदकः स च आश्वाससंज्ञकः स्यात् । आर्यादिछन्दोभिः केनाप्यपदेशेन आश्वासमुखे कथनम् । यथा शिवराजविजये ।

एतेनेदं सिद्धम् यत् आश्वासशून्या कथा । आश्वासयुक्ता आख्यायिका । कथायां स्वनिर्मितपद्यानामेव प्रवेशः । आख्यायिकायां तु अन्यनिर्मितपद्यानामपि इति विशेषः ।

न च पञ्चतन्त्रीयानां कथानां का व्यवस्थेति वाच्यम् । कथा द्विविधा एका विशेषलक्षणयुक्ता, अपरा च कथ्यते या सा कथा इति व्युत्पत्तिमात्रशरणा । तत्र गद्यकाव्यलक्ष्यभूता कथा तु कादम्बरी एका । व्युत्पत्तिनिष्पन्ना या कथा सा लोके "कहानी" रूपेणोच्यमाना कथैव ।

न च आख्यायिकोक्तलक्षणहीनानामाख्यायिकापदव्यवहारो न युक्त इति वाच्यम् ?

"अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः"

इति वचनात् । तासामपि आख्यायिकायामेव गतार्थत्वात् । अत इदं सिद्धं यत् एकं सरसं वस्तु यदि आश्वासादिभेदैः कृतं स्यात्तदा आख्यादिका, यदा आश्वासहीनं स्यात्तदा कथा इति ।

इति प्रथमखण्डम् ।

(५३) प्रश्नः—दोषस्य लक्षणमभिधाय कतिविधश्च स इति विविच्यताम् ।

उत्तरम्—साक्षात् परम्परासम्बन्धेन वा उद्देश्यप्रतीतिविघातकत्वं दोषसामान्यलक्षणम् । उद्देश्या च प्रतीती, रसवत्यविलम्बितानपकृष्टरसविषया च,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

नीरसे तु विलम्बिताऽचमत्कारकारिणी चार्थविषया, तथा च उद्देश्यप्रतीतिविघातकत्वं सर्वेषामविशिष्टम् । यतः दुष्टेषु—क्वचिद् रसस्याप्रतीतिरेव, क्वचित् रसादिप्रकर्षप्रतीतिप्रतिबन्धः, क्वचित् विलम्बः, एवं नीरसे क्वचित् मुख्यभूतस्यार्थस्याप्रतीतिरेव, क्वचिद् विलम्बेन प्रतीतिः, क्वचित् अचमत्कारित्वम् इति उद्देश्यप्रतीतिविघातकत्वं स्पष्टमेव ।

रसविघातकता च कस्यचिद्दोषस्य साक्षात् यथा रसदोषाणाम् । कस्यचित् परम्परया यथा शब्ददोषाणामर्थदोषाणाञ्च । तेष्वपि कस्यचिदर्थोपस्थित्यभावात् । यथा असमर्थत्वादेः । कस्यचिद् विलम्बात् । यथा निहतार्थत्वादेः । कस्यचिद् वाक्यार्थबोधाभावात् । यथा च्युतसंस्कारत्वादेः । कस्यचिदर्थबोधे विलम्बात् । यथा—क्लिष्टत्वादेः । कस्यचित् सहृदयवैमुख्यव्यग्रताद्यापादनेन । यथा निरर्थकत्वादेः । कस्यचिद् विरोध्युपस्थापनेन विपरीतोपस्थापनेन वा । यथा—विरुद्धमतिकारित्वादेः । विघातकत्वं तु कस्यचिद् ज्ञातस्य । यथा व्याहतत्वादेः । कस्यचित् स्वरूपसत एव । यथा निहतार्थत्वादेः ।

स च दोषः द्विविधः । नित्योऽनित्यश्च । तत्रानुकरणादन्येन प्रकारेण समाधातुमशक्यो नित्यः । यथा च्युतसंस्कारादिः । अनित्यः पुनः क्वचिदुपादेयः । यथा दुःश्रवत्वादिः । अथवा सर्वदैव हेयो नित्यः । यथा च्युतसंस्कारादिः । तदन्योऽनित्यः यथा—शृंगारे हेयस्यापि दुःश्रवत्वस्य रौद्रादौ उपादेयतैव ।

स च दोषः पञ्चविधः । पददोष—पदांशदोषवाक्यदोषार्थदोष—रसदोषाश्चेति ।

(५४) प्रश्नः—सलक्षणोदाहरणान् पददोषान् प्रतिपादयत ।

उत्तरम्—दोषाणां नामानि	उदाहरणानि
दुः श्रवत्वम्	कार्तार्थ्यं या तु तन्वङ्गी कदागङ्कवशंवदा ।
परुषवर्णतया श्रुति दुःखावहत्वम् ।	अत्र तथयो रेफयोर्योगेन पारुष्यात् ।
अश्लीलत्वम्	
(क) व्रीडाव्यञ्जकं	दृप्तारि विजये राजन् साधनं सुमहत्तव ।
(ख) जुगुप्साव्यञ्जकम्	प्रससारशनैर्वायुः—
(ग) अमङ्गलव्यञ्जकम्	विनाशे तन्वि ते तदा ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

	अत्र साधन, वायु विनाश शब्दाः श्लीलाः।
अनुचितार्थत्वम्	शूरा अमरता यान्ति पशुभूता रणाध्वरे
कविभिरनादृतत्वम्	अथ पशुपदं कातर्यं व्यनक्ति।
अप्रयुक्तत्वम्	भाति पद्मः सरोवरे
	अथ पद्म शब्दः पुंलिङ्गः।
ग्राम्यत्वम्	कटिस्ते हरते मनः
	अथ कटिशब्दो ग्राम्यः
अप्रतीतत्वम्	योगेन दलिताशयः
	अत्र आशयशब्दः योगशास्त्रे प्रसिद्धः
सन्दिग्धत्वम्	आशीः परम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु
नेयार्थत्वम्	कमले चरणाघातं मुखं सुमुखि तेऽकरोत्
निहतार्थत्वम्	यमुनाशम्बरमम्बरं व्यतानीत्
अवाचकत्वम्	गीतेषु कर्णं मादत्ते। अथवा दिनं मे त्वयि सम्प्राप्ते ध्वान्तच्छन्नापि यामिनी।
क्लिष्टत्वम्	क्षीरोदजावसतिजन्मभुवः प्रशन्नाः
विरुद्धमतिकारित्वम्	भूतयेऽस्तु भवानीशः—
अविमृष्टविधेयांशभावः	स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः।

एते समासगता एव पददोषाः

वाक्यगताः दोषाः—

दुःश्रवत्वम्	स्मरार्त्यन्धः कदालप्स्ये कार्तार्थ्यं विरहे तव।
अश्लीलत्वम्	
(क) व्रीडाव्यञ्जकम्	न साधनोन्नतिर्या स्यात् कलत्रारतिदयिनी।
(ख) जुगुप्साव्यञ्जकम्	कृतप्रवृत्तिरन्यार्थे कविर्वान्तं समाश्नुते।
(ग) अमङ्गलव्यञ्जकम्	पितृवसतिमहं प्रयामि तां सह परिवारजनेन यत्र मे। भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अनुचितार्थत्वम्	कुविन्दस्त्वं तावत् पटयसि गुणग्राममभितो यशो गायन्त्येते दिशि दिशि च नग्नास्तव विभो । शरज्ज्योत्स्नागौरस्फुटविकटसर्वांग-सुभगा तथापित्वत्कीर्तिर्भ्रमति विगता-च्छादनमिह ।
अप्रयुक्तत्वम्	स रातुनो दुश्च्यवनो भावुकाना परम्पराम् ।
ग्राम्यत्वम्	ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानवः।
अप्रतीत्वम्	तस्याधिमात्रोपायस्य तीव्रसंवेगिताजुषः ।
संदिग्धत्वम्	दृढभूमिः प्रियप्राप्तौ यत्नः स फलितः सखे ।
नेयार्थत्वम्	उद्यत् कमललौहित्यं वक्राभिर्भूषिता तनुः। सुरालयोल्लासकरः प्राप्तपर्याप्तकम्पनः । मार्गणप्रवणोभास्वद्भूतिरेवविलोक्यताम्।
निहतार्थत्वम्	सायकसहायवाहोर्मकरध्वजनियमितक्षमा-धिपतेः । अब्जरुचिभासुरस्ते भातितरामव-निपश्लोकः ।
अवाचकत्वम्	नमन्नृपतिमण्डली मुकुटचन्द्रिकादुर्दिन— स्फुरच्चरणपल्लवप्रतिपदोक्तदोः सम्पदा । अनेन सृजतेतरां तुरगमेधमुक्तभ्रमत् तुरङ्गखुरचन्द्रकप्रकरदन्तुरा मेदिनी ।
क्लिष्टत्वम्	धम्मिलस्य न कस्य प्रेक्ष्य विकामं कुरंग-शावाक्ष्याः । रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम् ।
विरुद्धमतिकृत्वम्	श्रितक्षमाः रक्तभुवः शिवालिङ्गितमूर्तयः विग्रहक्षपणेनाद्य शेरते ते गतासुखाः।
अविमृष्टविधेयांशभावः	न्यक्कारोह्ययमेव मे यदरयः—

एते वाक्यगताऽपि पददोषाः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ पदांशगताः केचित् दोषाः

दुःश्रवत्वम्	तद् गच्छ सिद्धै कुरु देवकार्यम् ।
निहतार्थत्वम्	धातुमुत्तां गिरिधत्ते ।
अवाचकत्वम्	वर्ण्यते किं महासेनो विजेयो यस्य तारकः ।
अश्लीलत्वम्	पाणिः पल्लवपेलवः
नेयार्थत्वम्	संग्रामे निहताः शूरा वचोबाणत्वमागताः ।

एते दोषाः पदांशगता अपि ।

अथ पदमात्रगताः दोषाः—

निरर्थकत्वम्	मुञ्च मानं हि मानिनि ।
असमर्थत्वम्	कुञ्जं हन्ति कृशोदरी
च्युतसंस्कारत्वम्	गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः ।

एते पदमात्रगताः दोषाः ।

(५५) प्रश्नः—अविमृष्टविधेयांशभावस्य दोषत्वं प्रतिपाद्य उदाहरणे संगमयत ।

उत्तरम्—न विमृष्टः प्राधान्येन निर्दिष्टः विधेयांशो यत्र तत्त्वम् । प्राधान्यं च पदार्थानां मध्ये विधेयांशस्योपादेयत्वेन ग्राह्यम् । तस्य प्राधान्येन निर्देश एवोचितः । विधेयांशप्राधान्यस्य विपर्ययः क्वचित् समासेन क्वचिदुद्देश्य-विधेयपदयोः पौर्वापर्यविपर्ययेण । तथाच यत्र समासेन प्राधान्यविपर्ययः तत्र पददोषः । यत्र उद्देश्यविधेययोः पौर्वापर्यविपर्ययः तत्र वाक्यदोषता ।

पददोषः यथा "स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः" इत्यत्र वृथात्वं विधेयम् तच्च समासे गुणीभावादनुवाद्यत्वप्रतीतिकृत् । अनुवाद्यत्वं उद्देश्यत्वम् ।

अयंभावः—'उद्देश्यमनुक्त्वैव न विधेयमुदीरयेत्' इत्युक्तदिशा 'उद्देश्यविधेयताशालिबोधे विधेयवाचकप्राग्वर्त्युद्देश्यवाचकपदजन्योपस्थितिः कारणम्' इति कार्यकारणभावबलात् उद्देश्यविधेययोः पौर्वापर्यस्य नियमितत्वात् उदाहृतपद्यांशे उच्छूनत्वमुद्दिश्य वृथात्वस्य विधेयता उचिता ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

किन्तु समासे वृथात्वं उच्छूनत्वे विशेषणीभूतमिति गुणीभूतं सत् विधेयतया न प्रतीयते इति दोषः। यथा वा रक्षांस्यपि पुरःस्थातुमलं रामानुजस्य मे। अत्र रामस्येति वाच्यम्। यथा वा—आसमुद्राक्षितीशानाम्। अत्र आसमुद्रमिति असमस्तं वाच्यम्। 'यथा वा—यत्र ते पतति सुभ्रु कटाक्षः षष्ठवाण इव पञ्चशरस्य। अत्र षष्ठ इव इत्युत्प्रेक्ष्यम्। वाणशब्देन समासे तु विधेयता न प्रतीयते। यथा वा अमुक्ता भवता नाथ मुहूर्तमपि सा पुरा। अत्र अमुक्ता इत्यत्र नञः प्रसज्यप्रतिषेधत्वमिति विधेयत्वमेवोचितम्। समासे गुणीभावात् विधेयत्वेन अप्रतीतिरेव दोषः।

वाक्यगतस्य अविमृष्टविधेयांशस्योदाहरणम्—'न्यक्कारो ह्ययमेव मे यदरयः—' इत्यादि। अत्र अयमेव मे न्यक्कार इति न्यक्कारस्य विधेयत्वं विवक्षितम्। तत्र शब्दरचना वैपरीत्येन गुणीभूता। रचना च पदद्वयस्य विपरीतेति वाक्यदोषत्वम् इति दिक्।

(५६) प्रश्नः—'अमुक्ता' इत्यत्र अविमृष्टविधेयांशत्वं प्रतिपादयत।

उत्तरम्—अमुक्ता इत्यत्र न मुक्ता इति विग्रहे तत्पुरुषे कृते नञः पर्युदासतया गुणीभावात् निषेधस्य विधेयतया अप्रतीतिः। यदि न मुक्ता इति असमस्तं पदं स्यात् तदा प्रसज्यप्रतिषेधे निषेधस्य विधेयतया प्रतीतिः स्यात्। तदेव नेति अविमृष्टविधेयांशदोषः।

न च समासे नञः पर्युदासता असमासे प्रसज्यप्रतिषेधता कथमिति वाच्यम्! द्वौ नञौ तु समाख्यातौ पर्युदासप्रसज्यकौ। पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत् इति अभियुक्तोक्तदिशा यत्र विधेः अप्राधान्यं प्रतिषेधे च प्रधानत्वं तत्र प्रसज्यप्रतिषेधता। अत्र च क्रिया वाचकपदेन क्रियासमभिव्याहृतपदार्थतावच्छेदकेन सह नञः स्थितिर्ज्ञेया। यदाह—

अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्॥

यथा—नव जलधरः सन्नद्धोऽयं न दृप्तनिशाचरः।

अत्र इदं पदस्य उद्देश्यता नञर्थस्याभावस्य च विधेयता एवमत्र अयं नवजलधरत्वाभाववान् इति बोधः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यत्र तु विधेः पदार्थान्तरस्य प्रधानत्वं प्रतिषेधे उद्देश्यतावच्छेदकतया अप्रधानता उत्तरपदार्थेन सह च नञः सम्बन्धः तत्र पर्युदासः। यदाह—

प्रधानत्वं विधेर्यत्र प्रतिषेधे प्रधानता।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।

यथा—जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत्।

अत्र अत्रस्तः, अनातुरः, अनासक्तः अगृध्नुर्दिलीपः आत्मानं जुगोप, धर्मं भेजे, अर्थान् आददे, सुखमन्वभूत् इति अत्रस्ततादिकमुद्दिश्य आत्मगोपनादिकमेव विधेयम्। त्रस्तत्वाभावो न विधेयः। अतः नञः समासे गुणीभावः, पर्युदासश्च युक्तः।

ननु अश्राद्धभोजी ब्राह्मणः, असूर्यंपश्या राजदाराः, इत्यादौ यथा नञः समासेन गुणीभावेऽपि न प्रसज्यप्रतिषेधत्वहानिः तथैव अमुक्त्वा इत्यत्रापि स्यादिति चेन्न? न श्राद्धं भुङ्क्ते इति वाक्ये नञः श्राद्धशब्देनासमर्थसमासे अश्राद्ध शब्दोपपदात्भुजेः णिनिः नतु श्राद्धभोजी इत्यनेन नञः समासः। एवं सूर्यं न पश्यन्तीति विग्रहे निपातनम्।

एवं च यदि भोजनादिरूपक्रियांशेन नञः सम्बन्धः स्यात् तदैव तत्र प्रसज्यप्रतिषेधत्वं वक्तुं शक्यम्। न च तथा। विशेष्यतया प्रधानेन श्राद्धभोज्यादिरूपार्थेन कर्त्रंशेनैव नञः सम्बन्धात्।

यदाह—श्राद्धभोजनशीलो हि यतः कर्ता प्रतीयते।
न तद्भोजनमात्रं तु कर्तरीनेर्विधानतः। इति।

अमुक्त्वा इत्यत्र तु क्रिययैव सह नञः सम्बन्ध इति दोष एव इति दिक्।

(५७) प्रश्नः—यत् तत् शब्दस्थले अविमृष्टविधेयांशभावव्यवस्थां वर्णयत।

उत्तरम्—'यत्तदोर्नित्यः सम्बन्धः' इतिन्यायात् उपक्रान्तस्य यच्छब्दस्य निराकांक्षत्वप्रतिपत्तये तच्छब्दसमानार्थतया प्रतिपाद्यमानाः इदमेतदादयः शब्दाः विधेया एव भवितुं युक्ताः। 'किन्तु यच्छब्दनिकटस्थितस्य तच्छब्दस्य अथवा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

तच्छब्दनिकटस्थितस्य यच्छब्दस्य प्रसिद्धपरामर्शकत्वेन उद्देश्यत्वप्रतीतौ अविमृष्टविधेयांशभावत्वमापतति।

यथा—'आनन्दयति ते नेत्रे योऽसौ सुभ्रु समागतः' इत्यत्र यच्छब्दनिकटस्थितस्यादसः प्रसिद्धपरामर्शकत्वेन यच्छब्दस्य साकांक्षत्वप्रतीतौ अविमृष्टविधेयांशभावत्वदोषः।

'यः स ते नयनानन्दकरः सुभ्रु स आगतः' इत्यत्र यच्छब्दनिकटस्थितस्य तच्छब्दस्य प्रसिद्धपरामर्शित्वादेव निराकाङ्क्षत्वप्रतीतये पुनः तच्छब्दोपादानमपि न दोषाय।

यत्र यच्छब्दव्यवधानेन स्थितः तदादिशब्दः तत्र निराकांक्षत्वप्रतीतौ न दोषः। यथा 'आनन्दयति ते नेत्रे योऽधुनासौ समागतः' इत्यत्र यच्छब्दव्यवधानेनोपात्तः अदश्शब्दः निराकांक्षत्वमवगमयति। एवमिदमादिशब्दविषयेऽपि बोध्यम्।

यत्तदोर्नित्यः सम्बन्धश्च द्विविधः एकः शाब्दः-द्वितीयः आर्थः। यत्र यत्तदोरुभयोपादानं तत्र शाब्दः। यत्र एकस्य उभयोर्वाऽनुपादानं तत्र आर्थः। तयोः यत्र यच्छब्दव्यवधानेन स्थितः तच्छब्दः निराकांक्षत्वमवगमयति तत्र शाब्दः यथोक्तोदाहरणे। यत्र च यच्छब्दस्योत्तरवाक्यगतत्वेनोपादानं तत्र सामर्थ्यात् पूर्ववाक्ये तच्छब्दस्यार्थत्वम्। यथा—

आत्मा जानाति यत्पापम्। अत्र केवलं यच्छब्दोपादानेऽपि तदात्मा जानाति यत्पापमस्ति इत्यर्थबोधात् निराकांक्षतया न दोषः। एवम्—

यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे। भास्वन्ति रत्नानि महोषधीश्च—

इत्यादौ 'स हिमालयोऽस्ति' इति तच्छब्दस्यार्थत्वम्।

तच्छब्दस्यापि प्रक्रान्त-प्रसिद्धा-नुभूतार्थत्वे यच्छब्दस्यार्थत्वम्। तत्र प्रक्रान्ते (पूर्वप्रतीते) अर्थे यथा—

स हत्वा वालिनं वीरस्तत्पदे चिरकांक्षिते।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत्।

अत्र 'यः सुग्रीवप्रियकारी' इति पूर्वप्रकान्तस्यार्थतः प्रतीतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

प्रसिद्धार्थत्वे यथा—

'स वः शशिकलामौलिः तादात्म्यायोपकल्पताम् ;

अत्र यः लोके प्रसिद्धः पूजितः शिवः इति प्रसिद्धार्थत्वे यच्छब्दस्यार्थत्वम् ।

अनुभूतार्थत्वे यथा—

'तामिन्दुसुन्दरमुखीं हृदि चिन्तयामि ।'

अत्र 'या रूपलावण्यपूर्णा मया पूर्वं दृष्टा' इति अनुभूतार्थत्वे यच्छब्दस्यार्थत्वम् ।

समानविभक्तिका एव यच्छब्दनिकटस्थिता तदादिशब्दाः प्रसिद्धपरामर्शकत्वेन दोषाः विभिन्नलिंगविभक्तिकानां तु निकटस्थितानामपि निराकांक्षत्वप्रत्यायकतया अदोषत्वम् ।

तत्र भिन्नलिंगत्वे यथा—विभाति मृगशावाक्षी येदं भुवनभूषणम् ।

अत्र यच्छब्दः स्त्रीलिंगः इदम् शब्दः नपुंसकलिंगः निराकांक्षत्वप्रत्यायक एव ।

विभिन्नविभक्तिकत्वे यथा—

इन्दुर्विभाति यस्तेन दग्धाः पथिकयोषितः ।

अत्र यच्छब्दः प्रथमान्तः तन्निकटस्थितोऽपि तच्छब्दः तृतीयान्त इति निराकांक्षत्वप्रत्यायकतया न दोषाय ।

क्वचिद् द्वयोरनुपादानेऽपि सामर्थ्याद्द्वयोरपि अवगमः । यथा—

न मे शमयिता कोऽपि भारस्येत्युर्वि मा शुचः ।
नन्दस्य भवने कोऽपि बालोऽस्त्यद्भुतपौरुषः ।

अत्र यः (नन्दस्य भवने अद्भुतपौरुषः बालः) अस्ति स (ते भारस्य) शमयिता इति द्वयो (यत्तदोः) रार्थत्वम् ।

यत्र पूर्ववाक्ये यत् पदद्वयं उत्तरवाक्ये च एकं तत् पदं तत्र एकस्य यत्पदस्य साकांक्षत्वं न भवति । किन्तु पूर्ववाक्यस्य यद् यद् इत्यनेन केनचिद् रूपेण स्थितं सर्वात्मकं वस्तु विवक्षितम् । तथाभूतस्य तस्य एकेन तच्छब्देन परामर्शात् न साकांक्षत्वम् ।

इत्थं यत्र समानलिङ्गविभक्तिभ्यामव्यवधानेन स्थितो यत्तच्छब्दौ तत्र प्रसिद्धपरामर्शित्वात् साकांक्षतया दोषत्वम् । यथोक्तोदाहरणेषु इति दिक् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

(५८) प्रश्नः—दोषाणां दूषकताबीजं किमिति विचार्य लिखत ?

उत्तरम्—

दोषाणां नामानि	दूषकताबीजानि
१—दुःश्रवत्वम्	दुःखजनकत्वम् ।
२—अश्लीलत्वम्	असभ्यार्थान्तरोपस्थित्या श्रोतुर्वैमुख्यजनकत्वम् ।
३—अनुचितार्थत्वम्	वाच्यार्थदोषप्रतिपादकत्वम्, अर्थासम्भवः असत्समर्थकत्वम् ।
४—अप्रयुक्तत्वम्	कविसमयलंघनप्रयोजनानुसन्धानव्यग्रत्वात् मुख्यार्थविच्छित्तिः ।
५—ग्राम्यत्वम्	वक्तुरवैदग्ध्योन्नयनम् ।
६—अप्रतीतत्वम्	तच्छास्त्राज्ञाननिबन्धनार्थानुपस्थितिः ।
७—सन्दिग्धत्वम्	उद्देश्यनिश्चयाभावः । वचयोरभेदबुद्धिमूलकः सन्देहः ।
८—नेयार्थत्वम्	रसबोधविलम्बनम् ।
९—निहतार्थत्वम्	अर्थबोधविलम्बनम् ।
१०—अवाचकत्वम्	रसप्रतीतिविलम्बनम् ।
११—क्लिष्टत्वम्	अर्थबोधविलम्बनम् ।
१२—विरुद्धमतिकृत्त्वम्	देवविषयकरतिभावप्रकर्षबोधप्रतिरोधः ।
१३—अविमृष्टविधेयांशत्वम्	अर्थबोधविलम्बनम् ।
पददोषाः—	
१—निरर्थकत्वम्	श्रोतुः वैमनस्यापादनद्वारा रसापकर्षकत्वम् ।
२—असमर्थत्वम्	विवक्षितार्थाप्रत्यायकतया रसप्रतीतिबाधकत्वम् ।
३—च्युतसंस्कारत्वम्	श्रोतुर्वैमनस्यापादनेन रसप्रकर्षहानिकरत्वम् ।
वाक्यमात्रगा दोषाः—	
१—वर्णप्रतिकूलत्वम्	रसप्रतीतिप्रतिबन्धकत्वम् ।
२—लुप्ताहतविसर्गत्वम्	बहुविसर्गलोपेन स्थित्या वा रसापकर्षकत्वम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अन्येषां दोषाणां दूषकताबीजं स्पष्टं प्रतीयते इति स्वयमूहनीयम् ।

(५६) प्रश्नः—दोषाणां परस्परं भेदः प्रदर्शनीयः ?

उत्तरम्—१—दुःश्रवत्वप्रतिकूलवर्णत्वयोर्भेदः ।

दुःश्रवत्वे श्रुतिपरुषवर्णानामेव प्रयोगः । प्रतिकूलवर्णत्वे तु अनुकूले रसे न दोष इत्यनयोर्भेदः ।

२—निहतार्थत्वासमर्थत्वयोर्भेदः ।

निहतार्थत्वे—कोषादिप्रसिद्धानेकार्थस्यापि शब्दस्य तस्मिन्नर्थे विरलप्रयोगः । असमर्थत्वे तु—अनेकार्थस्यापि शब्दस्य यस्मिन्नर्थे प्रयोगासत्वेन शक्तिग्रहाभावस्तदर्थे प्रयोग इत्यनयोर्भेदः ।

३—निहतार्थत्वाप्रतीतत्वयोर्भेदः ।

निहतार्थत्वे—कोषादिप्रसिद्धानेकार्थस्यापि शब्दस्य कविभिरनादृतत्वात् अप्रसिद्धेऽर्थे अप्रयोगः । अप्रतीतत्वे तु—एकार्थस्यापि शब्दस्य सार्वत्रिकप्रयोगाभाव इत्यनयोर्भेदः ।

४—क्लिष्टत्वसंकीर्णत्वयोर्भेदः ।

क्लिष्टत्वे—एकस्मिन्नेववाक्ये अज्ञेयशब्दप्रयोगादर्थबोधव्याघातः । संकीर्णत्वे तु—एकवाक्यपठितशब्दानां वाक्यान्तरेऽनुप्रवेशात् विवक्षितार्थबोधव्याघात इत्यनयोर्भेदः ।

५—विधेयाविमर्शाऽभवन्मतसम्बन्धयोर्भेदः ।

विधेयाविमर्शे यदेव पदमविमृष्टं तदेव दुष्टम् । अभवन्मतसम्बन्धे तु—प्रधानस्य प्राधान्येनाप्रतीतेः सर्वेषां तदङ्गतया—अप्रतीतिरिति सर्वस्मिन् वाक्यार्थविरोधावभास इत्यनयोर्भेदः ।

६—अधिकपदत्व—पुनरुक्तत्वयोर्भेदः ।

अधिकपदत्वे—एकेन शब्देन प्रतिपादितस्यैवार्थस्य भङ्ग्या शब्दान्तरेणापि पुनः प्रतिपादनम् । पुनरुक्तत्वे तु—कथितस्यैवार्थस्य पुनः कथनीयत्वमित्यनयोर्भेदः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

७—न्यूनपदत्व-वाच्यानभिधेयत्वयोर्भेदः ।

न्यूनपदत्वे–वाचकपदस्यैवानभिधानम् । वाच्यानभिधेयत्वे तु–वाचकपदेन सह द्योतकस्यापि पदस्यानभिधानमित्यनयोर्भेदः ।

८—कथितपदत्वानवीकृतत्वयोर्भेदः ।

कथितपदत्वे–प्रथमं यादृशानुपूर्व्या यः शब्दः उक्तः तादृशैवानुपूर्व्या पुनः प्रयोगे दोषः । अनवीकृतत्वे तु–चमत्काराभावे कथितस्य पदस्य पर्यायान्तरेणापि पुनः कथने दोष इत्यनयोर्भेदः ।

९—पतत्प्रकर्षत्व—व्याहतत्वयोर्भेदः ।

पतत्प्रकर्षतायां—शब्दजन्यानामनुप्रासादीनां प्रकर्षस्य क्रमेण शैथिल्यम् । व्याहतत्वे तु—उक्तयोः कस्यचित् उत्कर्षापकर्षयोः पश्चादर्थपर्यालोचनेन सापेक्षः तदन्यथाप्रतिपत्तिबोध इत्यनयोर्भेदः ।

१०—समाप्तपुनरात्तत्वनिर्मुक्तपुनरुक्तत्वयोर्भेदः ।

समाप्तपुनरात्तत्वे—अन्वयबोधानन्तरं निराकांक्षस्यापि विशेषस्य विशेषणान्तरेणान्वयार्थं पुनरनुषंगः । निर्मुक्तपुनरुक्तत्वे तु—आकांक्षतस्य कारकस्य क्रियान्वयेन समाप्तावपि पुनस्तत् कारकोपादानमित्यनयोर्भेदः ।

११—संकीर्णत्वगर्भितत्वयोर्भेदः ।

एकस्मिन् वाक्ये वाक्यान्तरीयपदानां प्रवेशः । वाक्यान्तरस्यैव संकीर्णत्वम् पुनः प्रवेशे गर्भितत्वमित्यनयोर्भेदः ।

१२—अक्रमत्व–दुष्क्रमत्वयोर्भेदः ।

अक्रमत्वे–स्वार्थान्वितार्थकपदप्रत्यासत्तिरूपक्रमविपर्ययः । दुष्क्रमत्वे–पदार्थतात्पर्य्यपर्यालोचनावगम्योऽर्थस्य क्रमविपर्यय इत्यनयोर्भेदः ।

१३—अमतपरार्थत्वाश्लीलत्वयोर्भेदः ।

अमतपरार्थत्वे-नियमेन वाक्यान्वयव्यतिरेकानुविधायित्वम् । अश्लीलादौ तु–समभिव्याहृतपदार्थतात्पर्यालोचनया तदर्थकत्वकल्पनेनेति उभयोर्भेदः ।

१४—अस्थानस्थपदत्वाक्रमत्वयोर्भेदः ।

अस्थानस्थपदत्वे—वाचकपदस्योचितक्रमाभावः । अक्रमतायां तु–स्वार्थान्वितार्थद्योतकपदस्य प्रत्यासत्तिरूपक्रमस्याभाव इत्यनयोर्भेदः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

(६०) प्रश्नः—'गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः' इत्यत्र पदपदांशदोषो वाक्यदोषो वेति विविच्यताम् ?

उत्तरम्—आजघ्ने इत्यत्र आङ्पूर्वकहन्धातोः स्वाङ्गकर्मकस्यैवात्मनेपदं नियतम्। इह च तस्य नियमस्योल्लंघनात् व्याकरणलक्षणहीनत्वात् च्युतसंस्कारत्वम् दोषः।

नन्वत्र—आजघ्ने इति पदस्य स्वतो न दुष्टता अपितु पदान्तरापेक्षयैव इति अस्य वाक्यघटकानेकपदप्रयोज्यत्वात् वाक्यदोषता स्यात् न पददोषता इति चेन्न ? गुणदोषालंकाराणां शब्दार्थगतत्वेन व्यवस्थितेस्तदन्वयव्यतिरेकानुविधायित्वं हेतुः। तथा च यत्र तत्तत्शब्दसत्त्वे तेषां गुणादीनां सत्ता तदसत्त्वे च तेषामप्यसत्ता तत्र गुणादीनां शाब्दत्वम्। एवं आर्थत्वमपि बोध्यम्, गाण्डीवी कनकेतिपद्ये तु 'आजघ्ने' इति पदमात्रस्यैवान्वयव्यतिरेकानुविधायित्वम्। तथा 'आजघ्ने' इति पदसत्वे च्युतसंस्कारतादोषसत्ता तत्पदाभावे च तद्दोषासत्ता। पदान्तराणां परिवर्तनेऽपि तस्य दोषस्य तादवस्थ्यम् इति पददोषत्वमेव।

नचात्र आत्मनेपदपरिवृत्तौ दोषाभावात् पदांशदोषता स्वीकार्या इति वाच्यम्। यथेहात्मनेपदस्य परिवृत्तौ न दोषः, तथा हन् प्रकृतेरपि इति न पदांशदोषः। यत्र पराङ्गकर्मतासद्भावे हन्प्रकृतेरुत्तरमात्मनेपदम् तत्र दोष इति वक्तुं शक्यते, तथासति सिद्धं पददोषत्वम् इति दिक्।

(६१) प्रश्नः—असाधारणान् वाक्यगतान् दोषान् प्रतिपादयत।

उत्तरम्—

वर्णप्रतिकूलत्वम्—प्रकृतरसविरोधिरसगतगुणव्यञ्जकत्वम्। ओवट्टइ उल्लट्टइ सअणेकहिंपि इत्यादि। अत्र टकाराः शृङ्गाररसविरोधिनः।

लुप्तविसर्गत्वम्—गता निशा इमा बाले अत्र त्रिषु पदेषु विसर्गस्य लोपः।

आहतविसर्गत्वम्—ओत्वप्राप्तविसर्गत्वम् धीरो वरो नरो याति। अत्र त्रिषु पदेषु विसर्गस्यौत्वम्

आधकपदत्वम्—अनुपयुक्तार्थवत्त्वम् पल्लवाकृतिरक्तोष्ठी अत्र आकृतिपदं अनुपयुक्तार्थतया अधिकम्। एवम् सदाशिवं नौमि पिनाकपाणिम् अत्र विशेषणमधिकम्। कुर्यां हरस्यापि पिनाकपाणेः अत्र तु हरस्य वीरत्वप्रकाशनाय

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

विशेषणम् उचितमेव। वाचमुवाच कौत्सः अत्र वाचमित्यधिकम् उवाचेत्यनेनैव गतार्थत्वात् विशेषणदानार्थं यत्र तत्र तूचितम् यथा उवाच मधुरां वाचम्। केचितु यत्र विशेषणस्यापि क्रियाविशेषणत्वं सम्भवति तत्रापि तत्प्रयोगो न घटते। यथा—उवाच मधुरं श्रीमान्' इत्यत्र।

न्यूनपदत्वम्—उपादेयमपि अनुपात्तं पदं न्यूनपदम्। यथा यदि मय्यर्पिता दृष्टिः किं ममेन्द्रतया तदा इत्यत्र 'यदित्वया मयि दृष्टिरर्पिता' इति रूपेणान्वयबोधाय 'त्वया' इति पदमावश्यकम्।

कथितपदत्वम्—अर्थपौनरुक्त्यभावेऽपि द्विरुपात्तं पदं कथितपदम्। यथा–'रतिलीलाश्रमं भिन्ते सलीलमनिलो वहन्' इत्यत्र लीला शब्दः पुनरुपात्तः। तेन किमयं शब्दः नानार्थः उत तस्यैवार्थस्य प्रतिपादक इति शाब्दबोधविलम्बकत्वेन दोषः।

हतवृत्तत्वम् - लक्षणानुसरणेप्यश्रव्यत्वम्, रसाननुगुणम्, अप्राप्तगुरुभावान्तलघु च इति त्रिविधम्। क्रमेण यथा—'हन्त सततमेतस्या हृदयं भिन्ते मनोभवः कुपितः।' इत्यत्र प्रथमद्वितीयगणौ भकारसकारौ तयोः सान्निध्यमश्रव्यं तच्च सभ्यानामनुभवसिद्धम्। द्वितीयं यथा–अयि मयि मानिनि मा कुरु मानम्। इत्यत्र शृङ्गारपोषकस्य छन्दसः अभावः किन्तु हास्यरसपोषकस्य छन्दसः योजना इति रसाननुगुणत्वम्। तृतीयं यथा—विकसितसहकारभारहारिपरिमल एष समागतो वसन्तः। 'अत्र, यद्यपि संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसम्मिश्रम्। विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन' इति नियमेन पादान्तस्य लघोः गुरुभावः नियमसिद्धः। तथापि नायं नियमः सार्वत्रिकः किन्तु केवलं द्वितीय–चतुर्थपादविषयम्। प्रथमतृतीयपादविषयं तु वसन्ततिलकादेरेव। अतोत्र 'हारि' इत्यत्र गुरुभावो न भवति। परिमल पदस्य स्थाने 'प्रमुदित'–पदपाठे तु संयुक्तादिस्वात् दीर्घभावः उपपद्यत एव। काव्यप्रकाशकारेण—अप्राप्तगुरुभावान्त लघोरुदाहरणे—

अन्यास्ता गुणरत्नरोहणभुवो धन्या मृदन्यैव सा
संभाराः खलु तेन्य एव विधिना यैरेष सृष्टो युवा
श्रीमत्कान्तिजुषां द्विषां करतलात् स्त्रीणां नितम्बस्थलाद्
दृष्टे यत्र पतन्ति मूढमनसामस्त्राणि वस्त्राणि च।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अत्र 'वस्त्राणि च' इति बन्धस्याश्लथत्वश्रुतिः। वस्त्राण्यपि 'इति पाठे तु दार्ढ्यमिति न दोषः। वस्तुतस्तु—लक्षणानुसरणेऽप्यश्रव्यमेतत्।

पतत्प्रकर्षत्वम्—बन्धस्योत्तरोत्तरं शैथिल्यम्। यथा—

प्रोज्ज्वलज्ज्वलनज्वाला विकटोरुसटाच्छटः।
श्वासक्षिप्तकुलक्ष्माभृत् पातु वो नरकेशरी,

इत्यत्र क्रमेणानुप्रासस्य पतनात् पतत्प्रकर्षत्वम्।

सन्धिविश्लेषत्वम्—असकृत्विकल्पकार्याप्रयोगः विसन्धिः। यथा दलिते उत्पले एते अक्षिणी अमलांगि ते। अत्र प्रतिपदं अचि परतः पूर्वस्य एकारस्य अयादेशे यकारस्य 'लोपः शाकल्येति' लोपेन भाव्यम्। तन्न कृतम्। एवमक्षिणी अमलाङ्गि इत्यत्र यणा भाव्यम्। किन्तु प्रगृह्यत्वेन प्रकृतिभावः कृतः। असकृत् सन्धेः अकरणमेव कवेः अशक्तिं द्योतयति इति दोषः। यत्र तु अनुशासनमुल्लंघ्यवृत्तभंगभयमात्रेण सन्धिविश्लेषः तत्र तु सकृदपि दोषः। यथा—'वासवाशामुखे भाति इन्दुश्चन्दनबिन्दुवत्' अत्र भाति इन्दुः 'इत्यवस्थायां यणा भाव्यम् तन्न कृतमिति दोष एव।

सन्धौश्लीलता—जुगुप्साव्यञ्जकत्वं श्लीलत्वम्। यथा 'चलण्डामर-चेष्टितः' अत्र चलन् डामरपदयोः सन्धौ 'लण्डा' इत्यत्र अपभ्रंशविधया पुंव्यञ्जकतया श्लीलत्वम्।

सन्धौ कष्टत्वम्—उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः। अत्र असौ उर्वी, अत्र तरु-आली, मरु-अन्ते, चारु-अवस्थितिः इत्यवस्थायां सन्धिकरणे अर्थप्रतीतौ विलम्बे न कष्टत्वम्।

अर्धान्तरैकपदत्वम्—यथा—

इन्दुर्विभाति कर्पूरगौरैर्धवलयन् करैः।
जगन्मा कुरु तन्वंगि मानं पादानते प्रिये।

अत्र जगदितिपदं प्रथमार्थे 'जगत्प्रकाशयन्निन्दुः' इत्येवं पठितुं युक्तम्।

समाप्तपुनरात्तता—क्रियान्वयेन शान्ताकांक्षस्य विशेषणपदस्य पुनः विशेषणान्तरोपादानं समाप्तपुनरात्तत्वम्। यथा—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

नाशयन्तो घनध्वान्तं तापयन्तो वियोगिनः।
पतन्ति शशिनः पादा भासयन्तः क्षमातलम्।

अत्र चतुर्थपादो वाक्यसमाप्तावपि पुनरुपात्तः इति आकांक्षान्तरकल्पनेन शाब्दबोधविलम्बकत्वात् दोषः।

अभवन्मतसम्बन्धः—यथा—

या जयश्रीर्मनोजस्य यया जगदलंकृतम्।
क्षामेणाक्षीं विना प्राणा विफला मे कुतोऽद्य सा।

अत्र यच्छब्दनिर्दिष्टानां वाक्यानां परस्परनिरपेक्षत्वात्तदेकान्तःपातिना एणाक्षीशब्देनान्येषां सम्बन्धः कवेरभिमतो नोपपद्यते एव। यां विनामी वृथा प्राणा एणाक्षी सा कुतोऽद्य मे। अत्र तच्छब्दनिर्दिष्टवाक्यान्तः पातिनः सर्वैरपि यच्छब्दनिर्दिष्टैः सम्बन्धो घटते। यथा वा—ईक्षसे यत् कटाक्षेण तदा धन्वी मनोभवः अत्र यदित्यस्य तदेत्यनेन सम्बन्धो न घटते। ईक्षसे चेत् इति युक्तः पाठः।

यथावा—ज्योत्स्नाचयः पयःपूरतारकाः कैरवाणि च।
राजति व्योमकासारराजहंसः सुधाकरः।

अथ व्योमकासारशब्दस्य राजहंसशब्देन समासे गुणीभावात् न सर्वैः संयोगः।

विधेयाविमर्शे यदेवाविमृष्टं तदेव दुष्टम्। इह तु प्रधानस्य कासारपदार्थस्य प्राधान्येनाप्रतीतेः सर्वोऽपि पयः पूरादिपदार्थस्तदङ्गतया प्रतीयते इति सर्ववाक्यार्थे विरोधाभासः इत्युभयोर्भेदः।

प्राचीनास्तु—अनेनच्छिन्दता कण्ठं मातुः परशुना तव।
बद्धस्पर्द्धः कृपाणोऽयं लज्जते मम भार्गव।

अथ भार्गवनिन्दायां प्रयुक्तस्य मातृकण्ठच्छेदनस्य परशुना सह सम्बन्धो न घटते इति अभवनमतसम्बन्धत्वमाहुः। आधुनिकास्तु—परशुनिन्दामुखेन भार्गवनिन्दाधिक्यमेव वैदग्ध्यं द्योतयतीति वदन्ति।

अक्रमत्वम्—समय एव करोति बलाबलं प्रणिगदन्त इतीवशरीरिणाम्। शरदि हंसरवाः परुषीकृतस्वरमयूरमयूरमणीयताम्। अत्र बलाबलमिति पदोत्तरमेव 'इतीव'-पदं युक्तं नतु प्रणिगदन्त इत्यन्तरम्। एवम्—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः । कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी । अत्र त्वमित्यनन्तरमेव चकारो युक्तः ।

अमतपरार्थत्वम्—यथा—राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी । गन्धवद् रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा । अत्र द्वितीयोऽर्थः शृङ्गारव्यञ्जकः यः प्रकृतरसविरोधीति अमतः ।

वाच्यानभिधानत्वम्—यथा व्यतिक्रमलवं कं मे वीक्ष्य वामाक्षि कुप्यसि । यथावा–चरणानतकान्तायास्तन्वि कोपस्तथापि ते ।

भग्नप्रक्रमत्वम्—यथा एवमुक्तो मन्त्रिमुख्यैः रावणः प्रत्यभाषत । अत्र वचधातुना प्रक्रान्तस्य प्रतिवचनमपि वचिनैव युक्तम् । एवं सति कथितपदत्वं न भवति । यतः तस्य उद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयत्वात् । यथा—

उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।

अत्र पुनरुक्तोऽपि ताम्रशब्दः उद्देश्यप्रतिनिर्देश्यत्वेन न दोषाय । यदि अत्र ताम्रपदं हित्वा पदान्तरेण प्रतिपादितः स्यात् तदैव अन्यार्थ इव प्रतिभासमानः प्रतीतिं स्थगयेत् ।

यथावा—ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ।

अत्र 'अस्मै' इत्यनेन प्रक्रान्तस्य इदमादिनैव परामर्शो युक्तः न 'तद्विसृष्टाः' इत्यत्र पठितेन तच्छब्देन ।

यथावा—

उदन्वच्छिन्ना भूः स च पतिरपां योजनशतम् ।

एवम्—

यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ।

अत्र तुमुना आरब्धस्य तुमुनैव विवेचनमुचितम् । सुखलिप्सया इत्यत्र तु सुखमीहितुं यदि स्यात् तदा उचितमेव ।

प्रसिद्धित्यागत्वम्—यथा धीरो वारिमुचां रवः । अत्र मेघानां प्रसिद्धस्य गर्जितस्य त्यागेन रवः उपात्तो दोषाय ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

यदाहुः—

मञ्जीरादिषु रणितप्रायं पक्षिषु कूजितप्रभृति ।
स्तनमणितादि सुरते मेघादिषु गर्जितप्रमुखम् ।

अस्थानस्थपदत्वम्—यथा—

तीर्थे तदीये गजसेतुवन्धात्प्रतीपगामुत्तरतोऽस्य गंगाम् ।
अयत्नवालव्यजनीबभूवुर्हंसा नभोलङ्घनलोलपक्षाः ।

अत्र तदीयपदात् पूर्वं गंगाम् इत्यस्य पाठो युक्तः । एवम् हितान्न यः संशृणुते स किंप्रभुः अत्र संशृणुते इत्यतः पूर्वं नञः स्थिति-रुचिता ।

अस्थानस्थसमासता—अद्यापि स्तनशैलदुर्गविषये—इत्यादि ।

अत्रः कवेरुक्तौ समासः कोपिनः उक्तौ समासाभावो दोषाय । कोपस्य विकटवन्धेनैव वक्तव्यत्वात् ।

संकीर्णत्वम्—वाक्यान्तरपदानां वाक्यान्तरे प्रवेशत्वम् संकीर्णत्वम् । यथा—

चन्द्रं मुञ्च कुरंगाक्षि पश्य मानं नभोङ्गणे ।
अत्र नभोङ्गणे चन्द्रं पश्य मानं मुञ्चेति सम्बन्धः ।

क्लिष्टत्वमेकवाक्यविषयम् । संकीर्णत्वं भिन्नविषयम् इत्युभयोर्भेद ।

गर्भितता—वाक्यान्तरे वाक्यान्तरानुप्रवेशो गर्भितता । यथा—

रमणे चरणप्रान्ते प्रणति प्रवणेऽधुना ।
वदामि सखि ते तत्त्वं कदाचिन्नोचिता क्रुधः ।

अथ 'वदामि सखि ते तत्त्वम्' इति पूर्ववाक्ये प्रविष्टो दोषाय ।

(६२) प्रश्न :—अर्थदोषानुदाहरत ।

उत्तरम्—

अपुष्टत्वम्—विलोक्य वितते व्योम्नि विधुं मुञ्च रुषं प्रिये ।

दुष्क्रमत्वम्—देहि मे वाजिनं राजन् गजेन्द्रं वा मदालसम् ।

ग्राम्यत्वम्—स्वपिहि त्वं समीपे मे स्वपिम्येवाधुना प्रिये ।

व्याहतत्वम्—हरन्ति हृदयं यूनां न नवेन्दुकलादयः ।
वीक्ष्यते यैरियं तन्वी लोकलोचन चन्द्रिका ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अश्लीलत्वम्—हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः ।
यथाशु जायते पातो न तथा पुनरुन्नतिः ।

कष्टार्थत्वम्—दर्पत्येतदहर्पतिः न तु घनो धामस्थमच्छं पयः । इत्यादौ-कष्टार्थत्वम् ।

अनवीकृतत्वम्— सदा चरति खे भानुः सदा वहति मारुतः ।
सदा धत्ते भुवं शेषः सदा धीरोऽविकत्थनः ।

अत्र सदेत्यनवीकृतम् । अत्र सदा पदस्य पर्यायान्तरेणो पादानेपि यदि न चमत्कारस्तदा दोषत्त्वम् इत्येव कथित-पदत्वाद्भेदः ।

नवीकृतत्वं तु—

भानुः सकृद्युक्ततुरङ्ग एव
रात्रिंदिवं गन्धवहः प्रयाति
विभर्ति शेषः सततं धरित्रीं
षष्ठांशवृत्तेरपि धर्म एषः ।

निर्हेतुत्वम्— गृहीतं येनाशीः—इत्यादि,
प्रकाशितविरुद्धत्वम्— कुमारस्तेधराधीश श्रियं समधिगच्छतु ।
सन्दिग्धत्वम्— अचला अबला वा स्युः सेव्या ब्रूत मनीषिणः ।
पुनरुक्तत्वम्— सहसा विदधीत न क्रियामविवेकः—
प्रसिद्धिविरुद्धत्वम्— ततश्चचार समरे शितशूलधरो हरिः ।
यथा वा—पादाघातादशोकस्ते संजाताङ्कुरकोरकः ।
विद्याविरुद्धता— अधरे करजक्षतं मृगाक्ष्याः—
आकाङ्क्षता— ऐशस्य धनुषो भङ्गं क्षत्रस्य च समुन्नतिम् ।
स्त्रीरत्नं च कथं नाम मृष्यते भार्गवोऽधुना ।
सहचरभिन्नत्वम्— सज्जनः दुर्गतौ मग्नः कामिनी गलितस्तनी ।
खलः पूज्यः समज्यायां तापाय मम चेतसः ।
अस्थानयुक्तता— आज्ञा शक्रशिखामणिप्रणयिनी—
अविशेषे विशेषः— हीरकाणां निधेरस्य सिन्धोः किं वर्णयामहे ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अनिय नियममे:— आवर्त एव नाभिस्ते नेत्रे नीलसरोरुहे ।
विशेषे अविशेषः— यान्ति नीलनिचोलिन्यो रजनीष्वभिसारिकाः ।
नियमे अनियमः— आपात सुरसे भोगे निमग्नाः किं न कुर्वते ।
विध्ययुक्तता— आनन्दितस्वपक्षोऽसौ परपक्षान् हनिष्यति।
अनुवाद्ययुक्तता— चण्डीशचूडाभरण चन्द्र लोकतमोपह ।
विरहिप्राण हरण, कदर्थय न मां वृथा ।
निर्मुक्तपुनरुक्तत्वम्— लग्नं रागावृत्ताङ्ग्या सुदृढमिह—इत्यादि ।

(६३)—प्रश्न :—नियमपरिवृत्तिः वाच्यानभिधानयोः को भेदः इति विविच्य लिखत ?

उत्तरम्—ननु वाच्यानभिधाने व्यतिक्रमलवं कं मे वीक्ष्य वामाक्षि कुप्यसि, इत्यत्र 'व्यतिक्रमलवमपि' इति वक्तुं युक्तम् इत्यपेरभावः यथा दोषाय तथा नियमपरिवृत्तौ 'आपात सुरसे' इत्यत्र आपातमेवेति नियमो वाच्यः । इति एवकारस्याभाव एव दोषाय जातः । इत्थमुभयत्र भेदो नास्तीति चेद् अत्र केचित्-नियमस्यावचनमेव पृथग्भूतं नियमपरिवृत्तेविर्षयः । तत्र तथा सत्यपि उभयोः शब्ददोषता वा अर्थदोषता वा स्यात् । एकस्य शब्ददोषता अपरस्यार्थदोषतायां नियामकाभावात् । तत्र का गतिरिति चेच्छृणु, व्यतिक्रमलवमित्यत्र शब्दोच्चारणानन्तरमेव दोषप्रतिभासः । इह तु अर्थप्रत्ययानन्तरमिति उभयोर्भेदस्वीकारेणादोषात् ।

एवं च शब्दपरिवृत्तिसहत्वासहत्वाभ्यां पूर्वैरादृतोऽपि शब्दार्थदोषविभाग एवं पर्यवस्यति । यो दोषः शब्दपरिवृत्त्यसहः स शब्द दोष एव । यश्च पदार्थान्वयप्रतीतिपूर्वबोध्यः सोऽपि शब्ददोषः । किन्तु यः अर्थप्रतीत्यनन्तरं बोध्यः सोऽर्थाश्रयः दोषः ।

एवं अधिकपदत्वस्य शब्ददोषत्वम् । अनियमे नियमरूपाया नियमपरिवृत्तेः अर्थदोषत्वम् ।

न च अमतपरार्थत्वादौ पदार्थबोधानन्तरमेव दोषप्रतिभासादर्थदोषत्वमेव न तु वाक्यदोषत्वमिति वाच्यम् । अमतपरार्थत्वे राममन्मथशरेणेत्यादौ वाक्यान्वयव्यतिरेकानुविधायित्वात् वाक्यदोषत्वम् । अश्लीलत्वादौ तु वाक्यव्यापित्वाभावाद् अर्थदोषत्वमेवेति दिक् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

(६४)-प्रश्नः—रसदोषान् सोदाहरणान् निरूपयत ?

उत्तरम्—

रसस्य स्वशब्दवाच्यत्वम्— (क) तामुद्वीक्ष्य कुरङ्गाक्षीं रसो नः कोप्यजायत ।
(ख) चन्द्रमण्डलमालोक्य शृङ्गारे मग्नमन्तरम् ।

स्थायिनः स्वशब्दवाच्यत्वम्— अजायत रतिस्तस्यास्त्वयि लोचनगोचरे ।

व्यभिचारिणः स्वशब्दवाच्यत्वम्— जाता लज्जावती मुग्धा प्रियस्य परिचुम्बने ।

परिपन्थिरसाङ्गविभावादिपरिग्रहः— मानं मा कुरु तन्वङ्गि ज्ञात्वा यौवनमस्थिरम् ।

अनुभावस्य कष्टाक्षेपः— परिहरति रतिं मतिं लुनीते—

अकाण्डे प्रथनम्— वेणीसंहारस्य द्वितीयेऽङ्के दुर्योधनस्य शृङ्गारः ।

अकाण्डे छेदः— वीरचरिते राघवभार्गवयोः प्रवृद्धे वाक्कलहे कंकणमोचणाय गच्छामीति रामोक्तिः ।

पुनः पुनः दीप्तिः यथा—रतिविलापे कुमारसम्भवे ।

अङ्गिनोऽननुसन्धानम्— रत्नावल्यां वाभ्रव्यागमने सागरिकायाः विस्मृतिः ।

अनङ्गस्य कीर्तनम्— कर्पूरमंजर्यां-राजनायिकयोः स्वयकृतं वर्णनमनादृत्य वन्दिवर्णितस्य प्रशंसनम् ।

अङ्गस्यातिविस्तृतिः— किराते, सुराङ्गनाविलासादिः ।

प्रकृतिविपर्ययः— प्रकृतयः (नायकाः) दिव्याः, अदिव्याः दिव्यादिव्याश्चेति त्रिविधाः । ताश्च धीरोदात्त धीरो-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

द्धत–धीरललित-धीरप्रशान्तभेदेन नेकाः । तासु च उत्तमाः, मध्यमा अधमाश्च । तत्र यथा यासां वर्णन मुचितं तद्विपरीतवर्णनम् प्रकृति विपर्ययो दोषः ।

यथा— धीरोदत्तस्य रामस्य धीरोद्धत छद्मना वालिवधः यथा वा कुमा सम्भवे उत्तमदेवतयोः उमामह श्वरयोः सम्भोगवर्णनम् ।

अन्यदनौचित्यम् देशकालादीनामन्यथा वर्णनम् । तथा स असत्यप्रतिभासात् श्रोतुः श्रद्धा विघातः स्यात

(६५) प्रश्नः—के अलंकारदोषाः तेषां केषु दोषेष्वन्तर्भावः इ विविच्य लिखत ।

उत्तरम्—उपमालङ्कारे दोषद्वयं असादृश्यम् असम्भवश्च । तत्र साधार धर्माप्रसिद्धिरसादृश्यम्, उपमानाप्रसिद्धिरसम्भवः इति उभयोरनुचितार्थत्वेऽन्त कर्तव्यः ।

साधारणधर्माप्रसिद्धिः—ग्रन्थामि काव्यशशिनं विततार्थरश्मिम् । काव्यचन्द्रयोः अर्थरश्म्योश्च साधारणधर्मोऽप्रसिद्धः ।

उपमानाप्रसिद्धि—प्रज्वलज्जलधारावन्निपतन्ति शरास्तव । अत्र ज्वलनस्य बाधात् जलधारायां प्रज्वलनस्यासम्भवः ।

इहोभयत्र अनुचितार्थत्वस्वीकारेणैवोपपत्तौ अलंकारदोषाणां पृथक् स्वी रोऽनावश्यकः ।

अर्थान्तरन्यासे—

उपमानस्य

(१) जातिगतन्यूनत्वे चण्डाल इव राजासौ संग्रामेऽधिकसाहसः ।
(२) जातिगताधिकत्वे कर्पूरखण्ड इव राजति चन्द्रबिम्बम् ।
(३) प्रमाणगतन्यूनत्वे हरवन्नीलकण्ठोऽयं विराजति शिखावलः ।
(४) प्रमाणगताधिकत्वे स्तनावद्रिसमानौ ते ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

एषु—क्रमेण, राज्ञः चण्डालेन, चन्द्रस्य क्षुद्रेण कर्पूरखण्डेन, हरस्य शिखावलेन (मयूरेण) स्तनयोः अद्रिणा उपमादाननुचितमित्यनुचितार्थत्वम् दोषः ।

उत्प्रेक्षितार्थसमर्थनम्—दिवाकराद्रक्षति यो गुहासु—

अत्र उत्प्रेक्षितार्थस्य अचेतनेऽन्धकारे त्रासस्यासम्भवतया प्रतिभासनम् स्वरूपमिति तत्समर्थनमनुचितमिति अनुचितार्थत्वम् ।

यमकस्य—पादत्रयमात्रगतस्याप्रयुक्तत्वं दोषः । यथा—

सहसाभिजनैः स्निग्धैः सहसा कुंजमन्दिरम्
उदिते रजनीनाथे सहसा याति सुन्दरी ।

उत्प्रेक्षायाम्—यथा शब्दस्य उत्प्रेक्षाद्योतकत्वेऽवाचकत्वम् । यथा—

एष मूर्तो यथा धर्मः क्षितिपो रक्षति क्षितिम् ।

अनुप्रासे—प्रकृतरसविरोधिरसानुगुणवर्णघटितत्वस्य प्रतिकूलवर्णत्वम् । यथा—

ओवट्टइ उल्लट्टइ । अत्रशृङ्गारो रसः ।

उपमायाम्—साधारणधर्मस्याधिकत्वे अधिकपदत्वम् । यथा—

नयनज्योतिषा भाति—

अत्र हरस्य नीलकण्ठत्वानुक्तिः चतुर्थपादोधिकः ।

साधारणधर्मस्य न्यूनत्वे न्यूनपदत्वम् । यथा—

कमलालिङ्गितस्तारहारहारी—

अत्रोपमानस्य सवलाकत्वं वाच्यम् ।

उपमायाम्	लिङ्गभेदे भग्नप्रक्रमत्वम्		सुधेव विमलश्चन्द्रः ।
,,	वचनभेदे	,,	ज्योत्स्ना इव सिता कीर्तिः ।
,,	कालभेदे	,,	काप्यभिख्या तयोरासीद्-
,,	पुरुषभेदे	,,	लतेव राजसे तन्वि ।
,,	विधिभेदे	,,	चिरं जीवतु ते सूनुः मार्कण्डेयमुनिर्यथा

अयं दोषः यत्र निर्दिश्यमानस्य सामान्यधर्मस्य उपमानान्वयानुपयोगित्वम् तत्रैवत । यत्र तु साधारणधर्मस्यान्वययोग्यता न तत्र दोषः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

उपमायाम्	लिङ्गभेदेऽपि अदोषः	मुखं चन्द्र इवाभाति ।
„	वचनभेदेऽपि „	तद्वेशोऽसदृशोन्याभिः स्त्रीभिः ।

अनुप्रासे—वैफल्यस्यार्थत्वे अपुष्टार्थत्वम्—अनुरणन्मणिमेखलमविरल-

समासोक्तौ—साधारणविशेषणवशात् परार्थस्य प्रतीतावपि पुनः त शब्देन कथनम् पुनरुक्तत्वम् । यथा—अनुरागवन्तमपि—

अप्रस्तुतप्रशंसायाम्—व्यञ्जनयैव प्रस्तुतार्थप्रतीतौ शब्देन तदभिधान पुनरुक्तत्वम् । यथा—आहूतेषु विहंगमेषु—

अनुप्रासे प्रसिद्धयभावस्य ख्यातविरुद्धत्वम् । यथा—चक्राधिष्ठित चक्री ।

(६६)प्रश्नः—के दोषाः अनित्याः । के च दोषाः गुणत्वं भजन्ते इ विविच्य लिखत ।

उत्तरम्—ननु दोषाः क्वचित् गुणत्वं क्वचिच्च अदोषत्वं प्राप्नुव तर्हि कथमेषां दोष संज्ञा इति चेत् श्रूयताम् । यत्र रसादीनामपकर्षकत्वं प्रकर्षक वा नास्ति तत्र दोषाणामदोषत्वम् । यत्र च रसादीनामपकर्षकत्वं नास्ति प्र प्रकर्षकत्वमेव तत्र गुणत्वम् । यतः रसापकर्षकत्वमेव दोषस्य लक्षणम् । न गुणाः माधुर्यादयः उक्ताः न तु दुःश्रवत्वादयः तत्कथमेतेषां गुणत्वमि वाच्यम् । मुख्यगुणप्रकर्षोपयोगितया एषु गुण व्यदेशो गौणः इति स्वीकारे दोषात् । एवं च ये दोषाः क्वचिद् गुणत्वं क्वचिच्च अदोषत्वं गच्छन्ति ते दो अनित्या इति सिद्धम् ।

दुःश्रवत्वम् त्रिषु स्थलेषु गुणः ।

(१) कुपिते वक्तरि (२) उद्धते वाच्ये, (३) रौद्रादौ रसे ।

अश्लीलत्वम्	सुरतारम्भगोष्ठीषु, शमकथासु च गुणः ।
निहितार्थत्वम्	श्लेषालंकारे न दोषः ।
अप्रयुक्तत्वम्	श्लेषालंकारे न दोषः ।
अप्रतीतत्वम्	गुणः यदि बोद्धा, वक्ता च विषयज्ञौ भवतः । अथवा विचारे ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

कथितपदत्वम्—(१) विहितानुवादे, (२) विषादे, (३) विस्मये, (४) क्रुधि, (५) दैन्ये, (६) लाटानुप्रासे, (७) अनुकम्पायाम्, (८) प्रसादने, (९) अर्थान्तरसंक्रामितवाच्ये, (१०) हर्षे, (११) अवधारणे च गुणः ।

सन्दिग्धत्वम् गुणः	यदि वाच्यम् व्याजस्तुतिपर्यवसायि स्यात् ।
कष्टत्वं गुणः	यदि वक्ता श्रोता च वैयाकरणो भवेत् ।
दुः श्रवत्वं च गुणः	यदि वक्ता श्रोता च वैयाकरणो भवेत् ।
ग्राम्यत्वम् गुणः	यदि वक्ता नीचपात्रं भवेत् ।
निर्हेतुत्वम् अदोषः	यदि अर्थः प्रसिद्धः स्यात् ।
ख्यातविरुद्धत्वम् गुणः	यदि लोके असन्नपि कविसमये प्रसिद्धः स्यात् ।
न्यूनपदत्वं गुणः	यदि वक्ता आनन्दमग्नो भवेत् ।
न्यूनपदत्वं अदोषः	यथा—तिष्ठेदित्यादौ ।
अधिकपदत्वम् गुणः	यत्र चमत्कारविशेषः स्यात् ।
समाप्तपुनरात्तत्वम् अदोषः	न केवलं विशेषणोपादानं किन्तु वाक्यान्तरोपादानं यत्र तत्र अदोषः ।
गर्भितत्वम् गुणः	यदि चमत्कारातिशयं द्योतयति ।
पतत्प्रकर्षता गुणः	यत्र अर्थः सुकुमारः स्यात् ।
व्यभिचारिशब्दोक्तिः अदोषः	यदि विभावादिप्रतिपादने नास्ति विशदप्रतीतिः ।
परिपन्थिरसादेः गुणत्वं	यदि व्यभिचारभावादेः बाध्यत्वेन वचः स्यात् ।
परिपन्थिरसादेः अदोषत्वम्	यदि अङ्गाङ्गित्वप्राप्तिः स्यात् । (१) विरोधिनः स्मरणे । (२) विरोधिनः साम्येन वचने च ।

(६७) प्रश्नः—पूर्णघनानन्दरूपस्य रसस्य तादृशेन रसेन कथं परस्परं विरोधः इति सयुक्तिकं विवेचयत ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

उत्तरम्—ननु समूहालम्बनात्मकस्य पूर्णघनानन्दरूपस्य रसस्य तादृशेनै अपरेण रसेन कथं विरोधः सम्भवति यतो हि एक वाक्ये व्यञ्जकतासम्बन्धेन वृत्ति प्रादुर्भावयौगपद्यं च यदि स्यात् तदा परस्परोपमर्दकतया विरोधः सम्भवेत् अथवा अंगाङ्गिभावे विरोधः सम्भवेत् । तदेव नास्ति । यतः एक वाक्ये प्रादुर्भा यौगपद्यं नास्ति । क्रमेण द्वयोः प्रतीतेः । नाप्यङ्गाङ्गिभावः द्वयोरपि पूर्णत स्वातन्त्रेण विश्रान्तेरिति चेत् सत्यम्, अत एव प्रधानेतरेषु रसेषु स्वातन्त्र्यविश्रा राहित्यात् पूर्णरसभावमात्राच्च विलक्षणतया प्राचीनैः संचारिरसनाम व्यपदेशः कृतः । श्रीचण्डीदासैस्तु खण्डरसनाम्ना व्यवहारो विहितः । यथा

अंगं बाध्योऽथ संसर्गी यद्यङ्गी स्यान्द्रसान्तरे ।
नास्वाद्यते समग्रं तत्तः खण्डरसः स्मृतः ।

न च आद्यः करुणबीभत्सरौद्रवीरभयानकैः—इत्युक्तनयेन विरोधिनो शृङ्गारयोः कथमेकत्र 'कपोले जानक्याः—' इति पद्ये समावेश इति वाच्य इह खलु रसानां विरोधितााया अविरोधितायाश्च त्रिधा व्यवस्था । (१) क श्चित् आलम्बनैक्येन, (२) कयोश्चिदाश्रयैक्येन, (३) कयोश्चित् नैरन्तर्ये तत्र वीरशृङ्गारयोरालम्बनैक्येन विरोधः, एवं हास्यरौद्रबीभत्सैः संभोग वीरकरुणरौद्रादिभिर्विप्रलम्भस्य, आश्रयैक्येन वीरभयानकयोः, नैरन्त विभावैक्येन च शान्तशृङ्गारयोः विरोधः । एवं त्रिधाप्यविरोधो वीरस्याद्भु रौद्राभ्याम् । शृङ्गारस्याद्भुतेन, भयानकस्य बीभत्सेन, तेनात्र पद्ये वीरशृङ्गार भिन्नालम्बनत्वान्न विरोधः । एवं वीरस्य नायकनिष्ठत्वेन भयानकस्य प्रतिना निष्ठत्वेन भिन्नाश्रयत्वात् न विरोधः । शान्तशृङ्गारयोर्विरोधेऽपि यत्र अविरुद्धस्य रसस्यावस्थानम् न तत्र विरोधः । यथा नागानन्दे प्रशमाश्रयस्य नायकस्य मलयवत्यनुरागः न निरैन्तर्येण निर्दिष्टः किन्तु मध्ये 'अहो गी इत्यादिना अद्भुतेन व्यवधानात् ।

(६८) प्रश्नः—गुणालङ्कारयोर्भेदप्रदर्शनपूर्वकं गुणस्य ल प्रतिपादयत ।

उत्तरम्—ननु लोके गुणाः शौर्यादयः समवायेन आत्मनिष्ठाः अलं हारादयः शरीरे संयोगसम्बद्धाः इति लोके गुणालंकारयोः भेदो भवतु नाम का

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

माधुर्यादीनां गुणानां उपमादीनामलंकाराणां समवायेनैव वृत्या गुणालंकारयोः को भेदः इति चेत् श्रूयताम् । यथा लोके अङ्गित्वमाप्तस्यात्मनः उत्कर्षहेतुत्वाच्छौर्यादयो गुणशब्दवाच्याः तथा काव्येऽपि अङ्गित्वमाप्तस्य रसस्य धर्माः स्वरूपविशेषाः माधुर्यादयोऽपि रसव्यञ्जकवाक्यस्य काव्यव्यपदेशस्यौपयिकानुकूल्यभाजः गुणशब्दवाच्या इत्यर्थः । एवं च काव्यव्यवहारप्रयोजकत्वे सति रसधर्मवत्त्वं गुणलक्षणम् पर्यवसन्नम् । रसत्वादावतिव्याप्तिवारणाय सत्यन्तम् । अलंकारेऽतिव्याप्तिवारणाय विशेष्यम् । एतेनेदं सिद्धम् यत् रसमात्रधर्मत्वं गुणत्वम्, शब्दार्थधर्मत्वमलंकारत्वम् इत्युभयोर्भेदः । तदाह मूले—रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा । गुणाः—

एतेनेदमपि सिद्धम् आत्मनः धर्माः शौर्यादयः यथा नियताः अपरिहार्याश्च तथैव काव्यात्मभूते रसे गुणानां स्थितिर्नियता अपरिहार्या च । एवं अलंकारस्य नापरिहार्यता इत्यपि सिद्धम् इति दिक् ।

(६९) प्रश्नः—कति गुणाः, किं तेषां लक्षणम्, कस्मिन् रसे के गुणाः नियताः इति विविच्य प्रतिपादयत ।

उत्तरम्—काव्याङ्गभूते रसे समवायेन वर्तमानाः अपरिहार्यधर्माः गुणाः माधुर्यौजःप्रसादाख्याः त्रयः सन्ति । तत्र चित्तद्रवीभावमयोह्लादो माधुर्यमुच्यते इति माधुर्यस्य लक्षणम् । ह्लादः माधुर्यमिति लक्षणम् । ह्लादः सुखसंवलिताप्रतीतिः । या च चित्तद्रवीभावरूपा, अत्र स्वार्थे मयट् ।

न च काव्यप्रकाशकारेण 'माधुर्यं द्रुतिकारणम्' इत्युक्तम् भवता च द्रुतिः माधुर्यमुच्यते तदनुचितमिति वाच्यम् । द्रवीभावस्यास्वादस्वरूपाह्लादाभिन्नत्वेन कार्यत्वाभावात् । द्रवीभावश्च स्वाभाविकानाविष्टत्वात्मकाठिन्यमन्युक्रोधादिकृतदीप्तत्वविस्मयहासाद्युपहितविक्षेपपरित्यागेन रत्याद्याकारानुविद्धानन्दोद्बोधेन सहृदयचित्तार्द्रप्रायत्वम् । तच्च संभोगशृंगारे, करुणे, विप्रलम्भे शृंगारे शान्ते च क्रमाद् अधिकं तिष्ठति । एवं संभोगाभासादिष्वपि माधुर्यस्य स्थितिर्ज्ञेया ।

चित्तस्य विस्ताररूपं दीप्तत्वम् ओजः । वीरे वीभत्से रौद्रे च क्रमेणास्याधिक्यम् । वीरादिशब्दैः वीराभासादीनां ग्रहणम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

शुष्केन्धनमनल इव यः चित्तं झटिति व्याप्नोति स प्रसादः । अयं सर्वेषु रसेषु रचनासु च तिष्ठति ।

(८०) प्रश्नः—प्राचीनोक्तानां दशशब्दगुणानां दशार्थगुणानां च केषु गुणेषु कथम् अन्तर्भावः ।

उत्तरम्—ननु प्राचीनैः वामनादिभिः गुणानां शब्दार्थधर्मत्वं स्वीकृतम् । तथा च दश शब्द गुणाः कथिता दश चार्थगुणाः कथिताः तेषां कुत्रान्तर्भावः इति चेत् श्रूयताम् ।

बहूनां पदानामेकपदवद्भासनात्मा श्लेषः ओजसि अन्तर्भवति । आरोहावरोहक्रमः समाधिः । अथवा उत्कर्षापकर्षयोर्वैरस्यतानावहो विन्यासः समाधिः । बन्धगाढत्वादोज एव । पदानां नृत्यप्रायत्वं उदारता सापि ओज एव । ओजोमिश्रितशैथिल्यात्मा प्रसादः ओज एव । पृथक्पदत्वं माधुर्यं तत्त तथैव स्वीकृतम् । पदानां झटित्यर्थसमर्पणरूपायाः अर्थव्यक्तेः प्रसादेऽन्तर्भावः । कान्तिः औज्वल्यम् । सा च ग्राम्यत्वदोषाभावरूपा । अपारुष्यं सुकुमारता । सा च दुःश्रवत्वाभावरूपा इति नोभयोः गुणत्वम् । मार्गाभेदस्वरूपिणी समता तु क्वचित् अनुचिते स्थाने प्रयोगे दोष एव । यत्र तु औचित्यं तत्र सुकुमारायाः समतायाः माधुर्ये, प्रौढायास्तस्या ओजस्यन्तर्भावः । एवं दशशब्दगुणाः व्याख्याताः । अर्थगुणेषु साभिप्रायत्वरूपम् ओजः । अर्थवैमल्यम् प्रसादः, उक्तिवैचित्र्यम् माधुर्यम्, पारुष्यम् सौकुमार्यम्, अग्राम्यत्वम् उदारता । एषां पञ्चानां यथाक्रमम् अपुष्टार्थत्वाभावत्वेन, अधिकपदत्वाभावत्वेन, अनवीकृतत्वाभावत्वेन, अमंगलरूपाश्लीलाभावत्वेन, ग्राम्यत्वाभावत्वेन परिग्रहात् एते अर्थगुणाः परित्यक्ताः । वस्तुस्वभावस्फुटत्वरूपायाः अर्थव्यक्तेः स्वभावोक्त्यलंकारे संग्रहः । दीप्तरसत्वरूपायाः कान्तेः रसध्वनिगुणीभूतव्यंग्येऽन्तर्भावः ।

क्रमकौटिल्यानुल्वणत्वोपपत्तियोगरूपघटनात्मा श्लेषः विचित्रतामात्रम् । प्रक्रान्तप्रकृतिप्रत्ययविपर्यासेनार्थस्य विसंवादिताविच्छेदः समता च प्रक्रमभङ्गाभावरूपा । समाधेः गुणत्वमेव न स्वीक्रियते । समासः व्यासश्च चमत्कारमात्रं न गुणः ।

इति पृथक् अर्थगुणस्वीकारस्यावश्यकतैव नास्ति इति दिक् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

(७१) प्रश्नः—के वर्णाः कस्य गुणस्य व्यञ्जकाः इति सोदाहरणं प्रतिपादयत ।

उत्तरम्—टठडढवर्जिताः कादयो मावसानाः शिरसि निजवर्गान्त्ययुक्ताः रेफलकारौ ह्रस्वान्तरितौ समासाभावो मध्यमः समासो वा । समासः पदान्तरयोगेन माधुर्यवती रचना माधुर्यस्य व्यञ्जिका । यथा अनङ्गमङ्गलभुवस्तदपाङ्गस्य—इत्यादि ।

चतुर्थो वर्गाणां प्रथमेन कचतपेन तृतीयेन गजदवेन तथा तयोः अन्तिमौ द्वितीयानां खछथफानां चतुर्थानां घझधभानां योगः अव्यवधानेन प्रयोगः । रेफस्य उपरि, अधः उभयत्र वा प्रयोगः, टठडढैः सह शकारः षकारश्च ओजसः व्यञ्जकाः वर्णाः । दीर्घसमासः औद्धत्यशालिनी सङ्घटना ओजसः व्यञ्जिका । यथा चञ्चद्भुजभ्रमितचण्डगदाभिघात—इत्यादि ।

श्रुतिमात्रेण शब्दार्थप्रतीतौ प्रसादः प्रसादगुणः । अयं सर्वासु रचनासु सर्वेषु समासेषु सर्वेषु च वर्णेषु समानेन रूपेण तिष्ठति । यथा—

सूचीमुखेन सकृदेव कृतव्रणस्त्वम् इत्यादि :

(७२) प्रश्नः—रीतिः कतिविधा, किञ्च तासां लक्षणम् इति सोदाहरणं प्रतिपादयत ।

उत्तरम्—पदसंघटना रीतिः । यथा अंगसंघटना आत्मनः उपकर्त्री तथैव पदसंघटना रसस्योपकर्त्री । सा च चतुर्विधा वैदर्भी, गौडी, पाञ्चाली लाटीभेदेन । तत्र माधुर्यगुणव्यञ्जकैः वर्णैः ललिता अल्पसमासवती असमासवती वा रचना वैदर्भी । यथा—अनङ्गमंगलभुवः इत्यादि ।

ओजोगुणप्रकाशकैः वर्णैः आडम्बरबन्धः समासबहुला रचना गौडी । यथा चञ्चन्दुजभ्रमितचण्डगदाभिघात—इत्यादि ।

वैदर्भीगौडयोर्व्यञ्जकवर्णव्यतिरिक्तैः वर्णैः समस्तपञ्चषपदो बन्धःपाञ्चालीवृत्तिः । यथा मधुरया मधुबोधितमाधवी इत्यादि ।

वैदर्भीमिश्रितापांचाली एव लाटी । यथा-अयमुदयतिमुद्राभञ्जनः पद्मिनीनामुदयगिरिवनालीबालमन्दारपुष्पम्—इत्यादि ।

रुद्रटस्तु वैदर्भ्याः लक्षणमेवमाह—

> असमस्तैकसमस्ता युक्तादशीभिर्गुणैश्च वैदर्भी ।
> वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च विज्ञेया ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

पुरुषोत्तमस्तु गौड्याः लक्षणमेवमाह—

बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौडीया ।
रीतिरनुप्रासमहिमा परतन्त्रा स्तोकवाक्या च ।

भोजस्तु पाञ्चाल्याः लक्षणमेवमाह—

समस्तपञ्चषपदामोजःकान्तिसमन्विताम् ।
मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः ।

कश्चित् लाटी लक्षणमेवमाह—

मृदुपदसमाससुभगा युक्तैर्वर्णैर्न चातिभूयिष्ठा ।
उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी ।

अन्येतु—

गौडी डम्बरबन्धा स्याद् वैदर्भी ललितक्रमा ।
पाञ्चाली मिश्रभावेन लाटी तु मृदुभिः पदैः ।

अत्र पक्षे अयमेव विशेषः यत् गौडीमिश्रितावैदर्भी एव पांचाली इति ।

(७३) प्रश्नः—रीतिनियतानां रचनादीनां व्यत्ययः कथं भवतीति सोदाहरणं प्रतिपादयत ।

उत्तरम्—यद्यपि रचना, वृत्तिः वर्णश्च गुणाधीनास्तथापि वक्त्रौचित्यात्, वाच्यौचित्यात्, प्रबन्धौचित्याच्च क्वचित् अन्यथाभावो भवति । वक्त्रौचित्याद् यथा—मन्थायस्तार्णवाम्भः—इत्यादि ।

अत्र वाच्यार्थे प्रश्नरूपे प्रबन्धे च वेणीसंहारनाटकरूपे दीर्घसमासा उद्धत रचना अनुचिता किन्तु वक्तुः उद्धतस्य भीमसेनस्य मुखात् उद्धता दीर्घसमासमयी च रचना उचिता । वाच्यौचित्याद् यथा—मूर्धव्याधूयमान-इत्यादौ । अत्र वक्ता वैतालिकः प्रबन्धश्च नाटकः । तत्र दीर्घसमासमयी रचना नोचिता किन्तु कुम्भकर्णस्य शिरसः पतनवर्णनाय दीर्घसमासमयी रचना उचितैव प्रबन्धौचित्याद् यथा—नाटकादौ रौद्रेऽपि अभिनयप्रातिकूल्येन न दीर्घसमासादयः उचिताः । आख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः उचिताः कथायां रौद्रेऽपि नात्यन्तमुद्धता रचनादयः उचिताः । एवमन्यदपि औचित्यमनुसर्तव्यम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

(७४) प्रश्नः—निर्दुष्टमलंकारलक्षणं निरूप्य तस्य काव्ये किं प्रयोजनमिति प्रतिपाद्यताम् ?

उत्तरम्—शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः । रसादीनुपकुर्वन्तोऽलंकारास्तेऽङ्गदादिवत् ।। इति मूले अलंकारलक्षणमुक्तम् । तस्यायं परिष्कृतोऽर्थः—

साक्षात् परम्परया वा रसाद्युत्कर्षजनकत्वे सति अतिशयशोभातिशायिकाव्यधर्मत्वमलंकारत्वम् इति अलंकारसामान्यलक्षणम् । रसवदाद्यलंकाराणां साक्षात् रसाद्युत्कर्षजनकत्वस्य सत्त्वात् भवति लक्षणसमन्वयः । स्वाश्रयव्यङ्ग्यत्वरूपपरम्परासम्बन्धेन रसाद्युत्कर्षजनकत्वमनुप्रासोपमादीनाम् । काव्यशब्देन च स्वशरीरभूतौ शब्दार्थौ स्वात्मभूता रसादयश्चेति समुदाय एवोच्यते इति न कुत्रापि दोषः ।

न च साक्षात् परम्परया वा अतियतशोभातिशायिकाव्यधर्मत्वमेव लक्षणं कुतो नोच्यते इति वाच्यम्, तथासति अनियतशोभातिशायिकाव्यधर्मस्वरूपलक्षणस्य कालिदासप्रणीतत्वरूपकाव्यधर्मे सत्त्वादतिव्याप्तिरतः सत्यन्तदलम् ।

रसाद्युत्कर्षजनकत्वमात्रं लक्षणं तु न वाच्यम्, गुणेष्वतिव्याप्तेः । रीतिष्वतिव्याप्तिवारणाय शोभातिशायीति विशेषणम् । रीतानां शोभामात्रजनकत्वं न तु शोभातिशयजनकत्वम् ।

न च काव्येऽलंकाराणां किं प्रयोजनमिति वाच्यम् । यथा अंगदादयः शरीरशोभातिशायिनः शरीरिणमुपकुर्वन्ति तथाऽनुप्रासोपमादयः शब्दार्थशोभातिशायिनो रसादेरुपकारकाः । एषां गुणवदावश्यकी स्थितिर्नास्ति ।

(७५) प्रश्नः—श्लेषस्य शब्दार्थाऽलंकारत्वे का वाचोयुक्तिः इति सप्रपञ्चं विविच्यताम् ?

उत्तरम्—श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते इति श्लेषस्य लक्षणम् । स च श्लेषः सभङ्गाभंगोभयात्मकस्त्रिविधः । तत्र 'येन ध्वस्तमनोभवेन'—इत्यादौ सभंगः शब्दश्लेषः । 'अन्धकक्षयकर—'इत्यादौ अभंगः श्लेषः अनेकार्थाभिधानमात्रेण सिद्धः । अनयोश्चैकत्र सम्भवात् सभंगाभंगात्मकश्च । अतः त्रिविध एव श्लेषः शब्दालंकारो नार्थालंकार इति हृदयम् ।

अत्रालंकारसर्वस्वकाराः—ननु सभङ्गश्लेष एव शब्दश्लेषविषयः । तत्रोदात्तादिस्वरभेदाद्भिन्नप्रयत्नोच्चार्य्यत्वेन भिन्नयोः शब्दयोर्जतुकाष्ठन्यायेन श्लेषः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अभंगस्तु अर्थश्लेष एव, तत्र स्वराभेदादभिन्नप्रयत्नोच्चार्यतया शब्दाभेदादर्थयोरेकवृन्तगतफलद्वयन्यायेन श्लेषः। यो हि यदाश्रितः स तदलंकार एव, अलंकार्यालंकारभावस्य लोकवदाश्रयाश्रयिभावेनोपपत्तिरिति वदन्ति।

अत्रोच्यते—शब्दार्थयोर्मध्ये यस्मिन् (शब्दे-अर्थे वा) सति ये दोषगुणालंकाराः सन्ति, असति च न सन्ति ते तदधीनस्वरूपतया तदीया इति व्यवस्थाप्यन्ते। एतन्मूलक एव शब्दपरिवृत्तिसहत्वासहत्वाभ्यां शब्दगतत्वार्थगतत्वव्यवस्थितिः इति प्राचां प्रवादः। एवं च यथा श्रुतिकटुत्वादयो दोषाः ओज आद्यपरनामानो गाढत्वादयो गुणाः, अनुप्रासादयश्चालंकाराः तत्तच्छब्दे सति सन्ति असति च न सन्ति इति शब्दगता उच्यन्ते। यथा अपुष्टार्थत्वादयः ओजआद्यपरनामानः प्रौढिप्रभृतयो गुणाः, उपमादयश्चालंकाराः सति तस्मिन्नर्थे सन्ति असति च तस्मिन् न सन्ति तत्तच्छब्दपरिवर्तनमपि न सहन्ते इत्यर्थगता इत्युच्यन्ते। तथा च तत्र तत्तच्छब्दसत्त्वे ध्वनिसत्ता तदसत्वे च तदसत्ता तत्र ध्वन्यादीनां शाब्दत्वम्। इतरथा तु आर्थत्वम्। एवं च शब्दभंगाभंगोभयस्थलेऽपि तत्तच्छब्दसत्त्वे एव श्लेषसत्वात् तदसत्त्वे च तदसत्त्वात् तदुभयस्थलेपि शब्दश्लेष एव।

न च 'अन्धकक्षयकर—' इत्यादौ शब्दाभेदः। अर्थभेदेन शब्दभेद इति दर्शनात्। किंचात्र शब्दस्यैव मुख्यतया वैचित्र्यबोधोपायत्वेन कविप्रतिभोट्टंकनात् शब्दालंकारत्वमेव। विसदृशशब्दद्वयस्य बन्धे वैचित्र्यात्, वैचित्र्यस्यैव चालंकारत्वात्। अर्थमुखप्रेक्षितयाचालंकारत्वे अनुप्रासादीनामपि रसादिपरत्वेनार्थालङ्कारत्वप्रसंगः।

ननु शब्दस्याभिन्नप्रयत्नोच्चार्यत्वेनार्थालङ्कारत्वमिति चेत् तदा 'प्रतिकूलतामुपगते—इत्यादौ शब्दभेदेऽपि अर्थालंकारत्वमिति दोषात्। 'स्तोकेनोन्नतिमायाति'—इत्यादौ शब्दपरिवर्तनेपि न श्लेषत्वहानिः।

इदमत्र बोध्यम्। विश्वनाथकविराजमते सभङ्गस्थले शब्दश्लेषः, अभंगस्थले तु अनेकार्थैः शब्दैरनेकार्थाभिधाने शब्दश्लेषः। एकार्थैः शब्दैरनेकार्थाभिधाने तु अर्थश्लेष इति। अतएव—'शब्दैः स्वभावादेकार्थैः श्लेषोनेकार्थवाचनम् 'इति अर्थश्लेषस्यार्थालंकारमध्ये लक्षणमपि कृतं वर्तते इति दिक्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

(७६) प्रश्नः—सलक्षणान् सोदाहरणान् शब्दालङ्कारभेदान् प्रतिपादयत।

उत्तरम्—अभ्यासाय कोष्ठकेषु निर्दिश्यते—

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
पुनरुक्तवदाभासः		आपाततो पदर्थस्य	भुजङ्गकुण्डली—
अनुप्रासः	पञ्च	अनुप्रासः शब्दा-साम्यं—	
	(१) छेकानुप्रासः		
	(२) वृत्यनुप्रासः		
	(३) श्रुत्यनुप्रासः		
	(४) अन्त्यानुप्रासः		
	(५) लाटानुप्रासः		
(क) छेकानुप्रासः		छेकोव्यञ्जनसङ्घस्य	आदाय वकुल—
(ख) वृत्यनुप्रासः		अनेकस्यैकधासाम्यम्—	उन्मीलन्मधुगन्ध—
(ग) श्रुत्यनुप्रासः			
(घ) अन्त्यानुप्रासः	द्विविधः	व्यञ्जनं चेद् यथावस्थं—	
	(१) पादान्तगः		केशः काशस्तबक-
	(२) पदान्तगः		मन्दं हसन्तः पुलकै

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अलङ्कारा	भेदाः	लक्षणानि	उदाहरणानि
(ङ)लाटानुप्रासः	(१) प्रातिपदिकपौनरुक्त्यं त्रिभेदः	शब्दार्थयीः पौनरुक्त्यं—	
	(क) एकसमासे		
	(ख) विभिन्नसमासे		
	(ग)समासासमासयोः		स्मेरराजीवनयने–
	(२) पदपौनरुक्त्यम् द्विभेदः		
	(क) एकपदपौनरुक्त्यम्		
	(ख) अनेकपदपौनरुक्त्यम्		यस्य न सविधे दयिता
यमकम्	अनेकविधम् आकरेभ्यः ज्ञेयम्	सत्यर्थे पृथगर्थायाः स्वरव्यंजन—	नवपलाशपलाशवनं
चक्रोक्तिः	द्विभेदः	अन्यस्यान्यार्थकं वाक्यमन्यथा	
	(१) श्लेषवक्रोक्तिः		के यूयं स्थल एव-
	(२) काकुवक्रोक्तिः		काले कोकिलवाचाले

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
भाषासमः	—	शब्दैरेकविधैरेव	मञ्जुलमणिमञ्जीरे कलगम्भीरे—
श्लेषः			
	(क) अष्टभेदः	श्लिष्टैः पदैरनेकार्था	—
	(१) वर्णश्लेषः	—	प्रतिकूलतामुपगते
	(२) प्रत्ययश्लेषः	—	किरणाहरिणाङ्कस्य
	(३) लिंगश्लेषः	—	विकसन्नेत्रनीलाब्जे-
	(४) प्रकृतिश्लेषः	—	(क) अयंसर्वाणि शास्त्राणि (ख) नीतानामाकुलीभावम्
	(५) पदश्लेषः	—	पृथुकार्तस्वरपात्रं
	(६) विभक्तिश्लेषः	—	सर्वस्वं हर सर्वस्य त्वं
	(७) वचनश्लेषः	—	क किरणाहरिणाङ्कस्य ख विकसन्नेत्रनीलाब्जे
	(८) भाषाश्लेषः	—	महरे सुरसन्धं मे-
	(ख) पुनः त्रिभेदः		
	(१) सभंगश्लेषः	—	येनध्वस्तमनोभवेन
	(२) अभंगश्लेषः	—	
	(३) सभंगाभंगश्लेषः	—	
चित्रम्	—	पद्माद्याकार हेतुत्वे	मारमासुषमा चारु

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

(७७) प्रश्नः—सलक्षणान् सोदाहरणान् अर्थालंकारान् प्रतिपादयत।

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
उपमा	द्विभेदा	साम्यं वाच्यमवैध-	
(क) पूर्णा		सा पूर्णा यदि सामा-	
उपमेयेन, उप-	(१) श्रौती	श्रौती यथेवा शब्दा	
मानेन, साधा-			
रणधर्मेण, उप-			
मावाचकशब्दे-			
न युक्ता	(क) तद्धितगा	—	सौरभमम्भोरुहवन्मुखस्य
	(ख) समासगा	—	
	(ग) वाक्यगा	—	
	(२) आर्थी	आर्थी तुल्य समानाद्या—	
	(क) तद्धितगा	—	मधुरः सुधावदधरः
	(ख) समासगा	—	
	(ग) वाक्यगा	—	
—	—	—	—
(ख) लुप्ता	पंचविधा	सामान्यधर्मादे—	—
(१) धर्म लोपे	१ वाक्यगाश्रौती धर्मलुप्ता		मुखमिन्दुर्यथा
पंचधा पुनः पंचधा	२ ,, आर्थी ,,		पाणिःपल्लवेन समः
	३ समासगाश्रौती ,,		वाचः सुधा इव,
	४ ,, आर्थी ,,		ओष्ठस्ते बिम्बतुल्यः
	५ तद्धितगार्थी ,,		मनोऽश्मव।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
	(१) आधारे क्यचि	—	अन्तःपुरीयसि रणेषु
	(२) कर्मणि क्यचि		सुतीयसि त्वं, पौरंजनं
	(३) कर्तरि क्यङि	—	तव सदा रमणीयते.
	(४) कर्मणि णमुलि	—	श्रीः दृष्टः प्रियाभिर
		—	मृतद्युतिदर्शम्
	(५) कर्तरि णमुलि		इन्द्र संचारमत्र भुवि.
			संचरसि क्षितीश ।:
(२) उपमानलोपे	(क) वाक्यगा	—	तस्या मुखेन सदृशं
	(ख) समासगा		रन्यं
		—	नास्ते न वानयन–
		—	तुल्यम् ।
(३) वाचकलोपे	(क) समासगा	—	वदनं मृगशावाक्ष्याः
			सुधाकर मनोहरम् ।
	(ख) क्विब्गता	—	गर्दभयति श्रुतिपरुषं-
(४) धर्मोपमान-	(१) समासगा	—	तस्यामुखेन सदृशंलोके
लोपे	(२) वाक्यगा	—	नास्ते न वा नयन-
			तुल्यम् ।
(५) धर्मवाचकयो लोंपे	(१) क्विप् गता	—	विधवति—
(६) उपमेयलोपे	(२) समासगता		मुखाब्जमस्याः
(७) धर्मोपमेययो-	—	उपमेयस्य लोपे तु	अरातिविक्रमालोक–
लोंपे	—	—	यशसि प्रसरति भवतः।
(८) धमोपमान-	—	—	राजते मृगलोचना
वाचकानांलोपे			

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
एकदेशविवर्ति-न्युपमा	—	एकदेशविवर्तिन्युपमा	नेत्रैरिवोत्पलैः पद्मैः
रसनोपमा	—	यथोर्ध्वमुपमेयस्य-	चन्द्रायते शुक्लरुचापि
मालोपमा	—	मालोपमायदेकस्य-	वारिजेनेव सरसी-
अनन्वयः	—	उपमानोपमेयत्वमेक-	राजीवमिव राजीवं
उपमेयोपमा	—	पर्यायेणद्वयोरेतदु-पमेयोपमा	कमलेवमतिर्मतिरिव कमला
स्मरणम्	—	सदृशानुभवाद्वस्तु	अरविन्दमिदं वीक्ष्य
रूपकम्	त्रिधा (१) परम्परितम् (२) साङ्गम् (३) निरङ्गम्	रूपकं रूपितारोपाद्	
(क) परम्परितम्	—	यस्यकस्यचिदारोपः	
	(क) श्लिष्टशब्द-निबन्धनं		
	(१) केवलपरम्प-रितम्	—	आहवे जगदुद्दण्ड-
	(२) मालारूपम्	—	पद्मोदयदिनाधीश-
	(ख) अश्लिष्टशब्द निबन्धनम्		
	(१) केवल परम्परितम्	—	पान्तु वोजलदश्याम-
	(२) मालारूपम्	—	मनोजराजस्य सितातपत्रम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
(ख) साङ्गम्	—	अंगिनो यदि साङ्गस्य- आरोप्याणामशेषाणाम्	
	(१) समस्तवस्तु-विषयम्		रावणाग्रहक्लान्त-
	(२) एकदेश विवर्ति	यत्रकस्यचिदार्थत्वम्-	लावण्यमधुभिः पूर्ण-
(ग) निरङ्गम्	—	निरङ्गं केवलस्यैव	—
	(१) मालारूपं	—	निर्माणकौशलं धातुः
	(२) केवलं	—	दासे कृतागसि भवेदुचितः
क्वचित् परम्परितमपि—एकदेशविवर्ति	—	—	खड्गः क्ष्मासौविदल्लः
एकदेशविवर्ति श्लिष्टं	—	—	करमुदयमहीधरस्तनाग्रे
समस्तवस्तुविषयं श्लिष्टं	—		करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य । विकसित-कुमुदेक्षणं चुचुम्बे हारदवलामुखामिन्दु नायकेन ।
क्वचित् समासाभावेऽपि रूपकं	—	—	मुखं तव कुरंगाक्षि
क्वचिद् वैयधिकरण्येऽपि	—	—	विदधेमधुपश्रेणीमिह
क्वचिद्वैधर्म्येऽपि	—		सौजन्याम्बुमरुस्थली

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अलंकाराः	भेदाः	लक्षणानि	उदाहरणानि
अधिकारूढ़ वैशिष्ट्य रूपकं	—	अधिकारूढवैशिष्ट्यं	इदं वस्त्रं साक्षाद्
परिणामः	—	परिणामो भवेत्तुल्या	स्मितेनोपायनं-दूरादाग
	तुल्याधिकरणः	—	—
	अतुल्याधिकरणः	—	—
	अधिकारूढ़ वैशिष्ट्येऽपि	—	वनेचराणांवनिता-सखानां
सन्देहः	—	सन्देहः प्रकृतेन्यस्य	—
	(१) शुद्धः		किं लावण्यतरोरियम्
	(२) निश्चयगर्भः		अयं मार्तण्डः किं न
	(३) निश्चयान्तः		किंतावत्सरसिसरोजमे
भ्रान्तिमान्	—	साम्यादतस्मिंस्त-द्बुद्धिः	मुग्धा दुग्धधिया
उल्लेखः	—	क्वचिद्भेदादग्रहीतृणां	
	बोधकभेदे		प्रिय इतिगोपवधूभिः
	विषयभेदे		गाम्भीर्येणसमुद्रोऽसि
अपह्नुतिः		प्रकृतं प्रतिषिध्य-	
	(१) अपह्नवपूर्वके आरोपे		नेदंनभोमण्डल-मम्बुराशिः
	(२) आरोपपूर्वकेऽपह्नवे		एतद्विभाति चरमा-चल चुम्बि
अन्या अपह्नुतिः	—	गोपनीयं कमप्यर्थं	

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अलंकाराः	भेदाः	लक्षणानि	उदाहरणानि
	श्लेषान्यथाकरणे		काले वारिधाराणां
	अश्लेषान्यथाकरणे		इह पुरोऽनिलकम्पित विग्रहा
निश्चयः		अन्यन्निषिध्य प्रकृत स्थापनं	वदनमिदं न सरोजं अथवा हृदि विसलताहारो
उत्प्रेक्षा	(१) वाच्या तत्र	भवेत् संभावनोत्प्रेक्षा	—
निमित्तोपादाने	भावाभिमाने	—	
	जात्युत्प्रेक्षा		ऊरुः कुरङ्गकदृशः
	गुणोत्प्रेक्षा		ज्ञाने मौनं क्षमाशक्तौ
	क्रियोत्प्रेक्षा		गङ्गाम्भसि सुरत्राण
	द्रव्योत्प्रेक्षा		मुखमेणीदृशो भाति
	अभावाभिमाने		कपोलफलकावस्याः
	जात्युत्प्रेक्षा		
	गुणोत्प्रेक्षा		गङ्गाम्भसि सुरत्राण
	क्रियोत्प्रेक्षा		अपश्यन्तौ-
	द्रव्योत्प्रेक्षा	—	—
	(२) प्रतीयमाना		तन्वङ्ग्याःस्तनयुग्मेन
	भावाभिमाने		
	जात्यु प्रेक्षा		
	गुणोत्प्रेक्षा		
	क्रियोत्प्रेक्षा		
	द्रव्योत्प्रेक्षा		
	अभावाभिमाने		
	जात्युत्प्रेक्षा		

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अलंकाराः	भेदाः	लक्षणानि	उदाहरणानि
निमित्तोपादाने	गुणोत्प्रेक्षा		
	क्रियोत्प्रेक्षा		
	द्रव्योत्प्रेक्षा		
निमित्तानुपादाने	वाच्या ८ विधा		
	प्रतीयमाना चाष्टविधा		
वाच्योत्प्रेक्षायाः ३६ भेदाः	स्वरूपोत्प्रेक्षा		स्मरस्य विजयस्तम्भः
	फलोत्प्रेक्षाः		रावणस्यापि रामास्तो
	हेतूत्प्रेक्षाः		सैषा स्थली यत्र
स्वरूपगा द्विभेदा	उक्त निमित्ता		स्नातीवारिवधूवर्ग-
	अनुक्तनिमिता		चन्द्र इवापरः
प्रतीयमानायाः ३२ भेदा	फलगा	—	—
	हेतुगा	—	—
फलगा	उक्तनिमित्ता	—	ऊरुः कुरङ्गकदृशः
	अनुक्तनिमित्ता	—	घटितमिवाञ्जनपुञ्जैः
हेतुगा	उक्त निमित्ता	—	अथवा लिम्पतीवतमो
	अनुक्त निमित्ता	—	—
अलंकारान्तरोत्था उत्प्रेक्षा		अलंकारान्तरोत्था सा-	—
			—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
	सापह्नवोत्प्रेक्षा श्लेषहेतुगा उपमोपक्रमोत्प्रेक्षा		अश्रुच्छलेन सुदृशो मुक्तोत्करः संकटशुक्ति पारेजलं नीरनिधेर- पश्यन्
अतिशयोक्तिः		सिद्धत्वेऽध्यवसा- यस्याति-	
	भेदेऽभेदः		कथमुपरिकलापिनः वा, विश्लेष दुःखा- दिव, एवं, सहाधर दलेनास्या-
	सम्बन्धेऽसम्बन्धः		अस्याः सर्गविधौ-
	अभेदे भेदः		अन्यदेवाङ्गलावण्यं
	असम्बन्धेसम्बन्धः		यदि स्यान्मण्डले सक्त
	कार्यकारण पौर्वापर्य व्यत्ययः ।		—
कार्यकारणपौ- र्वापर्यव्यत्ययः द्विविधः	कारणात्पूर्वकार्यभावः		प्रागेव हरिणाक्षीणां
	कार्यकारणयोः समकालभावः		सममेव समाक्रान्तं-
तुल्ययोगिता	क्रियासम्बन्धे	पदार्थानां प्रस्तुता- नामन्ये	अनुलेपनानिकुसु- मान्य-
	गुणसम्बन्धे		तदङ्गमार्दवं द्रष्टुः
	उभयसम्बन्धे		दानं वित्तादृतंवाचः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अलंकाराः	भेदाः	लक्षणानि	उदाहरणानि
दीपकम् ।		अप्रस्तुतप्रस्तुत-योर्दीपकं-	
	प्रस्तुतस्यैकक्रिया-सम्बन्धे		वलावलेपादधुनापि-
	अप्रस्तुतस्यैकक्रिया-सम्बन्धे		सतीव योषित् प्रकृतिः
	एकस्यकारकस्यानेक-क्रियासम्बन्धे		दूरंसमागतवति त्वयि-
प्रतिवस्तूपमा-		प्रतिवस्तूपमा सा स्यात्	धन्यासि वैदर्भि गुणैरुदारै-
	मालायां		विमल एव रवि-विशदः शशी-
	वैधर्म्येण		चकोर्य एवचतुराश्चन्द्रि
दृष्टान्तः		दृष्टान्तस्तु सधर्मस्य वस्तुनः	
	साधर्म्येण		अविदितगुणापि सत्कवि-
	वैधर्म्येण		त्वयि दृष्टे कुरङ्गाक्ष्याः
निदर्शना	द्विविधा	सम्भवन्दस्तुसम्बन्धोऽसंभवन्वा-	
	संभवद्वस्तुसम्बन्धा		कोऽत्र भूमिवलये जनान्मुधा-
	असम्भवद्वस्तुसम्बन्धा		
	एकवाक्यगा		कलयति कुवलयमाला-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अलंकाराः	भेदाः	लक्षणानि	उदाहरणानि
निदर्शना			अथवा
			प्रयाणे तव राजेन्द्र-
	अनेकवाक्यगा		इदं किलाकाजमोहरं-
			अथवा
			जन्मेदं वन्ध्यतां नीतं
			एवं, क्वसूर्यप्रभवोवंशः
	उपमेयवृत्तस्योपमाने		योऽनुभूतः कुरं-
	ऽसम्भवेऽपि		गाद्यास्त-
	मालारूपाऽपि		त्विपसि शुकं वृषदंशक
व्यतिरेकः		आधिक्यमुपमेयस्योप	
	(१) उपमेयाधिक्ये		—
	(२) उपमेयन्यूनत्वे		—
उपमेयाधिक्ये	हेत्वोरुक्तौ शाब्दं		अकलंकं मुखं तस्या
			न कलंकी विधुर्यथा
२४ भेदाः	उपमेयोत्कर्षानुक्तौ ,,		अत्रैव अकलंक
			पदाभावे
	उपमानापकर्षानुक्तौ,		अत्रैव कलंकि-
			पदाभावे
	उत्कर्षापकर्षानुक्तौ,		अत्रैव उभयोः
			पदयोरभावे
	हेत्वोरुक्तावार्थम्		अकलंकं मुखं तस्या
			न कलंकिवि पमम्
	उ० उ० अनुक्ता-		अत्रैव अकलंधूक
	वार्थम्		पदाभावे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
	उ० अप० अनुक्ता वार्थम्		अत्रैव कलंकि पदाभावे
	उ० अप० ,, ,,		अत्रैव उभयोः पदयोरभावे
	हेत्वोरुक्तावाद्विसम्		अकलंकं मुखं तस्या जयतीन्दुं कलंकिनम्
	उ० उ० अनु० ,,		अत्रैव अकलंक- पदाभावे
	उ० अप० ,, ,,		अत्रैव कलंकि- पदाभावे
	उ० अप० ,, ,,		अत्रैव उभयोः पदयोरभावे
	श्लेषे १२ / अश्लेषे १२ } २४		अतिगाढगुणा- याश्चनाब्जवद् भंगुरा गुणाः।
उपमेयन्यून- तायाम्	२४ भेदाः		क्षीणः क्षीणोऽपि शशी भूयो
सहोक्तिः		सहार्थस्य वलादेकंयत्र	
	अतिशयोक्तिः द्विविधा (१) अभेदाध्य- वसायमूला (क) श्लेषभित्तिका		सहाधरदलेनास्या यौवने

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
सहोक्तिः	(ख) अन्यथा		सह कुमुदकदम्बैः काम-
	मालारूपा च	—	अत्र मालारूपापि सहोक्तिः
	(२) कार्यकारण-यौर्वापर्य रूपा–		सममेवनराधिपेनसा०
विनोक्तिः		विनोक्तिर्यद्वि-नान्येन	—
	शोभना		विना जलदकालेन चन्द्रो
	असाध्वशोभना		अनुयान्त्या जनातीतं कान्तं
विना पदाभावेऽपिसा			निरर्थकं जन्मगतं नलिन्या
समासोक्तिः		समासोक्तिः समैर्यत्र कार्यलिङ्ग	
	समेन कार्येणारोपः		व्याधूय यद्वसनमम्बुज०
	लिंग साम्येनारोपः		असमाप्तजिगीषस्य
विशेषणसाम्यारोपः–	विशेषणसाम्येनारोपः		
	(क) श्लेषमूलः		विकसितमुखीं रागासङ्गात्
	(ख) साधारण्येन		निसर्गसौरभोद्भ्रान्त
	(ग) उपमागर्भत्वे		दन्तप्रभापुष्पचिता

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अलङ्कारा	भेदाः	लक्षणानि	उदाहरणानि
परिकरः		उक्तैर्विशेषणैः साभिप्रायैः	अङ्गराज, सेनापते द्रोणोपहासिन्
अर्थ श्लेषः		शब्दैः स्वभावादेकार्थैः	प्रवर्तयन् क्रियाः साध्वीर्मा
अप्रस्तुतप्रशंसा		क्वचिद विशेषः सामान्यात्सामा	
	(१) विशेषे प्रस्तुते सामान्यं		पादाहतं यदुत्थाय
	(२) सामान्ये ,, विशेषः		स्त्रगियं यदि जीवितापहा
	(३) कार्ये कारणम्		इन्दुर्लिप्त इवाञ्जनेन
	(४) कारणे प्रस्तुते कार्यम्		गच्छामीति मयोक्तया
	(५) तुल्ये प्रस्तुते तुल्यम्		—
तुल्ये प्रस्तुते तुल्यं	द्विविधम्		—
	(१) श्लेषमूला		
	(क) विशेषणमात्र-श्लेषे		सहकारः सदामोदो वसन्त
	(ख) विशेष्यास्यापि श्लेषे		पुंस्त्वादपि प्रविचलेयदि यद्यधो
	(२) सादृश्यमात्रमूला		एकः कपोत पोतः शतशः श्येनाः
	वैधर्म्येणापि		धन्याःखलु वने वाताः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
तुल्ये प्रस्तुते तुल्यं	असम्भवेऽपि		कोलिलोऽहं भवान् काकः
व्याजस्तुतिः	उभयरूपत्वे (१) निन्दया स्तुतिः	निन्दास्तुतिभ्यां वाच्याभ्यां	अन्तश्छिद्राणिभूयांसि स्तनयुगमुक्ताभरणाः
	(२) स्तुत्या निन्दा		व्याजस्तुतिस्तव पयोद
पर्यायोक्तम्		पर्यायोक्तं यदा भङ्ग्या गम्यमेव	स्पृष्टास्ता नन्दने शच्याः एवं—अनेन पर्यासयता
अर्थान्तरन्यासः	अष्टधा—	सामान्यं वा विशेषेण विशेषः	
	(१) साधर्म्येण सामान्यं विशेषेण		वृहत्सहाय कार्यान्तं
	(२) ,, विशेषः सामान्येन		यावदर्थयदां वाचमेवमादाय
	(३) ,, कार्यं कारणेन		पृथ्वि स्थिराभव भुजंगम
	(४) ,, कारणं कार्येण		सहसा विदधीत न क्रियाम्
	(१) वैधर्म्येण सामान्यं विशेषेण	—	—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
अर्थान्तरन्यासः	(२) ,, विशेषं-सामान्येन		इत्यमाराध्यमानोपि
	(३) ,, कार्यं कारणेन		सहसा विदधीत न क्रियाम्
	(४) ,, कारणं कार्येण	—	—
काव्यलिङ्गम्		हेतोर्वाक्यपदार्थत्वे-काव्यलिंगं	
	वाक्यानि वाक्यार्थे हेतवः		यत्त्वन्नेत्रसमानकान्ति
	एकपदं पदार्थे हेतुः		त्वद् वाजि राजि निर्धूतधूली
	अवेकपदं पदार्थे हेतुः		पश्यन्त्यसंख्यपथगां
अनुमानम्		अनुमानं तु विच्छित्या	जानीमहेऽस्या हृदि अथवा यत्र पतत्यवलानां दृष्टिः
हेतुः		अभेदेनाभिधा हेतु-र्हेतोर्हेतुः	तारुण्यस्य विलासः
अनुकूलम्		अनुकूलं प्रातिकूल्यमनु	कुपिताऽसि यदा तन्वि
आक्षेपः	द्विविधः	वस्तुनो वक्तुमिष्टस्य	—
	(१) वक्ष्यमाण विषये		
	(क) सर्वस्यापि निषेधः		स्मशरशतविधुराया

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
आक्षेपः	(ख) अंशोक्तस्यांशान्तरे निषेधः		तव विरहे हरिणाक्षी
	(२) उक्त विषये	—	—
	(क) वस्तुस्वरूप-निषेधः		बालअ णाहं दूती तुअ
	(ख) वस्तुकथन-निषेधः		विरहे तव तन्वङ्गी कथं
आक्षेपः (अपरः)		अनिष्टस्य तथार्थस्य	गच्छ गच्छसि चेत-कान्त
विभावना		विभावना विना हेतुं कार्योत्पत्तिः	
	उक्तनिमित्ता	—	अनायास कृशं मध्यं
	अनुक्तनिमित्ता	—	अत्रैव चतुर्थपादे वपुर्भाति मृगीदृशः इति पाठे
विशेषोक्तिः		सति हेतौ फलाभावो	
	उक्तनिमित्ता		धनिनोऽपिनिरुन्मादा
	अनुक्तनिमित्ता		अत्र चतुर्थ पादे कियन्तः सन्ति भूतले इति पाठे
	अचिन्त्यनिमित्तोऽपि		स एकस्त्रीणि जयति
विरोधः		जातिश्चतुर्भिर्जा-त्याद्यैर्गुणो	

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अलङ्कारा	भेदाः	लक्षणानि	उदाहरणानि
विरोधः	जातेः जात्या विरोधः	—	तव विरहे मलयम-रुद्वा
	जातेः गुणेन ,,	—	शशिरुचोऽपि सोष्माणः ।
	,, क्रियया ,,	—	हृदयमलिरुतमपि भिन्ते
	,, द्रव्येण ,,	—	नलिनीदलमपि निदाघरविरस्याः ।
	गुणेन गुणस्य ,,	—	संततमुसलासंगात्
	,, क्रियया ,,	—	अजस्य गृह्णतो जन्म
	,, द्रव्यस्य ,,	—	वल्लभोत्सङ्गसङ्गेन
	क्रियया क्रियायाः ,,	—	नयनयुगासेचनकं मानस
	,, द्रव्यस्य ,,	—	त्वद्वाजिराजि
	द्रव्यस्य द्रव्येण ,,	—	वल्लभोत्संगेति पद्ये चतुर्थपादे मध्यंदिनदिनाधिपः इति पाठे ।
असंगतिः		कार्यं कारणयोर्भि-न्नदेशता	सा बाला वयमप्र-गल्भ मनसः—
विषमम्		गुणौ क्रिये चेत् स्यातां विरुद्धे	
	कारणगुणविरुद्ध-कार्यगुणे		सद्यः करस्पर्शमवाप्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अलंकाराः	भेदाः	लक्षणानि	उदाहरणानि
विषमम्	कार्यकारणयोः क्रियाविरोधे		आनन्दममन्दमिमं
	आरब्धस्य वैफल्यम्		अयं रत्नाकरोऽम्भोधिरि—
	विरुद्धसंघटना		क्व वनं तरुवल्क भूषणं यथावा विपुले न ागरश-यस्य कुक्षि
समम्	—	समं स्यादानुरूप्येण	शशिनमुपगतेयं कौमुदी
विचित्रम्		विचित्रं तद्विरुद्धस्य	प्रणमत्युन्नतिहेतोर्जीवित
अधिकम्		आश्रयाश्रयिणोरेकस्याधि	
	आश्रयाधिक्ये आश्रिताधिक्ये		किमधिकमस्य ब्रूमो युगान्तकालप्रति-संहृता
अन्योन्यम्		अन्योन्यमुभयोरेकक्रियायाः	त्वया सा शोभते
विशेषः		यदाधेयमनाधारमेकं	
	अनाधारस्याधेयस्य स्थितिः		दिवमप्युपयातानां
	एकस्यानेकगोचरत्वे		कानने सरिदुद्देशे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
विशेषः	अन्यत् प्रकुर्वतः कार्य मशक्यस्यान्यवस्तुतः		गृहिणी सचिवः सखी
व्याघातः		व्याघातः स तु केनापि	दृशा दग्धं मनसिजं
व्याघातः (अपरः)		सौकर्येण च कार्यस्य	इहैव त्वं तिष्ठ द्रुतमहं
कारणमाला		परं परं प्रति यदा	श्रुतं कृतधियां सङ्गाज्जायते
मालादीपकम्		धर्मिणोरेकधर्मेण सम्बन्धः	त्वयि संगरसंप्राप्ते धनुषा
एकावली		पूर्वं पूर्वं प्रति विशेषणत्वेन	—
	पूर्वं प्रति परस्य विशेषणतया स्थापने		सरो विकसिताम्भोजमम्भोजं
	,, अपोहने		न तज्जलं यन्न सुचारुपंकजं
	विशेष्यस्य विशेषणतया स्थापने		
	,, अपोहने		वाप्यो भवन्ति विमला
सारः		उत्तरोत्तरमुत्कर्षः वस्तुनः	राज्ये सारं वसुधा
यथासंख्यम्		यथासंख्यमनूद्देश उद्दिष्टानां	उन्मीलन्ति नखै-र्लुनीहि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
पर्यायः		क्वचिदेकमनेकस्मिन्ननेकम्	
	एकमनेकभवनम्		स्थिताः क्षणं पक्ष्मसु
	अनेकमेकभवनम्		विचरन्ति विलासिन्यो
	एकस्यानेकत्रकरणम्		विसृष्टरागादधरान्निवर्तितः
	अनेकस्यैकत्रकरणम्		ययोरारोपितस्तारो
परिवृत्तिः		परिवृत्तिर्विनिमयः समन्यूनम्	
	समेन समस्य		दत्त्वा कटाक्षमेणाक्षी जग्राह
	न्यूनेनाधिकस्य		मया तु हृदयं दत्त्वा गृहीतो
	न्यूनस्याधिकेन		तस्य च प्रवयसो जटायुषः
परिसंख्या		प्रश्नादप्रश्नतो वापि कथिता	
	प्रश्नात् कथितवस्तुनो व्यपोहः शाब्दः		किं भूषणं सुदृढमत्र यशो
	,, ,, आर्थः		किमाराध्यं सदा पुण्यं
	अप्रश्नात् कलितवस्तुनो व्यपोहः शाब्दः		भक्तिर्भवे न विभवे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
परिसंख्या	व्यपोहः आर्थः		बलमार्तभयोपशान्तये
उत्तरम्		उत्तरं प्रश्नस्योत्तरादुन्नयो	वीक्षितुं न क्षमा श्वश्रूः
अर्थापत्तिः		दण्डापूपिकयाऽन्यार्थागमो	
	प्राकरणिकादप्राकरणिकापतने		हारोऽयं हरिणाक्षीणां
	अप्राकरणिकात्प्राकरणिकापतने		विललाप स बाष्पगद्गदं
विकल्पः		विकल्पस्तुल्यबलयोर्विरोधः	नमयन्तु शिरांसि धनूंषि वा
समुच्चयः		समुच्चयोऽयमेकस्मिन्	
	सद्योगः		हंहो धीरसमीर हन्त जननं
	असद्योगः		अत्र चतुर्थपादे मत्तादीनामशोभनं योगः
	सदसद्योगः		शशी दिवसधूसरो गलितयौवना
	गुणयौगपद्यम्		अरुणे च तरुणि नयने
	क्रियायौगपद्यम्		मुखमानतं च स, खि ते

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
समुच्चयः	गुणक्रियायौगपद्यम्		कलुषं च तवाहिते-ष्वकस्मा
समाधिः		समाधिः सुकरे कार्ये	मानमस्या निरा-कर्तुं पादयोर्मे
प्रत्यनीकम्		प्रत्यनीकमशक्तेन-प्रतीकारे	मध्येन तनुमध्या मे मध्यं
प्रतीपम्		प्रसिद्धस्योपमान-स्योपमेय	
	उपमेयत्वप्रकल्पने निष्फलत्वाभिधाने		यत्त्वन्नेत्रसमानकान्ति तद्वक्त्रं यदि मुद्रिता शशिकथा
प्रतीपम् (अपरम्)		उक्त्वा चात्यन्त-मुत्कर्षं	अहमेव गुरुः सुदा-रुणानां
मीलितम्		मीलितं वस्तुनो गुप्तिः केन-	
	सामान्यलक्षणं सहजं		लक्ष्मीवक्षोजकस्तू-रीलक्ष्म
	आगन्तुकम्		सदैव शोणोपल-कुण्डलस्य
सामान्यम्		सामान्यं प्रकृतस्या-न्यतादात्म्यं	मल्लिकाचितधम्मिल्ला

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
तद्गुणः		तद्गुणः स्वगुणत्या-गादत्युत्कृष्ट	जगाद वदनछद्मपद्म
अतद्गुणः		तद्रूपाननुहारस्तु हेतौ सत्य	हन्त सान्द्रेण रागेण भूते अथवा गाङ्गमम्बु सितमम्बु यामुनम्
सूक्ष्मं		संलक्षितस्तु सूक्ष्मोऽर्थ आकारेणे-	
	आकारेण		वक्त्रस्यन्दिस्वेद-बिन्दु प्रब
	इङ्गितेन		संकेतकालमनसं विट
व्याजोक्तिः		व्याजोक्तिर्गोपनं व्याजादुद्भिन्न	शैलेन्द्रप्रतिपाद्यमान-
स्वभावोक्तिः		स्वभावोक्तिर्दुरुहा-र्थस्वक्रिया	लाङ्गूलेनाभिहत्य-क्षितितल
भाविकम्		अद्भुतस्य पदार्थस्य भूतस्या	मुनिर्जयति योगीन्द्रो अथवा आसीदञ्जनमत्रेति
उदात्तम्		लोकातिशयसंपत्ति-वर्णनोदात्त	अधः कृताम्भोधर-मण्डलानां
उदात्तम् (अपरम्)		यद्वापि प्रस्तुतस्या-ङ्गं महतां	नाभिप्रभिन्नाम्बुरुहा सनेन

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अलङ्काराः	भेदाः	लक्षणानि	उदाहरणानि
रसवत्		रसभावौ तदाभासौ	अयं स रसनोत्कर्षी-पीनस्तन
प्रेयः			आमीलितालसवि-वर्तिततारका
ऊर्जस्वि			वनेऽखिलकलासक्ताः
समाहितम्			अविरलकरवाल-कम्पनैः
भावोदयः		भावस्य चोदये संधौ	मधुपानप्रवृत्तास्ते
भावसन्धिः			जन्मान्तरीणरम-णस्याङ्ग
भावशबलता			पश्येत्कश्चिच्चल चपल
संसृष्टिः		मिथोऽनपेक्षयैतेषां स्थितिः	देवः पायादपायान्नः
संकरः	त्रिविधः (१) अलंकृतीनामङ्गाङ्गित्वे (२) एकाश्रयानुप्रवेशे (३) सन्दिग्धत्वे	अङ्गाङ्गित्वेऽलंकृतीनां	आकृष्टिवेगविगलद्भु-जगेन्द्र कटाक्षेणापीषत्क्ष-णमपि इदमाभाति गगने भिन्दानं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

(७८) प्रश्नः—अलंकाराणां परस्परभेदकता प्रकाश्यताम् ?

उत्तरम् १—पुनरुक्तवदाभास–यमकयोर्भेदः ।

पुनरुक्तवदाभासे—'भुजङ्गकुण्डली–' इत्यादौ भिन्नानुपूर्वीकयोः समानार्थकत्वेन प्रतिभासमानयोः शब्दयोरुपादानम् । यमके तु–नवपलाश–पलाश इत्यादौ समानानुपूर्वीकयोरेव भिन्नार्थकयोरुपादानमिति भेदः ।

२—वक्रोक्ति–द्वितीयापह्नुत्योर्भेदः ।

वक्रोक्तौ–गोपनीयस्य वस्तुनः प्रथमं स्वयमभिधानम्–अन्योक्तस्य वाक्यस्यैवान्यथाकरणम्–द्वितीयापह्नुतौ तु–'इह पुरोऽनिलकम्पितविग्रहा–' इत्यादौ प्रकाशिताभिप्रायस्य स्ववचनस्यैव स्वयमन्यथाकरणम् इति भेदः ।

३—तुल्ययोगिता–शब्दश्लेषयोर्भेदः ।

तुल्ययोगितायां–एकस्यैव धर्मस्य अनेकधर्मिसम्बन्धतया प्रतीतिः, शब्दश्लेषे तु–अनेकेषां धर्मिणां पृथक् पृथक् धर्मसम्बन्धतया अवगम इत्यनयोर्भेदः ।

४—उपमारूपकयोर्भेदः ।

उपमायां—उपमानोपमेयसाधर्म्यस्याभिधावृत्तिप्रतिपाद्यत्वम् । रूपके तु—सादृश्यमूलत्वात् व्यञ्जनावृत्तिलभ्यत्वम् इत्यनयोर्भेदः ।

५—उपमा–अनन्वययोर्भेदः

उपमायां—द्वयोः धर्मिणोरुपमानोपमेयत्वाभिधानम् । अनन्वये तु–'राजीवमिव राजीवम्—' इत्यादौ एकस्मिन्नेव धर्मिणि उपमानोपमेयत्वकल्पनमित्यनयोर्भेदः ।

६—रूपकपरिणामयोर्भेदः ।

रूपके—आहार्य्या एव सकृदभेदबुद्धिः, अनन्तरं साधर्म्यप्रतीतिरेव नतु अभेदबुद्ध्यन्तरम् । परिणामे तु—वस्तुनोरेककार्यकारित्वरूपसाधर्म्येणाभेदबुद्धिरित्यनयोर्भेदः ।

७—अपह्नुतिरूपकयोर्भेदः ।

अपह्नुतौ—उपमेयप्रतिषेधपुरस्सरं उपमानतादात्म्यारोपणम् । रूपके तु—प्रकृतस्योपमेयस्याप्रतिषेधेन तत्र तत्रोपमानतादात्म्याभ्यासः इत्यनयोर्भेदः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

८—अतिशयोक्तिसंदेहयोर्भेदः ।

अतिशयोक्तौ—'मध्यं तव सरोजाक्षि—' इत्यादौ केवलं संशयमात्रम् । सन्देहे तु—उपमेये उपमानस्य संशयः अलंकारत्वव्यवस्थापकः इत्यनयोर्भेदः ।

९—सन्देहोत्प्रेक्षयोर्भेदः ।

सन्देहे—कोटिद्वयस्यैव समकक्षतया संशयप्रयोजकयोर्भावाभावकोट्योरेव तुल्यबलत्वम् । उत्प्रेक्षायां तु—अतुल्यबलतया उभयोरपि संशयकोट्योरेकस्यां कोटौ निवेश इत्यनयोर्भेदः ।

१०—निश्चय—निश्चयान्तसंदेहयोर्भेदः ।

निश्चये संदेहनिश्चययोः पृथगाश्रयवृत्तितया वैयधिकरण्यम् । निश्चयान्तसन्देहे तु—यस्य प्रथमतः सन्देहः तस्यैवान्ते निश्चयदर्शनात् सन्देहनिश्चययोः सामानाधिकरण्यमित्यनयोर्भेदः ।

११—भ्रान्तिमदुत्प्रेक्षयोर्भेदः ।

भ्रान्तिमदलंकारे—'मुग्धा दुग्धधिया' इत्यादौ भ्रान्तानां वल्लवानां प्रकृतविषयस्य चन्द्रिकादेः ज्ञानं नास्ति । उत्प्रेक्षायां तु—उत्प्रेक्षितुः पुरुषस्य ज्ञानं प्रकृतस्य सामान्यविषयस्याप्यस्ति इत्यनयोर्भेदः ।

१२—अतिशयोक्ति—उत्प्रेक्षयोर्भेदः ।

अतिशयोक्तौ—प्रतीतपदार्थकस्यैवारोप्यमाणस्य वाक्यार्थपर्यालोचनानन्तरमेवासत्यताप्रतीतिः । उत्प्रेक्षायान्तु—वाक्यार्थप्रतीतिसमकाले एवारोप्यमाणस्य वस्तुनः असत्यतया प्रतीतिरित्यनयोर्भेदः ।

१३—तुल्ययोगिता—दीपकयोर्भेदः ।

तुल्ययोगितायां—द्वयोः प्रकृतयोः, द्वयोर्वा अप्रकृतयोः पदार्थयोः गुणक्रियान्यतररूपैकधर्मेण परस्परं सम्बन्धः न तु प्रकृताप्रकृतयोः । दीपके तु—प्रकृताप्रकृतयोः पदार्थयोः गुणक्रियान्यतररूपैकधर्मेण सम्बन्धः इत्यनयोर्भेदः ।

१४—उपमादीपकयोर्भेदः ।

उपमायां—'कमलमिव मुखं मनोज्ञं—' इत्यादौ साम्यबोधकानां इवादिपदानां नियमेन प्रयोगः, दीपके तु इवादिपदानां अप्रयोग एव नियत इत्यनयोर्भेदः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

१५—प्रतिवस्तूपमादीपकयोर्भेदः।

प्रतिवस्तूपमायां—प्रकृताप्रकृतान्वयिनः एकस्यैव धर्मस्य विभिन्नाकारेण निर्देशः—दीपके तु—प्रकृताप्रकृतान्वयिनः एकस्यैव धर्मस्य एकाकारेण न तु भिन्नाकारेण निर्देश इत्यनयोर्भेदः।

१६—प्रतिवस्तूपमादृष्टान्तयोर्भेदः।

प्रणिधानगम्यसाम्यस्योपमानोपमेयगतसामान्यधर्मस्य तुल्यत्वम् दृष्टान्ते। प्रतिवस्तूपमायान्तु—सामानधर्मस्यैकत्वमित्यनयोर्भेदः।

१७—निदर्शना—दृष्टान्तयोर्भेदः।

निदर्शनायां—बिम्बप्रतिबिम्बभावापेक्षं विना वाक्यार्थस्यापर्य्यवसानम्। दृष्टान्ते तु—स्वतः पर्य्यवसितेन वाक्यार्थेन सामर्थ्यात् बिंबप्रतिबिम्बताप्रत्यायनम् इत्यनयोर्भेदः।

१८—अर्थापत्ति—निदर्शनयोर्भेदः।

अर्थापत्तौ—दण्डापूपन्यायादर्थान्तरप्रतीतिमात्रम्। निदर्शनायान्तु—वाक्यार्थस्य सादृश्ये पर्य्यवसानमित्यनयोर्भेदः।

१९—अर्थश्लेषशब्दश्लेषयोर्भेदः।

अर्थश्लेषे—अभिधया एकार्थबोधकैरपि शब्दैरभिधालक्षणाभ्यां वृत्तिभ्यामनेकार्थस्य प्रतिपादनम्। शब्दश्लेषे तु अभिधामात्रप्रतिपाद्यानेकार्थकशब्दैरनेकार्थाभिधानमित्यनयोर्भेदः।

२०—अप्रस्तुतप्रशंसा—दृष्टान्तयोर्भेदः।

अप्रस्तुतप्रशंसायां—क्वचिदप्रसिद्धस्यापि वस्तुनः प्रतिबिम्बत्वेन उपादानम्। दृष्टान्ते तु—सर्वत्र प्रख्यातस्यैव पदार्थस्येत्यनयोर्भेदः।

२१—पर्यायोक्ति—अप्रस्तुतप्रशंसयोर्भेदः।

पर्यायोक्तौ—कारणवत् कार्यस्यापि प्रस्तुतत्वम्। अप्रस्तुतप्रशंसायां तु कार्यस्य न प्रस्तुतत्वमित्यनयोर्भेदः।

२२—काव्यलिङ्गानुमानयोर्भेदः।

हेतुस्त्रिधा—ज्ञापको, निष्पादकः, समर्थकश्च, तत्र ज्ञापको हेतुरनुमानस्य विषयः, निष्पादको हेतुः काव्यलिंगस्य विषयः, समर्थको हेतुरर्थाऽन्तरन्यासस्य विषय इति भेदः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

२३—उत्प्रेक्षानुमानयोर्भेदः ।

उत्प्रेक्षायां—विषयिणः अनिश्चिततया प्रतीतिः । अनुमाने तु विषयिणः निश्चिततया बोध इत्यनयोर्भेदः ।

२४—भ्रान्तिमद्भाविकयोर्भेदः ।

भ्रान्तिमदलंकारे—अतस्मिन् तत्त्वेन बोधः । भाविके तु—भूतस्य भाविनोऽद्भुतस्य वस्तुनः प्रत्यक्षवत् भासमानत्वमित्यनयोर्भेदः ।

२५—समाधिसमुच्चययोर्भेदः ।

समाधौ एकस्मिन् कारणे फलसाधनायानुष्ठीयमाने काकतालीयन्यायेन उत्पन्नेन कारणान्तरेण फलस्य सुकरत्वम् । समुच्चये तु—मिलितान्येव कारणानि कार्यविशेषं जनयन्ति इत्यनयोर्भेदः ।

२६—अर्थापत्ति-अनुमानयोर्भेदः ।

अर्थापत्तौ—ज्ञाप्यज्ञापकयोः नियतसामान्यन्यायेनार्थान्तरप्रतीतिः । अनुमाने तु साध्यसाधनयोः व्याप्तिरूपसम्बन्धेन ज्ञानमित्यनयोर्भेदः ।

२७—परिवृत्ति-पर्याययोर्भेदः ।

परिवृत्तौ—एकवस्तुत्यागोपाधिकापरवस्तूपादानरूपो विनिमयः पर्याये तु अपरवस्तूपादानं प्रति अन्यवस्तुत्यागस्यानियमात् अनयोर्भेदः ।

२८—कारणमाला-मालादीपकयोर्भेदः ।

कारणमालायां—पूर्वपूर्वस्य वस्तुनः परं परं प्रति हेतुत्वमात्रम् । मालादीपके तु पूर्वपूर्वस्यार्थस्योत्तरोत्तरहेतुत्वम् सर्वेषामेकक्रियान्वयनियमश्चेत्यनयोर्भेदः ।

२९—असंगति-विरोधयोर्भेदः ।

असंगतौ—कार्यकारणयोः वैचित्र्याधायकत्वेन वैयधिकरण्यकल्पनम् । विरोधे तु—स्वतः सामानाधिकरण्येऽपि विरोधकल्पनम् इत्यनयोर्भेदः ।

३०—संसृष्टि-संकरयोर्भेदः ।

संसृष्टौ तिलतण्डुलन्यायेन स्फुटत्वेन गम्यमानभेदानां शब्दार्थालंकाराणां यथासम्भवमेकस्मिन् श्लोके समवस्थानम् । संकरे तु नीरक्षीर—न्यायेनासादितस्वातन्त्र्याणामलंकाराणामेकस्मिन् आश्रये परस्परानुग्राह्यानुग्राहकभावेन सम्मिश्रणमित्यनयोर्भेदः—इति शम् ।

साहित्यदर्पणस्यैषा सत्प्रश्नोत्तरमालिका ।
भूयात् श्रेयस्करी नित्यं परीक्षोत्तीर्णतार्थिनाम् ॥

इति शम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

रसस्वरूपनिरूपणे विभावानुभाव-

रसाः	शृङ्गारः १	हास्यः २	करुणः ३	रौद्रः ४	वीरः ५
वर्णाः	श्यामः	श्वेतः	कपोतसदृशः	रक्तः	हेमवर्णः
देवताः	विष्णुः	प्रमथः	यमः अन्तकः विधिश्च	रुद्रः	महेन्द्रः
स्थायि-भावाः	रतिः	हासः	शोकः	क्रोधः	उत्साहः
आलम्ब-नम्	नायको नायिका वा	विकृताकारः, विकृतवेषः, विदूषको वा	शोच्यः व्यक्तिः	शत्रुः	विजेतव्यः
उद्दीप-नम्	शून्यं गृहं, चन्द्रः चन्द्रिका, भ्रमरः ऋतुः आदि	विदूषकस्य चेष्टा	शोच्यस्य दशा मनोहरवपुषः स्मरणम्	शत्रोश्चेष्टादयः	शत्रोश्चेष्टा सेनावलोकनम्
अनु-भावाः	चुम्बनम् कटाक्षेक्षणम्	अक्षिसंकोचः, स्मेरत्वम् ओष्ठदंशनम् नेत्रलोमोद्गमावलोकनम्	दैवनिन्दा, भूमौपतनम् रोदनम् उच्छ्वासः निःश्वासः स्तम्भः	मुष्टिप्रहारः पतनम् क्रोधगर्जनम्	सहायान्वेषणम् सिंहगर्जनम्
सञ्चारि-भावाः	लज्जाहासौ, उग्रताया अभावः, आलस्याभावः, अन्ये—व्यभिचारिणः।	निद्रा—आलस्यं अवहित्था	मोहः व्याधिः ग्लानिः स्मृतिः विषादः जडता	उग्रता, आवेगः रोमांचः, स्वेदः वेपथुः, मदः अमर्षः	धृतिः, मतिः गर्वः, स्मृतिः तर्कः रोमाञ्चः
भेदाः	द्विविधः २ * संभोगः विप्रलम्भः	६ भेदाः षट् स्मितहसिते, विहसितावहसिते उपहसितातिहसिते	एक एव	एक एव	चतुर्विधः ४ दानवीरः धर्मवीरः, दयावीरः, युद्धवीरश्च
उदाहर-णानि	शून्यं वासगृहं विलोक्य—	गुरोर्गिरः पञ्च दिनान्यधीत्य वेदान्तशास्त्राणि—	विपिने क्व जटानिबन्धनम्—	कृतमनुमतं वा यैरिदं गुरुपातकम्—	१-त्यागः सप्तसमुद्र— २-राज्यं च वसु देहं च— ३-शिरामुखैः स्यन्दत— ४-भो लंकेश्वर दीयतां जनकजा

* शृङ्गारकरुणविप्रलम्भाख्योऽप्यस्ति एकः भेदः। स च न सर्वसम्मत इति नात्र लिखितः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

—संचारिभावादिबोधकं चक्रम्—

भयानकः ६	बीभत्सः ७	अद्भुतः ८	शान्तः ९	वत्सलः १०	विवरणं
कृष्णः	नीलः	पीतः	कुन्देन्दुसदृशः	पाटलः	उदाहरणस्य समस्ताः श्लोकाः साहित्यदर्पणतोऽवसेयाः
कालः	महाकालः	गन्धर्वः	श्रीनारायणः	बालगोपालः	
भयम्	जुगुप्सा	विस्मयः	शमः	वात्सल्यम्	
यस्माद्भयमुत्पद्यते	दुर्गन्धः रक्तः मांसम्	अलौकिकं वस्तु	संसारासारता परमात्मस्वरूपं	पुत्रः शिष्यः अनुजः	
तस्य चेष्टादयः	कृमिदर्शनम् दुर्गन्धः	अद्भुतवस्तुदर्शनम् महिमा	पुण्याश्रमः तपोवनम् सत्संगस्थानम्	पुत्रचेष्टा तस्य-विद्या सौन्दर्य बलम्	
वैवर्ण्य-स्वरविकृतिः स्वेदः रोमांचः कम्पः संकोचनम्	निष्ठीवनम्-आस्यवलनम् नेत्रसंकोचनम्	स्तम्भः, स्वेदः रोमाञ्चः, नेत्रविकासः	रोमांचः मौनम् दयाभावोदयः	पुलकः-आनन्दवाष्पादयः	
जुगुप्सा, आवेगः संमोहः संत्रासः ग्लानिः, शंका	मोहः, अपस्मारः व्याधिः, आवेगः मरणम्	वितर्कः, सम्भ्रान्तिः हर्षादयः	निर्वेदः, हर्षः स्मरणम् बुद्धिः	अनिष्टशंका हर्षः गर्वादयः	
एक एव	एक एव	एक एव	एक एव	एक एव	
नष्टं वर्षवरैः मनुष्यगणना-	उत्कृत्योत्कृत्य-	दोर्दण्डाञ्चित-चन्द्रशेखर-	रथ्यान्तश्चरत-स्तथाधृत-	यदाह धात्र्या प्रथमोदितं वचः	

इति साहित्यदर्पणादर्शः समाप्तः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

परीक्षासमागतप्रश्नपत्राणि

प्रथमपरिच्छेदे प्रश्नाः

ई० १९५९ यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ,
रेवारोधसि वेतसीतरुतले चेतः समुत्कंठते ॥
अत्र हि विभावनाविशेषोक्तिमूलस्य संदेहसंकरालंकारस्य स्फुटत्वम्
ग्रन्थकृता काव्यलक्षणप्रकरणे उक्तम् तत् स्पष्टमुपपाद्यताम्। ६

१९५७ तददोषौ शब्दार्थौ सगुणाविति काव्यलक्षणे शब्दार्थयोः सगुणत्व-विशेषणानुपपत्तिर्दर्पणोक्तदिशा प्रदर्श्यताम्। ६

१९५६ काव्यस्य प्रयोजनानि निरूप्य रीतिरात्मा काव्यस्येतिमतं निरस्यताम्। ६

१९५५ "काव्यस्यात्मा ध्वनि" रिति ध्वनिकारमतं निरस्य विश्वनाथाभिमतं काव्यस्वरूपं निरूप्यताम्। ५

१९५४ उत्तमकाव्यत्वेन सम्मतस्य "न्यक्कारो ह्ययमेवे" तिपद्यस्याऽ-काव्यत्वं ग्रन्थोक्तरीत्या सुस्पष्टं विशदीकृत्य निर्दुष्टकाव्यस्य प्रविरलविषयत्वं निर्विषयत्वं वा सयुक्तिकं प्रतिपाद्यताम्। ५

अथवा

शब्दार्थयोः सगुणत्वविशेषणानुपपत्तिं प्रदर्श्य गुणालंकाररीतीनां काव्ये कुत्र स्थितिरित्यभिधीयताम्। ५

१९५३ अस्फुटालंकारत्वे उदाहृतं पद्यं विशदीकृत्य तत्रालंकारयोरस्फुटत्वं प्रदर्शनीयम् किंच त्रिरूपध्वने रसादिमात्रध्वनेर्वा काव्यत्वमिति विविच्य "वाक्यं रसात्मकं काव्य" मित्यत्र रसपदेन केषां ग्रहण-मिति प्रतिपाद्यताम्। ५

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

१९५२ ध्वनिकृतां काव्यत्वं निरस्यताम् । ३

किंच "तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि" इतिलक्षणघटकयोः सगुणावनलंकृतीपदयोः खंडनप्रकारः प्रदर्शनीयः । ५

काव्यसामान्यलक्षणं सविस्तरं निरूप्य वस्त्वलंकारव्यंजनस्थले काव्यत्वं ग्रन्थकर्तुः सम्मतं न वेति विशदरूपेण प्रतिपाद्यताम् । ५

१९५१ प्राच्याभिमतकाव्यत्वे विश्वनाथालोचितविप्रतिपत्तीर्निर्दिश्य तदभीष्टं काव्यलक्षणं सोदाहरणमुच्यताम् । ८

१९४९ काव्यप्रकाशकृता कृतं काव्यलक्षणं श्रीविश्वनाथेन कथं दूषितम् ।

१९४८ "किंचैवं काव्यं प्रविरलविषयं निर्विषयं वा स्यात् सर्वथानिर्दोषस्यैकान्तमसंभवात्"

"नहि कवेरितिवृत्तमात्रनिर्वाहेणाऽऽत्मपदलाभः इतिहासादेरेव तत्सिद्धेः" ।

अनयोरंशयोराशयः सुस्पष्टं निरूपणीयः ।

१९४७ "वाक्यं रसात्मकं काव्यम्" अस्य भावार्थः सोपपत्तिकं सोदाहरणं च विशदीकरणीयः ।

ध्वनिकृदुक्तकाव्यलक्षणखंडनपूर्वकं दर्पणदर्शितं काव्यलक्षणं विशदं प्रतिपाद्यताम् ।

१९३८ काव्यस्य फलान्यभिधाय स्वमतेन काव्यलक्षणं विशदं निगद्यताम् । १०

१९३७ स्वमतेन काव्यलक्षणं प्रतिपाद्यताम् ।

१९३३ ध्वनिकारोक्तकाव्यलक्षणखण्डनपुरस्सरं दर्पणकाराभिमतं काव्यलक्षणं सोपपत्तिकमुच्यताम् ।

"अत्ता एत्थ" इत्यत्र कीदृशं काव्यत्वमायातीति सल्लक्षणसमन्वयमुच्यताम् ।

१९२२ प्राचीनोक्तकाव्यलक्षणे अदोषपदोपादानस्याऽनुचितत्वं स्फुटं निर्देश्यम् ।

१९२६ विश्वनाथशरणीकृतसरणिमनुसरद्भिर्भवद्भिस्तदितरमतनिरसनपूर्वकं काव्यस्वरूपलक्षणं समुचितमुपपाद्यताम् । अपि किमपि विरसताबीजं लक्षणेऽस्मिन्नपि भवद्भिर्लक्षीक्रियते ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

१९२० परोक्तंकाव्यलक्षणं दर्पणदिशा स्फुटं निरस्य तदभिमतं तत्प्रदर्शयत।

१९६० वेदादिशास्त्रान्तरापेक्षया काव्यादेव चतुर्वर्गफलप्राप्तिः कथं सुखा-
दुपजायते ? सविस्तरं निरूप्यताम् । १०

अथवा

"कीटानुविद्धरत्नादिसाधारण्ये च काव्यता । [दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः ।"

इति श्लोकस्याभिप्रायः ससन्दर्भमुपपाद्यताम् ।

१९६१ काव्यप्रकाशकारोक्ते काव्यलक्षणे "अदोषौ" इत्यंशः कथं खण्डि-
तो दर्पणकारेण ?

"न्यक्कारो ह्ययमेव"—इति पद्ये को दोषः ? किंच तत्स्वरूपम् । १५

ध्वनिकारलक्षणे स्ववचनविरोधं प्रदर्श्य "वाक्यं रसात्मकं काव्य"
मिति लक्षणं व्याख्यायताम् । १०

द्वितीयपरिच्छेदे प्रश्नाः

१९५९ "तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा" इति कारिकाव्याख्याने
संकेतग्रहणप्रकारो ग्रन्थकृदुक्तः सम्यगुपपाद्यताम् । ६

लक्षणालक्षणं ससमन्वयं निरूप्य गौण्यां लक्षणायां कीदृशो लक्ष्यार्थौ ग्रन्थकृता सिद्धान्तित इति परमतखंडनपुरःसरं सम्यगुपपाद्यताम् । ८

अथवा

अभिधानियामकानां संयोगविप्रयोगादीनां स्वरूपं सोदाहरणं स्पष्टी-
क्रियताम् । संयोगसाहचर्यलिंगानां परस्परं भेदोऽपि स्फुटतयोपपाद्यः ८

१९५८ आकाङ्क्षायोग्यतासत्तीनां स्वरूपमुपदर्श्य तासां वाक्योपयोगित्वं
विव्रियताम् । आकांक्षायोग्यतयोरात्मार्थधर्म्मत्वेपि पदोच्चयधर्मत्व-
मुपचारात् इतिग्रन्थपङ्क्तिं च व्याचक्षाणैरुपचारपदार्थः स्पष्टी-
क्रियताम् । १०

अथवा

शुद्धायाः लक्षणायां अष्टौ भेदाः सोदाहरणं विव्रियन्ताम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

ई०१६५७ गौर्वाहीकः इत्यत्र गोशब्दस्य जाड्यादिगुणेषु वाहीकार्थे वा लक्षणेति सोपपत्तिकमुपपाद्यताम्। ७

१६५६ अत्राकांक्षायोग्यतयोरात्मार्थधर्मत्वेपि पदोच्चयधर्मत्वमुपचारात् इति पंक्तेस्तात्पर्यमुपपाद्य अभिधायाः स्वरूपमुपपाद्यताम्। ७

अथवा

अभिधामूलाया व्यंजनाया लक्षणमुदाहरणं च समुल्लिख्य किमर्थं तात्पर्याख्या वृत्तिरंगीक्रियते इति विविच्यताम्।

१६५५ संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु चेति कारिकांशं व्याख्याय कर्मणि कुशल इत्यस्य पराभिमतं रूढिलक्षणोदाहरणत्वं निरस्यताम्

अथवा ७

आर्थव्यंजनायाः सोदाहरणं स्वरूपं प्रदर्श्यताम्।

१६५४ राजा कंटकं शोधयति इत्यत्र लक्षणां नाम्ना निर्दिश्य फलस्य धर्मधर्मिगतत्वेन द्विविधा लक्षणा सोदाहरणा प्रदर्शनीया। ७

१६५३ कर्मणि कुशल इत्यत्र मतान्तरनिर्देशपूर्वकं लक्षणाखंडनं विधायाभिधामूला व्यंजना सोदाहरणा प्रदर्शनीया। ५

१६५२ लक्षणलक्षणोपादानलक्षणयोर्मिथो भेदमसंलक्ष्यक्रमव्यंग्यध्वनेः पदांशवर्णरचनाप्राबन्धप्रकाश्यत्वेन चातुर्विध्यं च सोदाहरणमुपपाद्य काव्ये काक्वादिस्वराणां विशेषप्रतीतिकर्तृत्वे दर्पणविचारः साधु प्रकाश्यताम्। ६

साहित्ये क्व च कथं च संकेतग्रहः क्व च नेति सम्यग् विविच्यताम्। राजा गौडेन्द्रं कंटकं शोधयति, राजा कंटकं शोधयति इत्युभयत्र लक्षणास्वरूपं पारस्परिकं भेदं च निर्दिश्य सोदाहरणाभिधामूला व्यंजना प्रतिपादनीया।

१६५१ गौर्वाहीकः इत्यत्र कतमया लक्षणया कीदृशो लक्ष्यार्थः प्रेक्षावतामभिमतः। कथमत्र परवादनिरासः। लक्षणाप्रयोजनं च किमिति सोपपत्तिकं विचार्यताम्। ७

१६४६ (क) अत्राकांक्षायोग्यतयोरात्मार्थधर्मत्वेपि पदोच्चयधर्मत्वमुपचारात्
(ख) अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

प्रकरणं प्रदर्श्य उल्लिखितयोः संदर्भयोः आशयोविशदीकरणीयः।

ई०१६४८एष्वेव हि व्यक्तेरुपाधिषु संकेतो गृह्यते न व्यक्तौ आनन्त्यव्यभिचार-दोषात्। इति ग्रंथस्याशयं स्फुटं निरुच्य लक्षणाया व्यंजनाया वा स्वरूपं च विशकलय्य के संयोगादयः, कश्च साहित्ये तेषामुपयोगः इति विशदं विविच्यताम्।

गौर्जल्पति इत्यत्र लक्ष्यार्थप्रतीतिप्रकारो मतान्तरनिरसनपुरस्सरं प्रदर्श्यताम्।

१६४७ अर्थो वाच्यश्च लक्ष्यश्च व्यंग्यश्चेति त्रिधा मतः। सोपपत्तिकं सोदाहरणं च भावार्थोऽस्योद्धरणस्य विशदीकार्यः।

१६४६ धर्मिधर्मगतत्वेन फलस्यैता अपि द्विधा। कारिकार्धमिदं व्याख्या-यताम्।

१६४५ गौर्वाहीकः इत्यत्र कतमा लक्षणा कश्चात्र सिद्धान्ते लक्ष्यार्थः, किंच मतान्तरम्, कथं च तन्निरासः, किंचात्र लक्षणायाः प्रयोजनम् सर्वं सुविशदमुपपाद्यताम्।

१६४२ अधोनिर्दिष्टस्य वाक्यद्वयस्य संगतिप्रदर्शनपुरस्सरं व्याख्या कार्या।

(क) एष्वेव हि व्यक्तेरनपायिषु संकेतो गृह्यते न व्यक्तौ आनन्त्य-व्यभिचारदोषापातात्।

(ख) अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम्।

१६४० व्यंजनास्थले फलस्य धर्मिगतत्वेनोदाहरणं प्रदर्श्य तात्पर्याख्या-वृत्तिः कैः किमर्थं च स्वीकृतेति सोदाहरणं तत्स्वरूपप्रदर्शनपूर्वकं निरूप्यताम्।

१६३६ लक्षणायाः सामान्यलक्षणं निरुच्य रूढौ परोक्तोदाहरणखंडन-पूर्वकमुदाहरणं लिख्यताम्।

१६३७ लक्षणलक्षणाया लक्षणम् उपादानलक्षणातो भेदनिर्देशपूर्वकं प्रदर्श्य अस्या उदाहरणं प्रदर्श्यताम्

१६६० लक्षणासामान्यलक्षणं सोदाहरणं निरूप्य कर्मणि कुशल इति परोक्तं रूढिलक्षणोदाहरणं तदाशयप्रकाशनपूर्वकं युक्तमयुक्तं वेति स्फुटं लिखत।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

ई०१९६० "अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम्। व्युत्पत्तिलभ्यस्यार्थस्य मुख्यार्थत्वे "गौः शेते" इत्यत्राऽपि लक्षणा-स्यात्" उद्धृतः संदर्भोऽयं स्फुटं व्याख्यायताम्। १०

अभिधामूलव्यञ्जनां सोदाहरणं निरूप्य "काव्यमार्गे स्वरो न गण्यते इत्यस्याशयः स्फुटतरं प्रदर्श्यताम्। १०

१९६१ केवलव्यक्तौ शक्तिग्रहे दोषमुद्भाव्य। कर्मणि कुशलः इतिरूढिलक्षणो-दाहरणं युज्यते न वेत्यालोच्यताम्। १०

———

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

तृतीयपरिच्छेदे प्रश्नाः

ई०१९५९ रसाः प्रतीयन्ते इति तु ओदनं पचतीतिवद् व्यवहारः। इयं ग्रन्थपंक्तिः सम्यग् व्याख्यायताम्। अनुपपत्तिसमाधाने स्फुटीकार्ये। १०

अथवा

अवस्थाभिर्भवन्त्यष्टावेताः षोडशभेदिताः। इतिकारिकांशो व्याख्यायताम्। काः षोडशकाश्चावस्था इति स्फुटीकार्यम्।

१९५८ प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते।
ततः संवलितः सर्वो विभावादिः सचेतसाम्।
प्रपानकरसन्यायाच्चर्व्यमाणो रसो भवेत्।
इति सार्धकारिकां व्याख्याय रसस्य ज्ञाप्यत्वं ग्रन्थकृदुक्तरीत्या खंडनीयम्। १०

अथवा

शठनायकः कलहान्तरिता नायिका नायिकालंकारेषु कुट्टमितं प्रलयाख्यः सात्त्विकभावः अवहित्थाख्यो व्यभिचारिभावः इत्येतेषां लक्षणानि निर्दिश्यताम्।

१९५७ करुणभयानकादीनां सुखमयत्वं कथं व्यवस्थापयितुं विश्वनाथेनेति विविच्यताम्।

अथवा

रसस्य निर्विकल्पके ज्ञानवेद्यत्वं निरस्य सोदाहरणं हास्यस्वरूपं निर्देश्यम्।

१९५६ विभावाद्यन्यतमसत्त्वेपि रसप्रतीतिं सोदाहरणां प्रतिपाद्य रससामान्यस्वरूपं प्रदर्श्यताम्।

१९५४ रसस्वरूपं स्वशब्दैः विलिख्य तस्यानुकार्यगतत्वं निराक्रियताम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

ई० १६५३ परस्य न परस्येति ममेति न ममेति च ।
तदास्वादे विभावादेः परिच्छेदो न विद्यते ॥
इमां कारिकां व्याख्याय रसस्य कार्यत्वं निराक्रियताम् । ८

१६५२ रसस्वरूपं स्वशब्दैर्विलिख्यानुकार्यस्य रत्यादेरुद्बोधस्य रसत्वं सम्भवति न वेति युक्तिभिर्विशदीक्रियताम् । ८

रसस्य स्वप्रकाश्यत्वमखंडत्वं च निरूप्य
शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान् ।
प्रत्यक्षानिव कंसादीन् साधनत्वेन मन्यते ॥
सोपक्रममिमां कारिकां प्रौढया व्याख्याय च मुग्धाकन्ययोरनुरागचेष्टा वर्णनीया ।

शृंगारवीरकरुणहास्यरौद्रभयानकाः । ६
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥
इत्येवं रसस्याष्टविधत्वेपि ।
न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा ।
रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमः प्रधानः ॥

एवमात्मनः शान्तस्य मोक्षदशायामेव जीवस्य परमात्मनिलयरूपस्य प्रादुर्भावात् नव्यैरतिरिक्तनवमरसत्वं कथं समर्थितमितरत्रास्यान्तर्भावश्च कुत इति सोपपत्तिकं पर्यालोच्यताम् ।

१६५१ स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यंजको मतः ।
यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात् ॥
कारिकामिमांर सनिरुक्तौ प्रौढया व्याख्याय रसस्यानुकार्यानुकर्तृगतत्वं निरस्यताम् ।

१६४६ भगवद्भक्त्यादिप्रधानासु रचनासु काव्यत्वं नोपपद्यते रसाभावात् उपपद्यते चेत्कथम् ।

(क) करुणविप्रलम्भयोः रौद्रवीरयोश्च को भेदः नागानन्दमहाभारतरामायणेषु कस्य कस्य रसस्य मुख्यत्वं कुतश्च ।

(ख) रसस्यानुकार्यानुकर्तृसामाजिकान्यतमनिष्ठत्वं पूर्वोत्तरपक्षोपन्यासपुरस्सरं निरूप्यताम् । ७

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

(ग) कस्याप्येकस्य रसस्योदाहरणे तदीयविभावादिकं निर्दिश्य स्थायि-
संचारिणोर्भेदः प्रकटनीयः । ७

ई० १६४८ यद्यपि स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः । इत्युक्तिदिशा
रसस्यास्वादानतिरिक्तत्वम् तथापि 'रसः स्वाद्यते' इति काल्पनिकं
भेदमुररीकृत्य कर्मकर्तरि वा प्रयोगः । उपक्रमोपसंहारपूर्वकं
व्याख्यातव्यमिदम् ।

कमप्येकं रसमुदाहृत्य तत्र विभावानुभावादिसंगमनं साधु विधेयम् । ७

१६४७ (क) विभावेनानुभावेन व्यक्तः संचारिणा तथा ।
रसतामेति रत्यादिः स्थायीभावः सचेतसाम् ॥

(ख) सवासनानां सभ्यानां रसस्यास्वादनं भवेत् ।
निर्वासनास्तु रंगान्तःकाष्ठकुड्याश्मसन्निभाः ॥

(ग) ये हि लोके रामादिगतरत्यादीनामुद्बोधकारणानि सीतादयस्त एव काव्ये नाट्ये च निवेशिताः सन्तो विभाव्यन्ते आस्वादांकुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकभक्त्यादि-भावा एभिरिति विभावा उच्यन्ते । तदुक्तं भर्तृहरिणा—

शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान् ।
प्रत्यक्षानिव कंसादीन् साधनत्वेन मन्यते ॥

उपर्युक्तोद्धरणानां भावार्थः सोपपत्तिकं सोदाहरणं च विशदीकर्तव्यः । एवम्

१—रसभेदाः कियन्तः ते नामग्राहं सोदाहरणं च वर्णनीयाः ।

२—रसभावतदाभासादीनां लक्षणानि सोदाहरणानि लेखनीयानि । ५

१६४६ (क) रसस्यास्वादप्रकारः समुपपाद्यताम् ।
करुणादिरसानापि सुखजनकतामुपपाद्य शृंगारस्य के भेदाः प्रभेदाश्च के इति समासेन लिख्यताम् । कुतश्च महाकवि-भिर्बाहुल्येनायं स्वकाव्येषु प्रयुज्यते ।

१६४१ विश्वनाथोक्तदिशा स्वकीयैः शब्दैः रसस्वरूपं निरूप्यताम् ।

१६४० शान्तभयानककरुणाख्यरसानां विरोधिनो रसाः के इति विविच्य रसाभासत्वे किं बीजमिति समासतः प्रदर्श्यताम् । ७

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

ई० १६३८ रसस्य सामान्यलक्षणं प्रतिपाद्य अनुकार्यगतत्वं च निरस्य विभ्रमलक्षणं सोदाहरणसंगमनं लिख्यताम् । १०

१६३७ रसस्य कार्यत्वं निरस्य उन्मादलक्षणं सोदाहरणं ससंगमनं विलिख्यताम् । १०

१६३६ सामान्यतो रसस्वरूपं समुल्लिख्य—

आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥

कस्योदाहरणमिदम् । किंच तल्लक्षणं कथं वात्र तत्संगतिः ।

१६३३ रसस्य कार्यत्वं निरस्य

आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥

कस्योदाहरणमिदमित्यभिधीयताम् ।

१६३२ सामान्यतो रसस्वरूपं प्रदर्श्य तस्यालौकिकत्वं विशदमुपपाद्यताम् । १०

१६२६ विभावेनानुभावेन व्यक्तः संचारिणा तथा ।
रसतामेति रत्यादिः स्थायीभावः सचेतसाम् ॥

इतीयं कारिका यथाशास्त्रं व्याख्याय साधु प्रतिपाद्यताम् । १०

१६६० रसस्य स्वरूपकथनगर्भं आस्वाद-प्रकारः सम्यङ्-निरूप्यताम् । १०

१६६१ करुणादीनां रसानां सुखजनकत्वं युक्तिप्रमाणाभ्यामुपपाद्य रसस्यानुकार्यगतत्वं निरस्यताम् । १०

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

चतुर्थपरिच्छेदे प्रश्नाः

ई० १९५९ अर्थशक्त्युद्भवस्य ध्वनेर्भेदाः कृत्स्नतया स्फुटं गण्यन्ताम् । १०

१९५८ एकपंचाशन्मितानां ध्वनिभेदानां संसृष्टिसंकरैरिषुबाणाग्निसायक-मिता संख्या कथं भवतीति प्रक्रियोपपाद्यताम् । ११

वस्त्वलंकारध्वनिषु व्यंग्यवस्त्वलंकारप्राधान्येपि 'वाक्यं रसात्मकं काव्यम्' इति काव्यलक्षणं कथं समन्वेति सुविचार्य स्पष्टीक्रियताम् । ११

१९५७ अर्थशक्त्युद्भवस्य कस्यापि भेदस्य प्रबन्धगतत्वमुदाहरणेन प्रदर्श्य चित्रकाव्यं ग्रन्थकाराभिमतं न वेति निर्णीयताम् । ७

१९५६ अत्यन्ततिरस्कृतवाच्यध्वनेः सोदाहरणं स्वरूपं विविच्य—

धन्यः स एव तरुणो नयने तस्यैव नयने च ।
युवजनमोहनविद्या भवितेयं यस्य संमुखे सुमुखी ॥

इति पद्यं कस्योदाहरणतयोपन्यस्तं दर्पणकारेणेति निर्णीयताम् । ७

१९५५ अर्थान्तरसंक्रमितवाच्यध्वनेः स्वरूपमुदाहरणं च प्रकदर्श्य—

त्वामस्मि वच्मि विदुषां समुदायोत्र वर्तते ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥

इति पद्यं कस्योदाहरणतयोपन्यस्तं विश्वनाथेनेति विशदं विविच्यताम् । ६

१९५४ तदप्राप्तिमहादुःखविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ॥

अत्र पद्ये व्यंजकनिर्देशपूर्वकं व्यंग्यार्थं स्फुटीकुरु । ५

१९५३ अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो ।
अहितः सहितः साधुयशोभिरसतामसि ॥

इति पद्ये व्यंग्यार्थं प्रदर्श्यार्थशक्त्युद्भवध्वनेर्भेदा नाममात्रेण निर्देष्टव्याः । ५

१९५२ 'न्यक्कारो ह्ययमेव मे यदरयः' इत्युदाहरणे तत्तत्पदाभिव्यक्तान् व्यंग्यार्थान् निर्दिश्य असुन्दरं व्यंग्यं सोदाहरणं प्रदर्शनीयम् । ६

भ्रम धार्मिक विश्रब्धमित्यादौ भ्रमणविधेः प्रकृतेऽनुपयुक्ततया

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निषेधपरत्वात् कथं न विपरीतलक्षणेति विचार्य्यं प्राच्याभिमतचित्रकाव्यत्वनिरासे का सरणिर्विश्वनाथस्येति साधूपपाद्यताम् । ७

ध्वनेः पदांशवर्णरचनाप्रबन्धप्रकाश्यत्वेन चातुर्विध्यं च सोदाहरणमुपपादनीयम् । ४

ई० १९५१ आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा····किंवा वियोगिन्यसि । पद्येऽस्मिन् विभक्त्यादीनां व्यंजकत्वं कथं भवतीति प्रतिपादनीयम् । १०

१९४२ काव्यार्थस्याखंडबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशायां गुणप्रधानभावावभासस्तावन्नानुभूयते कालान्तरे तु प्रकरणादिभिर्भवन्नप्यसौ न काव्यव्यपदेशं व्याहन्तुमीशस्तस्यास्वादमात्रायत्तत्वात् । संगतिप्रदर्शनपूर्वकं व्याख्यातव्योऽयमंशः ।

१९४१ (क) क्वचिद् बाध्यतया ख्यातिः क्वचित् ख्यातस्य बाधनम् ।
पूर्वत्र लक्षणैव स्यादुत्तत्राभिधैव तु ॥

(ख) प्रकारोयं गुणीभूतव्यंग्योपि ध्वनिरूपताम् ।
धत्ते रसादितात्पर्यपर्यालोचनया पुनः ॥

कारिकाद्वयमिदं संगतिप्रदर्शनपूर्वकं व्याख्येयम् ।

१९२० अर्थशक्त्युद्भवध्वनेर्भेदाः के, तेषु

मल्लिकामुकुले चंडि भाति गुंजन् मधुव्रतः ।
प्रयाणे पंचबाणस्य शंखमापूरयन्निव ॥

इत्यत्र कतमो भेदः किं चात्र व्यज्यते, इति प्रतिपाद्यताम् ।

१९३८ ध्वनिगुणीभूतव्यङ्ग्ययोर्मिथो भेदकं प्रदर्श्य,

आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा ।

इत्याद्युदाहरणे कतमो ध्वनिप्रभेदः ? किंचात्र व्यंग्यमिति सलक्षणसमन्वयमभिधीयताम् ।

१९३९ चित्राख्यस्तृतीयकाव्यभेदः साहित्यदर्पणकृतोऽभिमतोऽस्ति न वा ? सम्यगालोचनपूर्वकं सप्रमाणं स्वमतप्रदर्शनमप्यत्रापेक्षितम् । ८

१९४० पद्गतस्य वाक्यगतस्य चार्थान्तरसंक्रमितवाच्यध्वनेरुदाहरणे ससमन्वयं प्रदर्श्यताम् । १०

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

ई० १९४२ “काव्यार्थस्याखंडबुद्धिवेद्यस्य तन्मयीभावेनाऽऽस्वाददशायां गुण-प्रधानभावावभासस्तु भवन्नानुभूयते कालान्तरे तु प्रकरणादिपर्या-लोचनया भवन्नप्यसौ न काव्यव्यपदेशं व्याहन्तुमीशस्तस्या-स्वादमात्रा यत्तत्वात् ।”

संगतिप्रदर्शनपूर्वकं व्याख्यातव्योऽयमंशः ।

१९३२ अर्थशक्त्युद्भवध्वनेर्भेदान् नामग्राहं गृहीत्वा—

मल्लिकामुकुले चंडि भाति गुंजन् मधुव्रतः ।
प्रयाणे पंचबाणस्य शंखमापूरयन्निव ॥

कस्योदाहरणमिदम् १०

१९३३ त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥

कस्य ध्वनेरुदाहरणमिदम् व्यंग्यमाश्चत्र कथम् किङ्किमित्युल्लिख्यताम् ।

१९६० ध्वनेरेकपञ्चाशद्भेदान् परिगणय्य—

“मल्लिका-मुकुले चण्डि भाति गुञ्जन्मधुव्रतः ।
प्रयासः पञ्चबाणस्य, शङ्खमापूरयन्निव ॥

कस्येदमुदाहरणमिति साधु निरूप्यताम् । १०

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

पञ्चमपरिच्छेदे प्रश्नाः

ई० १६५६ नानुमानं रसादीनां'......................स्मृतिर्न च रसादिधीः ।'
इति कारिका ग्रन्थकृदुक्तरीत्या साकल्येन व्याख्येया । १०

१६५७ तात्पर्याख्यवृत्त्या व्यञ्जना गतार्था न वेति निपुणं निर्णीय रसादि-
बुद्धेः स्मृतित्वं निरस्यताम् । ७

१६५६ व्यंजनांगीकारे वाचोयुक्ति प्रदर्श्य शक्त्या तद्गतार्थता सम्भवति न
वेति निश्चीयताम् । ८

१६५५ रसादीनामनुमानगम्यत्वं निपुणं निराक्रियताम् । ७

१६५४ तात्पर्यवृत्त्या व्यंजनाया अगतार्थत्वमुपपाद्यताम् । ५

१६५३ रसस्याभिधया लक्षणया वा बोधनं कुतो न भवति, इति प्रतिपाद्य
जलकेलितरलेत्यादि पद्ये व्यंग्यार्थस्यानुमेयत्वं निरस्यताम् । ५

१६४३ व्यंग्यस्य वाच्यान्नवधा भेदं सोदाहरणं प्रदर्शयत । ७

१६४१ व्यञ्जनाया अनुमानानन्तर्भावः संक्षेपेणोपपाद्यताम् । ५

१६४० "स्मृतिर्न च रसादिधीः" इति कारिकांशः स्वकीयैः शब्दैः साधु
व्याख्येयः ।
व्यंजनास्थले फलस्य.............................. २

१६४१ तात्पर्याद् व्यतिरेकाच्च व्यंजकत्वस्य न ध्वनिः ।
यावत्कार्यप्रसारित्वात्तात्पर्यं न तुलाधृतम् ॥
संगतिप्रदर्शनपूर्वकं व्याख्येयाऽसौ कारिका ॥ ४

१६२० अभिधेयाद् व्यंग्यार्थस्य भेदे हेतून् प्रव्यक्तं प्रदर्शयत ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

१९५१ किन्नाम व्यंग्यार्थबोधनसाधनभूताया नव्यैरेवांगीकृताया व्यंजना-व्यवृत्तेरंगीकरणेनेत्येवमधिक्षेपं प्रबलप्रमाणादिना समाधाय तदङ्गीकरणप्रयोजनं साधूपपाद्यताम् । १०

१९३८ प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे ।
किंच मुख्यार्थबाधस्य विरहादपि लक्षणा ॥

इति कारिकां विशदं व्याख्याय, व्यंजनायाः शक्तिलक्षणाभ्यामगतार्थत्वं स्पष्टं प्रतिपाद्यताम् । १२

ई० १९३९ व्यंजनाया आवश्यकतां प्रदर्श्य सकलप्रतिपक्षविक्षेपणपूर्वकं तत्स्थापनप्रकारः संक्षेपेण प्रौढ्योपन्यस्यताम् । १२

१९४० व्यंजनावृत्तिस्वरूपप्रतिपादनपुरस्सरं तस्यास्तात्पर्यवृत्त्या गतार्थत्वं समर्थ्यताम् । १०

१९४८ व्यंग्यस्य वाच्यान्नवधा भेदं सोदाहरणं प्रदर्शयत । ७
प्रयोजनस्य लक्षणाव्यापारगम्यत्वं रसस्य विभावादिसमूहालम्भनात्मकत्वं वाच्यत्वासहत्वं च युक्त्या सोदाहरणं साधयत । ६

१९३३ बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम् ।
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यंग्यः ॥
कारिकेयं व्याख्येया ।

१९४८ रसस्यानुमानवेद्यत्वं प्रत्याख्याहि । ७

१९५२ भ्रम धार्मिकेत्यादौ भ्रमणविधेः प्रकृतेऽनुपयुक्ततया निषेधपरत्वात् कथन्न विपरीतलक्षणेति विचार्य, प्राच्याभिमतचित्रकाव्यत्वनिरासे का सरणिः विश्वनाथस्येति साधूपपाद्यताम् ।
निःशेषच्युतचन्दनमिति पद्ये व्यंग्यार्थस्यानुमानेन गतार्थता निवारणीया ।

१९४२ प्रयोजनस्य लक्षणाव्यापारागम्यत्वं रसस्य । विभावादिसमूहालम्बनत्वं वाच्यत्वासहत्वं च युक्त्या सोदाहरणं साधयत । ६

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

१६६० प्रयोजनविशिष्टे तीरे लक्षणा कुतो न सम्भवति ? किमत्र बाधकमिति सोदाहरणं विशदीक्रियताम् । १०

१६६१ नानुमानं रसादीनां व्यङ्ग्यानां बोधनक्षमम् ।
आभासत्वेन हेतूनां स्मृतिर्न च रसादिधीः ॥
सोदाहरणमियं कारिका व्याख्यायताम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

षष्ठपरिच्छेदे प्रश्नाः

ई० १९५९ गर्भाङ्कलक्षणमुक्त्वा, अङ्कगर्भाङ्कयोः को भेदः ? किमर्थं च गर्भाङ्करचनेति विव्रियताम् ।

अथवा

विष्कम्भकप्रवेशकयोर्लक्षणे विलिख्य तयोः परस्परं को भेदः । किमर्थं च नाटकेषु तद्विन्यासः ।

१९५८ (क) नाटके केषां केषां कार्याणां दर्शनं निषिद्धम् ।

(ख) सूत्रधारस्थापकयोः को भेदः किं किं च तत्कार्यम् । सोदाहरणं लिख्यताम् ।

(ग) प्रस्तावनाभेदाः सोदाहरणं निर्देश्याः ।

(घ) के सन्धयः तत्र मुखाख्ये सन्धौ कान्यङ्गानि, सलक्षणं लेख्यानि ।

(ङ) अवपतनम्, शोभा, उपदिष्टम्, एषां लक्षणानि सोदाहरणानि लेख्यानि ।

(च) विलासिका, प्रकरणिका, चूर्णकम्, एषां लक्षणानि लिख्यन्ताम् । उक्तेषु षट्सु त्रय एव प्रश्ना उत्तरणीयाः । ६

१९५७ विष्कम्भस्य लक्षणं विलिख्य, भाणस्य प्रहसनस्य वा सोदाहरणं स्वरूपं निरूप्यताम् ।

१९५६ आमुखस्य लक्षणं विलिख्य, खण्डकाव्यस्य विरुदस्य वा सोदाहरणं स्वरूपं व्यवस्थाप्यताम् ।

१९५५ पूर्वरङ्गस्य लक्षणमुल्लिख्य कथायाः प्रकरणस्य वा स्वरूपं स्फुटं निर्दिश्यताम् ।

१९५४ आमुखस्य लक्षणमुक्त्वा चतुर्षु पताकास्थानेष्वन्यतमं सलक्षणं निरूप्यताम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ई० १६५३ विष्कम्भकस्य लक्षणमुक्त्वा भाण-व्यायोग-समवकारेष्वन्यतमः सलक्षणमभिधीयताम् ।

१६५२ किं नाम गद्यम् । तस्य कियन्तो भेदाः । के च कादम्बरी-हर्षचरितादिष्वप्यनेकपद्यानां दर्शनात् 'गद्यपद्यमयं चम्पूः' इति लक्षणाच्चैतेषु चम्पूत्वमुत तद्भिन्नत्वमिति साधु विवेक्तव्यम् ।

नान्दी, प्रस्तावना, नाटकम्, रासकम्, प्रकरणिका यथाकाममेषु केचन त्रयो व्याख्यायन्ताम् ।

कति के च सन्धयः, तत्तल्लक्षणान्यभिधाय नाट्ये कति काश्च वृत्तयः, तदङ्गानि च कानीत्युल्लिख्यताम् । ६

सन्धिपताकयोरन्यतरस्य लक्षणमुक्त्वा, विलासिका–दुर्मल्लिका–माणिकास्वन्यतमा सलक्षणमभिधीयताम् । ५

१६३८ नाट्योक्तिषु रहस्याकाशभाषितयोः स्वरूपप्रदर्शनपुरस्सर नाटकानां नामकरणे किं नियामकमिति प्रदर्श्य—

सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथाभर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः ॥

इति पद्यं कस्योदाहरणतयोपन्यस्तं विश्वनाथेनेति विविच्यताम् । ६

सन्ध्यङ्गानां प्रयोजनप्रदर्शनपूर्वकं तदनंगीकारे नाटकस्य का हानिरिति निरूप्य शृङ्गारे का नाम वृत्तिरालंकारिकैरंगीक्रियते, इति तत्स्वरूपनिरूपणपुरस्सरं निरूप्यताम् ।

१६४५ केपि चत्वारो व्याख्येयाः ।

प्रवेशकः, विष्कम्भकः, चम्पूः, पताकास्थानकम्, समवकारः, नाटकम्, प्रकरणम्, सात्त्वती । ५

१६५४ के नाम नाट्योक्ताः सन्धयः ? ते च के ? कतिविधाश्च शाकुन्तलमधिकृत्य तन्निर्देशो ध्रुवं विधेयः । ५

१६४२ वीथ्यङ्गानां सोद्देशं लक्षणमुक्त्वा, मृच्छकटिके प्रस्तावनायां तेषां समावेशः कुत्र कुत्र संजात इति प्रदर्श्यताम् । ३

भारतीवृत्तिः, कथोद्घातः, पताकास्थानकम्, कैशिकी वृत्तिः । एतेषां लक्षणानि निरूपयत ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

ई० १६४१ कथोद्घातः, पताका, पूर्वरङ्गः, व्यायोगः, प्रकरणम्, एषां स्वरूपं लक्षणोदाहरणनिर्देशपुरस्सरं स्पष्टीक्रियताम् । ५

सन्धिसामान्यस्वरूपं प्रदर्श्य तद्भेदाः सलक्षणोपन्यासं निरूपणीयाः । ५

१६४० प्रकरणस्य संज्ञाविषये नायिकानायकाख्यानात्संज्ञाप्रकरणादिषु इति साहित्यदर्पणविदां सिद्धान्ते विद्यमानेऽपि कथंकारं तद्विपरीतं मृच्छकटिकमिति नाम कृतं महाकविविना शूद्रकेणेति सोपपत्तिकमुपपाद्यताम् ।

संख्यानिर्देशपुरस्सरं सन्ध्यङ्गानां प्रयोजनानि प्रदर्श्य सत्सन्निवेशप्रकारः साधु प्रदर्शनीयः । ५

१६५१ समिदार्थप्रकृतेर्लक्षणान्याख्याय कति काश्च प्रस्तावना इत्युल्लिख्यताम् । ५

नाट्यालङ्कारानपवार्य, अधोङ्कितास्त्रयो व्याख्यायन्ताम् । प्रहसनम्, सट्टकम्, आख्यायिका । ५

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

सप्तमपरिच्छेदे प्रश्नाः

१९४१ अविमृष्टविधेयांशदोषः किंगतः, पर्युदासप्रसज्यप्रतिषेधयोश्च किं स्वरूप-
मिति सोदाहरणं निरूप्य, नेयार्थत्वनिहतार्थत्वयोर्दुष्टत्वमुदाहरणोपन्या-
सेन स्फुटीकुरुत ।

१९४१ व्यभिचारिणः स्वशब्देनोपादानेऽदोषत्वमुपपाद्य, वैदर्भ्या रीतेः स्वरूपं १०
सोदाहरणं निरूपणीयम् ।

१९४२ दूषकताविधाप्रदर्शनपुरस्सरं दोषसामान्यलक्षणं परिष्कृत्याप्रयुक्तत्व- ८
सन्दिग्धत्वविरुद्धमतिकारित्वासमर्थत्वच्युतसंस्कारत्वाख्येषु दोषेषु
चतुरो दोषानुदाहरणेषु स्फुटीकुरुत । अप्रयुक्तत्वस्यादोषत्वं सन्दि-
ग्धत्वस्य च गुणत्वं कुत्रेति च वदत ।

१९४२ आनन्दरूपतया समानभावं भजतां रसानां विरोधः कथं युज्यते ? १०
विरोधप्रकाराश्च के तत्समावेशश्चैकस्मिन् पद्ये कया युक्त्या कर्तुं
शक्यत इति लिखत ।

१९४३ "गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य ८
वक्षः" इत्यत्र को दोषः ? स च पदगतो वाक्यगतो वेति सप्रमाणं
विविच्य भग्नप्रक्रमतानिर्हेतुत्वानुचितार्थत्वाख्यानां दोषाणामुदाहरणानि
लक्षणेषु सङ्गमनीयानि । निहतार्थस्यादोषत्वं, कथितपदस्य च गुणत्वं
कुत्र भवतीति स्पष्टं प्रतिपाद्यताम् ।

१९४३ "कपोले जानक्याः करिकलभदन्तद्युतिमुषी" त्यादिपद्ये कयोर्विरो- १२
धिनो रसयोः कथमेकत्र समावेश इति निपुणं निरूप्यताम् ।

१९४४ दोषसामान्यलक्षणं परिष्कृत्य, सलक्षणोदाहरणानविमृष्टविधेयांशहत- ७
वृत्ताऽस्थानस्थपदताऽर्थानौचित्याख्येषु कांश्चिदपि त्रीन् दोषानुपवर्ण्य च
'अनूणुरणन्मणिमेखल'मिति पद्ये कथङ्कारं को दोषः समापततीति
विवेचयत ।

१९४४ "ननु वाच्यस्यानभिधाने" इत्यारभ्य "अधिकपदत्वादेर्भेदो बोद्धव्यः" ११
इत्यन्तं ग्रन्थं समालोच्य दुःश्रवत्वस्य गुणत्वं, निर्हेतुताया अदोषत्वं
न्यूनपदत्वस्य च न दोषत्वं न गुणत्वं च कुत्र कुत्रेति स्पष्टं प्रति-
पादयत ।

८

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

१९४५ काव्यान्तर्वर्तिनां दोषाणां शब्दार्थरसगतत्वेन त्रैविध्ये सम्भवतीति "ते पुनः पञ्चधा मताः" इति कारिकया विश्वनाथस्य पञ्चविधत्वोक्तौ का वाचोयुक्तिः ? के च ते भेदाः ? इति स्फुटमुपपाद्यताम् । ५

१९४५ 'आनन्दयति ते नेत्रे योऽसौ सुभ्रु ! समागतः' इत्यत्र किङ्गतः दोष इति स्पष्टं प्रतिपाद्य सन्धिविश्लेष-सङ्कीर्ण-विरुद्धताख्यान् दोषान् दूषकतावीजनिर्देशपुरःसरमुपन्यस्य च 'जाता लज्जावती मुग्धा', 'परिहरति रतिं मतिं लुनीते' इत्युभयोरुदाहरणयोरन्यतरत्र स्थले ललितया सरण्या ग्रन्थतात्पर्यं विशदीक्रियताम् । १२

१९४५ दोषप्रकरणे परिगणितेभ्यो भिन्ना अलङ्कारदोषाः सम्भवन्ति न वा ? सम्भवन्ति चेत् के ते ? नो चेत्, कुतो न ? इति विविच्य, निहतार्थत्वस्यादोषत्वं, सन्दिग्धत्वस्य गुणत्वं, समाप्तपुनरात्तत्वस्य दोषत्वं न गुणत्वं च कुत्र कुत्रेति सरलया सरण्या स्वशब्दैरुल्लिख्यताम् । ८

१९४६ अधोलिखितानि वाक्यानि प्रकरणनिर्देशपुरःसरं व्याख्यायन्ताम्—

(क) अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥

(ख) एवं शब्दपरिवृत्तिसहत्वासहत्वाभ्यां पूर्वैरादृतोऽपि शब्दार्थदोषविभाग एवं पर्यवस्यति ।

(ग) व्यवहारोऽथवा तत्त्वं नौपम्ये यत् प्रतीयते ।
तन्नौपम्यं समासोक्तिरेकदेशोपमा स्फुटा ॥ (परि० १०)

१९४६ कस्य कस्य दोषस्यालंकारस्य वोदाहरणत्वेनोपन्यस्ता अधोलिखिताः श्लोका इति सोपपत्ति निरूप्यताम्, श्लोकाश्च व्याख्यायन्ताम् ।

(क) तामुदीक्ष्य कुरङ्गाक्षीं रसो नः कोप्यजायत ।
चन्द्रमण्डलमालोक्य शृङ्गारे मग्नमन्तरम् ॥

(ख) द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥

(ग) अश्रुच्छलेन सुदृशो हुतपावकधूमकलुषाक्ष्याः ।
अप्राप्य मानमङ्गं विगलति लावण्यवारिपूर इव ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

१९४७ कस्य कस्य दोषस्योदाहरणत्वेनाधोलिखिताः श्लोका उपन्यस्ता इति सोपपत्ति निरूप्यताम् श्लोकाश्च व्याख्यायन्ताम् ।

(क) ज्योत्स्नाचयः पयःपूरस्तारकाः कैरवाणि च ।
राजति व्योमकासारराजहंसः सुधाकरः ॥

(ख) सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥

(ग) परिहरति रतिं मतिं लुनीते स्खलतितरां परिवर्तते च भूयः ।
इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः ॥

१९४७ रसदोषाः सोदाहरणं स्फुटीक्रियन्ताम् ।

१९४८ संदिग्धत्व-साकांक्षत्व-ख्यातिविरुद्धत्वानां दोषाणां लक्षणमुदाहरणेषु योजयत ।

१९४८ रसयोः परस्परविरोधिनोः कथमेकस्मिन् प्रबन्धे समावेशो भवितुमर्हतीति विमृश्य सोदाहरणं प्रतिपाद्यताम् ।

१९४९ 'रसापकर्षका दोषाः' इति सामान्यलक्षणं विशदं व्याख्याय, पञ्चप्रकारेषु तेषु रसापकर्षकत्वं कया रीत्या सङ्गच्छत इति प्रतिपाद्यताम् ।

१९४९ समाप्तपुनरात्तता–वाच्यानभिधान–भग्नप्रक्रम–गर्भितताऽभिधानेषु किमपि द्वयं सलक्षणसमन्वयं निरूप्यताम् ।

१९४९ रसदोषान् नामग्राहं परिगणय्य, प्रकृति–विपर्ययो दोषः कीदृश इति तन्निरूपणं विधीयताम् ।

१९५० 'रसापकर्षका दोषाः', इति दोषसामान्यलक्षणेन साक्षात् परम्परया रसापकर्षकत्वं दोषाणामुदाहरणमुखेन प्रतिपादयत ।

१९५० 'कमले चरणाघातं मुखं सुमुखि ! तेऽकरोत्' किमत्र दुष्टत्वं ? सलक्षणं तत् स्पष्टीकुरुत ।

१९५० कानि कविसमयख्यातानि ? कथञ्च ख्यातविरुद्धतायास्तत्र गुणत्वमित्युपपादयत ।

१९५१ 'अमुक्ता भवता नाथे'ति श्लोके कथं को दोष उद्भाव्यते, इतिसम्यग् विविच्य 'अश्राद्धभोजी ब्राह्मणः' 'असूर्यम्पश्याः राजदारा' इत्यादौ प्रसज्यप्रतिषेधत्वमस्ति न वेति सोपपत्तिकं विचार्यताम् । १०

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

१९५१ दोषसामान्यलक्षणं व्याकृत्य दुःश्रवत्वाप्रतीतत्वयोः निहतार्थाप्रयुक्तत्वयोश्च लक्षणसमन्वयोदाहरणान्याख्याय, एषां कथं गुणत्वमदोषत्वञ्चेति साधु विवेक्तव्यम् । १०

१९५१ (क) हरन्ति हृदयं यूनां न नवेन्दुकलादयः ।
वीक्ष्यते यैरियं तन्वी लोकलोचनचन्द्रिका ॥

(ख) अनुरागवन्तमपि लोचनयो
र्दधतं वपुः सुखमतापकरम् ।
निरकासयद्रविमपेतवसुं—
वियदालयादपरदिग्गणिका ।

पद्ययोरनयोर्दर्पणोक्तदिशा सलक्षणसमन्वयं दोषमुपवर्ण्य कविसमयख्यातानि च निर्दिश्य अलङ्कारसामान्यलक्षणं परिष्कुरुत । १०

१९५२ पदतदंशगतदोषानुपवर्ण्याश्लीलाप्रतीतावाचककथितपदपतत्प्रकर्षसमाप्तपुनरात्तापुष्टत्वानां सलक्षणसमन्वयोदाहरणान्याख्याय गुणत्वमदोषत्वं केषां कथमिति विविच्योपपाद्यताम् ।

१९५२ 'गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः' इत्यादावनुषक्तदोषं दर्पणदिशा विचार्य्यात्र तस्य पददोषत्वं, तदंशदोषत्वं वाक्यदोषत्वं वेति साधु विवेक्तव्यम् । १०

१९५२ परिहर्ति रतिं मतिं लुनीते स्खलतितरां परिवर्तते च भूयः ।
इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः ॥
पद्यस्याऽस्य सलक्षणसमन्वयं दोषमुपपाद्यताम् । ३

१९५३ दोषसामान्यलक्षणं निरूप्य अवाचकाविमृष्टविधेयांशपुनरुक्तानां लक्षणं सोदाहरणं प्रदर्श्यताम् । ११

१९५३ रसानां परस्परविरोधस्य परिहारस्संक्षेपेण निरूपणीयः । ८

१९५४ शब्ददोषेऽर्थदोषे च परस्परं वैलक्षण्यं प्रदर्श्यासमर्थाभवन्मतयोगनिहतार्थानां लक्षणं सोदाहरणं लिख्यताम् । १०

१९५५ प्रसज्यप्रतिषेध—पर्युदास—विवेचनपूर्वकं सविशदोदाहरणमविमृष्टविधेयांशदोषो विचार्यताम् । कश्चास्याभवन्मतसम्बन्धाद् विषयविभाग इत्यपि सोदाहरणमुपपाद्यताम् । १०

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

१९५५ विरोधिनोऽपि स्मरणे साम्येन वचनेऽपि वा ।
भवेद्विरोधो नान्योन्यमङ्गिन्यङ्गित्वमाप्तयोः ॥
इत्येषा कारिका सोदाहरणं वैशद्येन व्याख्यायताम् । १०

१९५५ कानि नाम कविसमयप्रख्यातानि का च साहित्यदर्पणे तदुल्लेख-सङ्गतिरिति स्पष्टं समुल्लिख्यताम् ।

१९५६ पूर्वापरसम्बन्धप्रदर्शनपूर्वकं 'श्राद्धभोजनशीलो हि यतः कर्ता प्रतीयते।
न तद्भोजनमात्रं तु कर्तरीनेर्विधानतः ॥' इति पद्यार्थं विविच्य,
'आजघ्ने विषमविलोचनस्य वक्षः' इत्यत्र दोषात्पदांशदोषान्तरयोः
सम्भावनां तत्खण्डनं च विधाय प्रकृतदोषत्वं साधनीयम् ।

१९५६ अधिकपदत्वापुष्टार्थत्वयोर्भेदनिरूपणपूर्वकं, हतवृत्ततास्थानस्थयुक्तते सोदाहरणे व्याख्येये । ७

१९५६ धवलयति शिशिररोचिषि भुवनतलं लोकलोचनानन्दे ।
ईषताक्षिप्तकटाक्षा स्मेरमुखी सा निरीक्ष्यतां तन्वी ॥
कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरस्फारोड्डमरपुलकं वक्त्रकमलम् ।
मुहुः पश्यञ् शृण्वन् रजनिचरसेनाकलकलं
जटाजूटग्रन्थिं द्रढयति रघूणां परिवृढः ॥
इति पद्यद्वयं कस्योदाहरणत्वेनोपन्यस्तमिति विशदं विवेचनीयम् । ७

१९५७ पदगतेषु—नेयार्थस्यावाचकत्वस्य वा, वाक्यगतेषु—हतवृत्तस्याभवन्मत-सम्बन्धस्य वा, अर्थगतेषु—व्याहतस्य विध्यनुवादायुक्तस्य वा दोषस्य तत्तदुदाहरणेषु दूषकताबीजमुद्घाटनीयम् । ८

१९५७ सदा शिवं नौमि पिनाकपाणिम् ।
हीरकाणां निधेरस्य सिन्धोः किं वर्णयामहे ।
मानं मा कुरु तन्वङ्गि ज्ञात्वा यौवनमस्थिरम् ।
एष मूर्तो यथा धर्मः क्षितिपो रक्षति क्षितिम् ।
उदाहरणेष्वेषु सदोषता विवेचनीया । ८

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

१९५७ 'आक्षेपः कल्पितः कृच्छ्रादनुभावविभावयोः' इति कारिकांशमुदाहरण-मुखेन व्याख्याय—

अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरम् ।
निरकासयद् रविमपेतवसुं वियदालयादपरदिग्गणिका ॥
पद्यमिदं कस्योदाहरणतया समुपन्यस्तमिति स्पष्टीक्रियताम् । ७

१९५८ वाच्यानभिधानन्यूनपदत्वयोः, अधिकपदत्वापुष्टार्थयोः अनवीकृत-कथितपदत्वयोश्च सोदाहरणं भेदं निरूप्य—'असुक्ता' इत्यत्र तु क्रिययैव सह सम्बन्ध इति दोष एव, इति ग्रन्थांशो व्याख्येयः । १०

१९५८ धवलयति शिशिररोचिषि भुवनतलं लोकलोचनानन्दे ।
ईषत्क्षिप्तकटाक्षा स्मेरमुखी सा निरीक्ष्यतां तन्वी ॥

पद्येऽस्मिन् रसस्योद्दीपनालम्बनविभावयोरनुभावपर्यवसायितां विविच्य, रसानां विरोधाविरोधयोः का व्यवस्था स्वीकृता ग्रन्थकृतेति समुद्घाटनीयम् । ६

१९५८ विरोधिनोऽपि स्मरणे साम्येन वचनेऽपि वा ।
भवेद् विरोधो नान्योन्यमङ्गिन्यङ्गत्वमाप्तयोः ॥
उदाहरणैरेषा कारिका विशदं व्याख्येया । ६

१९५९ पदगतेषु–नेयार्थस्य, वाक्यगतेषु -अक्रमस्य, अर्थगतेषु निर्हेतुत्वस्य च दोषस्य लक्षणं दूषकताबीजञ्चोदाहरणेषु समुद्भाव्य—

(क) यदि पदान्तरेण स एवार्थः प्रतिपाद्यते तदान्योऽर्थ इव प्रतिभासमानः प्रतीतिं स्थगयति ।

(ख) पदशब्देन वाचकमेव प्रायो निगद्यते न च नञो वाचकता निर्विवादात् स्वातन्त्र्येणार्थबोधनविरहात् अनयोरेकस्यैव ग्रन्थांशस्य प्रकरणप्रदर्शनपुरस्सरं व्याख्या विधेया । १०

१९५९ व्यभिचारिणः स्वशब्दोपादाने दोषत्वमदोषत्वञ्च सोपपत्त्युपपाद्य, 'कपोले जानक्याः करिकलभदन्तद्युतिमुषि' इत्यादिपद्ये शङ्कासमाधानं विवेचनीयम् । ७

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

१९६० प्रकरणप्रदर्शनपुरस्सरमंशत्रयस्यैव व्याख्या विधेया—

(अ) निरर्थकत्वादीनां त्रयाणां पदमात्रगतत्वे नैव लक्ष्ये सम्भवः।

(आ) नियमस्यावचनमेव पृथग्भूतं नियमपरिवृत्तेर्विषयः।

(इ) यत्र लिङ्गवचनभेदेऽपि न साधारणधर्मस्यान्यथाभावस्तत्र न दोषः।

(ई) रसानां विरोधिताया अविरोधितायाश्च त्रिधा व्यवस्था। ६

१९६० अभवन्मतसम्बन्धविधेयाविमर्शयोः, अपुष्टाधिकपदत्वयोश्चोदाहरणैः पारस्परिकः प्रभेदः प्रदर्शनीयः। ७

१९६० 'क्वचिदुक्तौ स्वशब्देन न दोषो व्यभिचारिणः' इति कारिकांशं स्पष्टीकृत्य, न्यूनपदत्वस्य दोषाभावता सन्दिग्धत्वस्य गुणता कदा भवतीति प्रतिपादनीयम्। ७

१९६१ अधिकपदत्वापुष्टार्थयोः, अनवीकृतकथितपदत्वयोश्च सोदाहरणं प्रभेदं प्रदर्श्य—

(क) 'अश्राद्धभोजी ब्राह्मणः' इत्यादिवत् 'अमुक्ता' इत्यत्रापि प्रसज्य-प्रतिषेधो भवति।

(ख) 'आजघ्ने' इति पदस्य स्वतो न दुष्टता अपि तु पदान्तरापेक्षयैव, इत्यस्य वाक्यदोषता।

(ग) परशुनिन्दामुखेन भार्गवनिन्दाधिक्यमेव वैदग्ध्यं द्योतयतीत्या-धुनिकाः।

इत्येषु प्रकरणप्रदर्शनपुरस्सरमंशद्वयस्यैव व्याख्या विधेया। १२

१९६१ मानं मा कुरु तन्वङ्गि ज्ञात्वा यौवनमस्थिरम्।
हरत्वनीलकण्ठोऽयं विराजति शिखावलः।
सम्प्रति सन्ध्यासमयश्चक्रद्वन्द्वानि विघटयति।
सरागया स्रुतघनघर्मतोयया कराहतिध्वनितपृथूरुपीठया।
मुहुर्मुहुर्दशनविलङ्घितोष्ठया रुषा नृपाः प्रियतमयेव भेजिरे॥
उदाहरणेष्वेषु दोषादोषौ विवेचनीयौ। ८

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अष्टमपरिच्छेदे प्रश्नाः

१९४१ प्रसादगुणलक्षणं ससमन्वयमुदाहृत्य, चिरन्तनैः स्वीकृतान् शब्दगुणान् नामग्राहं निर्दिश्य तेषां साहित्यदर्पणकाराभिमतगुणादिष्वन्तर्भावप्रकारः प्रदर्शनीयः । १२

१९४२ परोक्तं माधुर्यलक्षणं निराकृत्य ग्रन्थकृदभिमतं तल्लक्षणं च प्रतिपाद्य माधुर्यव्यञ्जकान् वर्णादीनुदाहरणेषु प्रदर्शयत । १०

१९४४ 'माधुर्यं द्रुतिकारणमि'ति मतं निरस्य दर्पणसंमतं माधुर्यलक्षणं सोदाहरणं निरूप्य च सप्रपञ्चं वैदर्भीरीतिरुदाह्रियताम् । ७

१९४२ गुणसामान्यलक्षणं परिष्कृत्य, गुणभेदांश्च नामग्राहं परिगणय्य, प्रसादस्य लक्षणं लक्ष्ये सङ्गमय्य च पाञ्चालिकारीतेरुदाहरणं सव्याख्यं लक्षणसमन्वयपुरस्सरं विलिख्यताम् । १०

१९४४ प्राचीनोक्तस्य समाधेर्नामाऽर्थगुणस्य 'न गुणत्वमि'ति प्रतिपादयिषतो ग्रन्थकर्तुस्तात्पर्यं तत्प्रदर्शितसरण्या विशदीकृत्य सभिदां रीतिं सामान्यतो लक्षयित्वा च गौडीलाट्योरन्यतरस्या रीतेर्लक्षणं समन्वयत । ८

१९४६ माधुर्यौजःप्रसादानां गुणानां स्वरूपं निरूप्य चिरन्तनैरालंकारिकैः स्वीकृतानां दशानां गुणानां कुत्र कुत्र कथमन्तर्भाव इति सोपपत्ति प्रतिपाद्यताम् ।

१९४८ अधोलिखितानि वाक्यानि प्रकरणनिर्देशपुरःसरं व्याख्येयानि ।

(क) 'द्रवीभावश्च स्वाभाविकानाविष्टत्वात्मककाठिन्यमन्युक्रोधादिकृतदीप्तत्वविस्मयहासाद्युपहितविक्षेपपरित्यागेन रसाद्याकारानुविद्धानन्दोद्बोधेन सहृदयचित्तार्द्रप्रायत्वम् ।'

(ख) 'प्रवन्धौचित्याद्यथा नाटकादौ रौद्रेऽप्यभिनयप्रतिकूलत्वेन न दीर्घसमासादयः । एवमाख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः । कथायां रौद्रेऽपि नात्यन्तमुद्धताः ।'

(ग) 'अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥' (परि० ७)

१९४९ 'माधुर्यं द्रुतिकारणमि'ति परोक्तलक्षणखण्डनपूर्वकं ग्रन्थकृदभिमतं माधुर्यस्वरूपमुपपाद्यताम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

१९५० ओजसि गुणे चिरन्तनोक्तानां केषां गुणानामन्तर्भावः संपद्यते ?। 'सूचीमुखेन सकृदेव कृतव्रणस्त्वं'–पद्यमेतत्कस्योदाहरणम् ?

१९५२ सहसालिजनैः स्निग्धैः सहसा कुञ्जमन्दिरम् ।
उदिते रजनीनाथे सहसा याति सुन्दरी ॥
उपर्युक्तपद्यस्य सलक्षणसमन्वयं दोषमुपपाद्य—
लताकुञ्जं गुञ्जन् मदवदलिपुञ्जं चपलयन्–
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ॥'
माधुर्यगुणान्विते अत्र पद्ये तुर्यपादगत-दिशिद्विशि-पदस्य सर्वलघ्वप्रौढबन्धत्वात् को दोषः तत्परिहारश्च कथमिति स्पष्टं निर्देष्टव्यम् । १०

१९५३ गुणालङ्कारयोः परस्परं भेदः स्पष्टं वाच्यः । ८

१९५४ किं तावन्नाम गुणत्वम् । तस्य रसनिष्ठत्वं शब्दार्थनिष्ठत्वं वा । आलङ्कारिकाणां च कः पक्षस्सुसम्मतः । १०

१९५६ माधुर्ये द्रवीभावस्वरूपं स्पष्टीकृत्य, 'तेन नार्थगुणाः पृथक्' इति सोदाहरणं संसाधनीयम् । ७

१९५७ 'माधुर्यं द्रुतिकारणमि'ति लक्षणे दोषोद्घोषणपूर्वकम्, 'तेन नार्थगुणाः पृथक्' इति सोदाहरणं संसाधनीयम् । ७

१९५८ गुणानां रसमात्रधर्मतां संसाध्य—
ओजः प्रसादो माधुर्यं सौकुमार्यमुदारता ।
तदभावस्य दोषत्वात् स्वीकृता अर्थगा गुणाः ।
कारिकैषा पूर्वापरप्रसङ्गपुरस्सरा व्याख्येया । ७

१९५९ गुणानां रसमात्रधर्मतां, गुणवृत्त्या शब्दगुणानाञ्च प्रदर्श्य, पूर्वाचार्यैः स्वीकृतस्य शब्दगतस्यार्थगतस्य च समतागुणस्य नवीनमते सदोषता दोषाभावता च प्रकाशनीया । ७

१९५९ आसीदञ्जनमत्रेति पश्यामि तव लोचने ।
भाविभूषणसंभारां साक्षात् कुर्वे तवाकृतिम् ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

पद्येऽस्मिन् सम्भावितगुणरसालंकारान् निरस्य सिद्धान्तपक्षः प्रतिपादनीयः । ६

१९६० गुणानां रसमात्रधर्मतां गुणवृत्त्या शब्दगुणांश्च संसाध्य, 'अनुप्रासादीनामपि रसादिपरत्वेनार्थमुखप्रेक्षितयार्थालङ्कारत्वप्रसङ्गः' इति ग्रन्थांशस्य व्याख्या कार्या । ७

१९४८ चिरन्तनैरुक्तानां श्लेष-समाधि-औदार्य-प्रसादानामोजस्यन्तर्भावं सोदाहरणं समर्थयत ।

१९४९ 'क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादयः' इति कारिकांशः उदाहरणमुपन्यस्य व्याख्यायताम् ।

१९५२ गुणालङ्कारप्रविभागं स्पष्टीकृत्य चिरन्तनैरुक्तानां दशशब्दगुणानां कया विधया त्रिष्वेवान्तर्भावो दर्पणकृतामिति तत्तद्गुणस्वरूपनिर्देशमुखेन विशदीकृत्य सम्यगालोच्यताम् । १०

१९५३ वामनोक्तानामर्थगुणानां त्रिष्वेव गुणेषु कथं समावेश इति लिख्यताम् । ८

१९५८ पूर्वाचार्यैः सम्मतस्यार्थश्लेषगुणस्य लक्ष्यलक्षणे नवीनमते चास्यागुणतां प्रदर्श्य, 'क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादयः' इति ससङ्गतिः कारिकांशो व्याख्येयः । ७

नवमपरिच्छेदे प्रश्नाः

१९४६ रीतिचतुष्टयं लक्षणोदाहरणपुरःसरं विस्तरतो वर्ण्यताम् ।

१९५० पाञ्चालिका रीतिः कीदृशी ? । तत्स्वरूपं निरूपयत !

१९५६ वैदर्भ्या रीतेः स्वरूपनिरूपणपूर्वकं 'क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादयः' उदाहरणैः कारिकांशोऽयं व्याख्येयः । ७

१९५१ क्वचिद् भेदस्तु समता मार्गाभेदस्वरूपिणी ।
अन्यथोक्तगुणेष्वस्या अन्तः पातो यथायथम् ॥
कारिकामिमां सोदाहरणं प्रौढ्या व्याख्याय—
अयमुदयति मुद्राभञ्जनः पद्मिनीना—
मुदयगिरिवनालीबालमन्दारपुष्पम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्—

कुपितकपिकपोलक्रोडताम्रस्तमांसि ।

अत्रत्या रीतिर्वर्णनीया ।

१९५७ रीतेः सामान्यलक्षणं निरूप्य, शब्दश्लेषस्याष्टविधता प्रदर्शनीया । ७

१९६१ अधस्तनकारिकाणां सोदाहरणा व्याख्या कार्या—

क्वचिद् दोषस्तु समता मार्गभेदस्वरूपिणी ।

एषां शब्दगुणत्वञ्च गुणवृत्त्योच्यते बुधैः ।

लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरे स्थिता । ७

दशमपरिच्छेदे प्रश्नाः

१९४१ धर्मलोपे उपमाप्रकारान् परम्परितरूपभेदांश्चोदाहृत्य, दीपकतुल्ययोगितयोर्विशेषं, परिकरपर्यायोक्तव्याघातप्रतीपव्याजोक्त्यलङ्कारेषु स्वेच्छयाऽलङ्कारद्वयं च समन्वयपूर्वकं निर्दिशत । १२

१९५१ सङ्करसंसृष्टयोर्लक्षणे तद्भेदांश्चोपपाद्य 'आक्रष्टिवेगविगलदि'ति पद्यं सालङ्कारसमन्वयं व्याख्येयम् । ८

१९४२ पुनरुक्तवदाभासं सलक्षणोदाहरणं प्रदर्श्यास्य शब्दालङ्कारत्वमर्थालङ्कारत्वमुभयालङ्कारत्वं वेति सप्रमाणं निरूप्यताम् । १०

१९४२ रसवत्–प्रेय–ऊर्जस्व–समाहित–भावोदय–भावसन्धि–भावशबलाख्येष्वलङ्कारेषु केऽपि यथेच्छं चत्वारः सलक्षणोदाहरणं व्याख्येयाः । १२

१९४३ श्लेषसामान्यलक्षणं सोदाहरणं प्रदर्श्य, श्लेषावान्तरभेदांश्च नामग्राहं परिगणय्य सलक्षणोदाहरणं वृत्त्यनुप्रासः स्फुटीक्रियताम् । ११

१९४२ साकारं विन्यस्ताक्षरं मुरजबन्धचित्रं विलिख्य तत्रत्यपद्यस्यार्थः स्पष्टमभिधीयताम् । ११

१९४३ रूपकापह्नुतिनिदर्शनासमासोक्तिकाव्यलिङ्गसमुच्चयेषु कयोश्चिदुभयोर्लक्षणोदाहरणानि प्रदर्श्य संसृष्टिसङ्करयोरन्यतरञ्च सप्रपञ्चं प्रदर्श्य तयोरस्ति न वा पृथगलङ्कारत्वमिति सम्यगुपपाद्यताम् । १०

१९४४ पुनरुक्तवदाभासस्य श्लेषस्य वा शब्दालङ्कारत्वमर्थालङ्कारत्वमुभया-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

लङ्कारत्वं वेति सप्रमाणं निरूप्य प्रहेलिकाया अनलङ्कारत्वं कुतः सिद्ध्यतीति निगद्य च भावोदयसन्धिशबलेषु कमप्येकं विशदीकुरुत। ७

१९४४ उपमारूपकोत्प्रेक्षानिदर्शनासमासोक्त्यप्रस्तुतप्रशंसानुमानेषु केवलं त्रीनलङ्कारान् सप्रपञ्चं निरूपयत। ६

१९४४ दर्पणोक्तदिशाऽलङ्कारलक्षणं सपदकृत्यं परिष्कृत्य, सारपरिसंख्याभाविकेषु कयोश्चिद् द्वयोर्लक्षणोदाहरणानि लिखत। ८

१९५५ अनुप्रासापह्नुत्यलङ्कारयोरेकतरः सभेदमुदाहरणेषु सङ्गम्यतां, प्रदर्श्यतां च सविशेषमेकाश्रयानुप्रवेशसङ्करोदाहरणम्। ७

१९४५ अतिशयोक्ति–सहोक्ति–समासोक्ति–विशेषोक्ति–व्याजोक्ति–स्वभावोक्ति-नामधेयेष्वलङ्कारेषु केषामपि त्रयाणां लक्षणोदाहरणानि साभिप्रायं प्रदर्श्य विशेषसामान्योत्तरोदात्तेषु किमपि द्वयं सार्थोदाहरणं विलिख्यताम्। ११

१९४६ उपमाविभागं विश्वनाथोक्तदिशा पट्टिकया प्रदर्श्य 'आधारकर्मविहिते द्विविधे च क्यचि क्यङि। कर्मकर्त्रोर्णमुलि च स्यादेवं पञ्चधा पुनः॥' इति कारिका सोदाहरणं व्याख्यायताम्।

१९४६ काव्यलिङ्गानुमानयोः साधर्म्यं च सोदाहरणं निरूप्यताम्। अप्रस्तुतप्रशंसासमासोक्त्योः परस्परं को भेदः। यत्रालङ्कारतः किमपि वस्तु प्रतीयते, तादृशं किमप्यलंकारत्रयं नामतो निर्दिश्य तेष्वन्यतमस्य लक्षणमुदाहरणं च दीयताम्।

१९४८ कस्य कस्यालङ्कारस्योदाहरणत्वेनाधोलिखिताः श्लोका उपन्यस्ता इति सोपपत्ति निरूप्यताम्। श्लोकाश्च व्याख्यायन्ताम्।

(क) प्रिय इति गोपवधूभिः, शिशुरिति वृद्धैरधीश इति देवैः।
नारायण इति भक्तैर्ब्रह्मेत्यग्राहि योगिभिर्देवः॥

(ख) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥

(ग) यदि स्यान्मण्डले सक्तमिन्दोरिन्दीवरद्वयम्।
तदोपमीयते तस्या वदनं चारुलोचनम्॥

१९४८ प्रतिवस्तूपमादृष्टान्तयोः, तुल्ययोगितादीपकयोः, अप्रस्तुतप्रशंसासमासोक्त्योश्च लक्षणे वैलक्षण्यं च सोदाहरणं निरूपयत।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

१९४८ अध्यवसायमूलमलंकारद्वयं विरोधमूलं चालङ्कारद्वयं नामतो निर्दिश्य लक्षणोदाहरणानि प्रदीयन्ताम् ।

१९४९ गुणालङ्कारयोर्विविक्तविषयतामुपपाद्य 'पुनरुक्तवदाभास' स्योभयालङ्कारता सम्यगुपपाद्यताम् ।

१९४९ अष्टविधं श्लेषं परिगणय्य,

'सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः ।
नयोपकारसांमुख्यमायासि तनु वर्तनम् ॥'

कस्येदमुदाहरणं ? । तत्समन्वयपूर्वकं पद्यमिदं व्याख्यायताम्—

१९४९ परिणाम-संदेह-भ्रान्तिम-दुल्लेख-निश्चय-विषमाणां मध्ये किमपि अलङ्कारद्वयं सलक्ष्य-लक्षणसङ्गमं विलिख्यताम् ।

१९४९ सन्देह-सङ्करालङ्कारस्योदाहरणमुद्धृत्य, तत्र बहूनामलङ्काराणां युगपत् सन्देहः कथमुत्पद्यते इति साधु प्रदर्श्यताम् ।

१९५० लाटानुप्रास-यमकयोः किंप्रयुक्तो भेदः ? सलक्षणोपन्यासमेतत्प्रदर्शयत ।

१९५० उपमालक्षणमुपन्यस्य, रूपक-व्यतिरेक-उपमेयोपमा-अनन्वयेभ्यस्तद्व्यावृत्तिमुद्भावयत ।

१९५० अर्थान्तरन्यास-अप्रस्तुतप्रशंसयोरेकतरमलङ्कारं निरूप्य, स्वाधीतकाव्येभ्यस्तदुदाहरणान्याख्यात ।

१९५१ अर्थान्तरन्यासालङ्कृतेः सभेदं लक्षणोदाहरणान्याख्याय—

को भेदोऽस्य काव्यलिङ्गालङ्कारात् इति विविच्य च अनुमानानुकूलासङ्गतिसमाधिसारप्रत्यनीकातद्गुणसूक्ष्मभाविकोदात्तालङ्कारेषु केषाञ्चित् चतुर्णां लक्षणोदाहरणान्युल्लिख्यन्ताम् ।

१९५१ दृष्टान्तप्रतिवस्तूपमयोः, निदर्शनार्थापत्त्योः, अनुमानोत्प्रेक्षयोः, विभावनाविशेषोक्त्योश्च मिथो भेदं विचार्य—

अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ॥

पद्यमिदं दर्पणकृता कस्योदाहरणत्वेन न्यदर्शीति साधु विवेचनीयम् ।१०

१९५१ मिथोविरोधिवीरश्रृङ्गारादिरसानामेकत्र समावेशे विश्वनाथापादितविधिं सोदाहरणं स्फुटीकृत्य—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'लताकुञ्जं गुञ्जन् मदवदलिपुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ॥'

पद्यमिदं दर्पणकृता कस्योदाहरणत्वेनोपन्यस्तमिति सलक्षणसमन्वयं विविच्य च—

'कोकिलोऽहं भवान् काकः समानः कालिमाऽऽवयोः ।
अन्तरं कथयिष्यन्ति काकलीकोविदा जनाः ॥'

इत्यत्र कोऽलङ्कारः कथमिति सलक्षणसमन्वयं दर्पणदिशा विचार्यताम् । १०

१९५२ रूपकपरिणामयोर्मिथो भेदं सलक्षणसमन्वयोदाहरणं प्रदर्श्य :—

(क) मनोजराजस्य सितातपत्रं श्रीखण्डचित्रं हरिदङ्गनायाः ।
विराजते व्योमसरःसरोजं कर्पूरपूरप्रभमिन्दुबिम्बम् ॥

(ख) सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ॥

(ग) मानमस्य निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्ट्यैतदुदीर्णं घनगर्जितम् ॥

उपरि निर्दिष्टेषु कयोश्चिद् द्वयोरलङ्कारा निरूपणीयाः । १०

१९५२ विषमासङ्गतिपर्यायैकावलीप्रत्यनीकपरिसङ्ख्यालङ्कारेषु किमप्यलङ्कारचतुष्टयं सलक्षणसमन्वयोदाहरणमन्वाख्याय पुनरुक्तवदाभासयमकयोः उपमादीपकयोर्मिथो भेदमुपवर्णयत ।

१९५२ (क) अथ कृततिलकां वा सान्द्रसिन्दूरतैलै-
र्दिनपतिरुपयातो यत्र सन्ध्यां क्रमेण ।
नयनमिव धुवन्ती भ्रान्तभृङ्गच्छलेन
सह खलु दिनकन्या पद्मिनी मुद्रिताभूत् ॥

(ख) सहायशून्योऽपि गुणान्वितो जनो, नैवानुगत्या भजते प्रभोरपि ।
दण्डस्तरीबन्धनरश्मिसंयुतो महाप्रवाहे स्थिर एव लक्ष्यते ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.